ग्रंथ सं० —— ६५५

विषय: धर्मशास्त्र

क्रम सं०

नाम प्रायश्चित्त प्रकरणम्

ग्रन्थकार भवदेवभट्ट

पत्र सं० १-७८

श्लोक सं० ——

अक्षर सं० (पंक्तौ) ४५ पंक्ति सं० (पृष्ठे) ७

आकार: ९.७×३.५

लिपि: दे.ना.

आधार: का.

वि० विवरणम् पू.

13314

अ. २५८

पी० एस० यू० पी०—७७ एम० सी० ई०—१९५१—५०.०००

Indira Gandhi National Centre for the Arts

॥श्रीयदुनाथो जयति॥ श्रीगोकुलनाथो जयति॥

ग्रं- ६०८

॥गोपीनाथपंडितस्य॥

प्रा.प्रा ॥ ॥ श्रीसरस्वतीविनायकाभ्यां नमः ॥ ॥ अनादिनवसंवृतपापप्रणाशकारणं ॥ स्मरणं वासुदेवस्य यस्य तस्मै नमो नमः ॥

१ ॥१॥ मन्वादिस्मृतिमालोक्य सुविविच्य यथाक्रमं ॥ क्रियते तत्त्वदेवेन प्रायश्चित्त निरूपणं ॥ ॥ प्रायश्चित्ते निरूपणीये गु

२ रुत्वात्पूर्वं महापातकप्रायश्चित्तनिरूपणं तत्रस्वैरवेतरप्रायश्चित्तनिरूपणे कर्त्तव्ये मन्वादिवचन क्रमानुरोधेन प्रथमं ब्रह्मवधनिरू

पणं क्रियते ॥ तथा च मनुः ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ महांति पातकान्याहुः संसर्गश्चापि तैः सह ॥ तथा च विष्णु मि

मितस्मृत्यंतरे वचः ॥ ब्राह्मणो नैव हंतव्यः सुरा पेया न च द्विजैः ॥ ब्राह्मणस्वर्णहरणं न कर्त्तव्यं कथंचन ॥ गुरुपत्नी न गंतव्या संसर्गं तैः

श्च वर्जयेत् ॥ महापातकसंज्ञा च निर्दिष्टेषामतीतितिः ॥ अत्र निषेधविषयस्य हननस्यानिरूपणे हनननिमित्तप्रायश्चित्तानिरू

पणं न संभवतीति प्रथमं हननमेव निरूप्यते ॥ किमिदं हननं नामेति ॥ तत्र प्राणवियोगफलको व्यापारो हननमिति लोकसिद्धमेवास

त्प्राणवियोगफलो व्यापारो यथाऽस्त्रशस्त्रादेः कर्त्तुस्तथा परंपराकर्त्तुरपीति तस्यापि हंतृत्वं ॥ तेन साक्षाद्धंतृत्व तत्प्रयोजकानुमंतृ निमि आलम

त्तिनामपि हंतृत्वात् तेषां नामेव निषेधविषयत्वं ॥ न चैकस्य कर्त्राद्यनेकपरत्वमनुगतैकरूपद्वारेण तद्वति ॥ न चात्र हंत्राद्यइ

निमित्तं किंचिदनुगतैकरूपं बस्वि कमस्ति ॥ अथ साक्षात्परंपरासाधारणं प्राणवियोगफलव्यापारहेतुत्वमात्रं विवक्षितं ॥ तर्हि इक्षुका

रस्यापि हंतृत्वप्रसंगः ॥ न केवलमिक्षुकारस्य वध्यस्यापि हंतृगतमन्युत्पादनद्वारेणात्मवधित्वप्रसंगः ॥ न ह्यनुत्पादितमन्युः क

श्चित्कश्चित्कमपि व्यापादयति ॥ तेन यथा निमित्तिनो मन्यूत्पादनद्वारेण निमित्तवधित्वं तथास्यात्मन्यपि निमित्तवधित्वं दु

र्निवारमेवेति ॥ साक्षाद्धंतृत्वरेव निषेधविषयत्वमुचितमिति ॥ उच्यते ॥ सत्यमेवमिक्षुकारादिविलक्षणानुगतैकरूपाभावेपि

येषां वा सन्निकृष्टहंतृत्वं प्रतीयते तेषामेव निषेधविषयत्वं ॥ न हि प्रमाणांतरसिद्धप्रयोजकादीनां परंपराकारणत्वे वेदफलस्य श्रा

वृस्यानुवादकत्वं विधिनिषेधविषयत्वप्रतिपादनप्रयोजनव्यतिरेकेण संभवतीति तथा च विष्णुः ॥ रागाद्द्वेषात्प्रमादाद्वा स्वतः

परत एव वा ॥ ब्राह्मणं घातयेद्यस्तु स भवेद्ब्रह्मघातकः ॥ अत्र परतः शब्दप्रयोगात् साक्षाद्विव प्रयोजकस्यापि वधलागिना

नीयते ॥ तथा च मनुः ॥ बहूनामेककार्याणां सर्वेषां शस्त्रधारिणां ॥ यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः ॥ आपस्तंबः ॥ प्रयो

जयिताऽनुमंता कर्त्तेति ते सर्वे स्वर्गनरकफलस्य लोकारोयो न्त्यश्चारंतनेतस्मिन्फलविशेषः ॥ अनेनानुमंतुरपि वधलागि

Indira Gandhi National Centre for the Arts

सं॰प्रा॰ २

वैश्यतीयते॥ तथा॥ आक्रोशनताडनादिनिमित्तकमन्युत्पादनद्वारेण निमित्तिनोपि वधभागित्वं षड्विंशन्मते॥ आक्रोशि
तस्ताडितो वा धनैर्वा परिपीडितः॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं। अन्यायेन गृहीतस्वस्वार्थयन्न्यायदर्शनं॥ यमुद्दिश्य
त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं॥ ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव वा। यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं॥ इत्यादि
वचनबलवशाद्यथोक्तानामेव निषेधविधिविषयत्वं। यदि तु वचनं विना परंपराकारणस्यापि महापातकित्वं स्यात्॥ तदा कर्म
कर्तॄणां मद्यपानार्थं कपर्दकदानेन प्रयुक्तावपि मद्यपाने प्रयोजककर्तृत्वान्महापातकित्वप्रसंगः॥ तथा महापातकियाजनाध्य
यनपरिणयनप्रयुक्तावपि महापातकित्वेन तथाविधप्रायश्चित्तप्रसंगः। एवमसत्प्रतिग्राहिप्रयुक्तो धर्माधिकरणिकस्यापि प्रत्व
क॰ प्रयुक्तौ प्रतिग्राहित्वेन प्रायश्चित्तप्रसंगः। न चैवं सकलशिष्टाचारविरोधात्॥ साक्षात्कर्तृगोचरत्वेनैव निषेधोपपत्तेः परस्पराश्रय
णस्य वाप्याश्रयत्वात्॥ तेन सर्वेषां साक्षात्कर्तुरेव निषेधविषयत्वं वचनवशाद्वधगोचरत्वेन परंपराकर्तुरपि निवक्तव्यं॥ अत एव प्रा॰[illegible] २
यत्रोपकाराचरणेपि वधो निष्पद्यते तत्रापि वचनवशान्न वधभागित्वं। तथा च संवर्त्तः। औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च

तु२

दीयमाने विपत्तिः स्यात्स पापेन लिप्यत इति। तथा च याज्ञवल्क्यः। क्रियमाणोपकारे तु मृते विप्रे न पातकम्॥ इत्येवमादि। तेन यत्र ता
डनादि स्वोपकारं कुर्वन् कंठलग्नकादिना यदि विपद्यते तदापि स्वोपकारार्थमेव प्रवृत्तेः प्रमादतो मरणनिष्पत्तेर्नास्य वधभागि
त्वं। एवं पुत्रशिष्यभार्यादयो विनयाधानार्थं दंडे कृते यत्र क्रोधवशान्म्रियंते तत्रापि वचनादेव न दोषः। तथा च सविष्णुपुराणं।
पुत्रः शिष्यस्तथा भार्या शासितो यदि नश्यति। न स्यात्तत्र दोषेण लिप्यते देवसत्तम। एवं यत्र मनुष्ये हेतुत्वेन तु सादे[illegible] तया वै सन्न्यो
तनेन वा अन्येन वा प्रयुक्तो अन्यतो वा हेतोर्नाशादात्मानं व्यापादयति। तत्रोद्देश्यस्य यथोक्तनिमित्तानुत्पादान्न वधभागित्वं॥
किंतु हंतुरेव साक्षाद्वधभागित्वं तथा चोक्तं। असंबंधेन यः कश्चिद्द्विजः प्राणान्परित्यजेत्। तस्यैव तद्भवेत्पापं न तु यं परिकीर्त्तये
त्। तथा। यदि ब्राह्मणो ह्याततायी स्यात् निहतस्तत्र हत्यायामपि न दोषः। तथा च मनुः। आततायिनमायांतमपि वेदांतपारगं॥ जिघांसंतं
जिघांसीयान्न तेन ब्रह्महा भवेत्॥ गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं॥ आततायिनमायांतं हन्यादेवाविचारयन्॥ तथा च वि
ष्णुः। स्वाध्यायिनं कुले जातं यो हन्यादाततायिनं। न तेन ब्रह्महा स स्यान्मन्युस्तं मन्युमृच्छति। आततायिनश्चोक्ताः। न

Indira Gandhi National Centre for the Arts

ला.प्रा थायमनुः। अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः। तथा च मत्स्यपुराणं। उद्हन्ते चापहर्त्ता
रं तथापत्न्यभिगामिने॥ अग्निदं गरदं चैव तथा चासुद्यतायुधं। अभिचारं च कुर्वाणं राजगामिनं च पैशुने॥ एते हि कथिता लोके धर्म्म
३
ज्ञै रातततायिनः॥ तथा च वृहद्वसिष्ठः॥ उद्यतासिः [illegible]याधषीध नहन्तागरदश्च। अथर्वहंता तेजोघ्नः षडेते आततायिनः। अत्र स
र्व्वत्रैवोद्यतास्त्रादिपदसमभिव्याहारेण प्रवृत्तक्रिय एवाततायी। न त्वतीतक्रियो नाविक्रियो वा। अत्र यदि तोविपलायनादिना
प्रकारान्तरेणात्मसंरक्षणं कर्त्तुमशक्यते। तदैव परस्य दोषाभावो नान्यथा। इतरथा वचनस्य दृष्टार्थत्वसंभवे सत्यदृष्टार्थकत्वप्र
असंगात्। सर्वत्रात्मानं गोपायीतेत्यनेनात्मसंरक्षणस्य विहितत्वात्। तद्रक्षणमेव दृष्टप्रयोजनं तच्चेदन्यथापि संभवति तदा तत्रा
प्यदृष्टार्थ एव वधः स्यादिति॥ अत्र धनस्य हरणेन वधाभावे प्रयुक्ते तत्र गृहणं धनस्याहेन वहुतरधनप्रतिपादनार्थं तेन स्वल्पस्याप्यसना
द्धः स्वल्पस्यापि हर्त्तुर्धनस्य वहुतरस्यापहर्त्ता। यदपहारेण वर्त्तनोच्छेदः एव स भवति स आततायी तिद्वृष्टव्यं। राजगामिनि पैशुनं। य श्रीकृष्ण
दभिधाने सत्यवश्यमेव प्राणात्ययो भवति। तदभिधत्ते। तेजोघ्नश्चात्र मद्यपानदानेन ब्राह्मणतेजो विनाशको निर्दिष्टः। अन्यत्तु वोधमे ३

त्र
धेति॥ यत्तु केनाप्युक्तं। आततायिवधेन दोषोऽन्यत्र गोब्राह्मणादित्यनेन सुमन्तुवचनेन विरोध इति॥ तदपि स्वावच्छेदानाकलनादेव
तथा च सर्वत्रयमिदं। आततायिवधेनेत्येकं। दोषोऽन्यत्रेति द्वितीयं। गोब्राह्मणस्नातः प्रायश्चित्तं कुर्य्यादिति तृतीयं। तत्र ब्राह्मण
वधप्रायश्चित्तमुक्त्वा यस्तेः संवर्[illegible]यत्तस्याप्येवं प्रायश्चित्तमित्यतिव्याप्य सुमन्तुनोक्तमिदं तेनाततायिवधेनेत्येतत्स्वत्रं पूर्वो
ना४ क्तप्रायश्चित्तनिषेधकं। दोषोऽन्यत्रेति। आततायिव्यतिरिक्तवधे दोषप्रतिपादकं। गोब्राह्मणात्स्नातः प्रायश्चित्तं कुर्यादिति प्रा
यश्चित्ताङ्गस्नानप्रतिपादकं। गोहेतुकस्ना नं व्यासेनेवोक्तं तथा च व्यासः॥ अयं तु यानि तीर्थानि त्रिषु लोकेषु भूतले। अभिषेकः
समस्तेषां गवां शृंगोदकस्य च। ब्राह्मणशाहेनात्र विधिवाक्यमपेक्षितं। तद्धेतुकस्नाने यथा विहिताघमर्षणादिपूर्वकं। तेन गोहेतु
कं स्नानं ब्राह्मणहेतुकं स्नानं प्रायश्चित्ताधिकारी भवति। न त्वात्मवमात्रेणेति वाक्यार्थः। यदपि च विष्णुपुराणवचनं। हत्वानुप
हरंतं वै ब्राह्मणं वेदपारगं। कामतोपि चरेद्धीरो द्वादशाब्दं व्यसुत्तमं॥ तदपि नाततायिवधविषयं प्रहारत्वाद्वस्य वधानिधायक
त्वात्। तेनायमर्थः। यो हि चतुराद्यवयवानां प्रकर्षेण हरणं प्रवृत्तः तद्वधे कामतोपि द्वादशवार्षिकमेव प्रायश्चित्तमित्यर्थः॥ एवं य

Indira Gandhi National
Centre for the Arts

याविहितवाग्दंडधनदंडशारीरदंडादिप्रयोगानुसारेण हतेऽपि यदि कश्चित्क्रोधवशाद्गलपाशादिना म्रियते तत्रापि न दोषः
मन्यूत्पादकत्वेऽपि दंडानां विहितत्वात्॥ निषेधानवकाशेन दोषाभावात्। यतो न हिंस्यादित्यनेन साक्षात्परंपरया वा प्राणवियो-
गफलव्यापारकर्तृत्वं निषिध्यते। न च निमित्तिनो वाग्दंडादिनिमित्तानि स्ति व्यापारांतरकर्तृत्वमस्ति। यदेव हि मन्यूत्पादनद्वारा
परंपरया वधकारणं तदेव हि हितं। कथं तस्य निषेधविषयत्वमपीति वाच्यं। एतेनैतदुक्तं भवति। साक्षाद्वधप्रयुक्त्यनुग्राहा-
नुमतिनिमित्तरूपकारणतेदानं मंदरूपतः पंचविधो वधः तत्कारी वधकारी। तत्र नरांतरव्यापाराव्यहितप्राणवियोगफलाय
कर्मवेनाप्रत्रक्तिकृत्सद्यनेन साक्षाद्वधः॥ एतेनान्यदीयमारणार्थप्रयुक्तविषसहितमन्नं यदि कश्चिदन्य एव भक्षयित्वा म्रियते॥
तत्र न वधलाभिर्वा। विषनरूकव्यापारेणैव तद्रूपेण विषप्रयोक्तुः प्राणवियोगफलव्यापारस्याव्यवहितत्वात्। एवं व्या-
घ्रादिमारणार्थं यंत्रारोपणे प्रयोजनांतरहतवापीकूपादौ वा कश्चिदागत्य म्रियते। तत्रापि न दोषस्तत्र हननीयं। न चैवं सति यस्य
यत्नादौ प्रविष्टं दत्तं तन्मरणेऽपि तन्नरूकव्यापारव्यवधानाद्वधताभिर्नेति वाच्यं॥ तद्व्यापारस्य तद्रूपस्य विषदानात् श्रीकृष्ण
४

व्यापारनिमित्तत्वेनाव्यवधायकत्वात्॥ एवं निरूप्य विषं दीयते अनेन रूद्धलक्षणीयमिदमन्नादिकं तेनाहमत्र विषं प्रक्षिपा-
मीति तेन पश्चाद्भाविनोऽपि लक्षणस्यायत एव विषदाननिमित्तत्वेन बुद्धिस्थीकृतत्वात्॥ व्यवधायकत्वमिति साक्षाद्धथित्व-
मेवेति॥ प्रयोजकस्य द्विविधः। प्रवृत्तप्रवर्तकः अप्रवृत्तोत्साहजनकश्च। न वा प्रवृत्तप्रवर्तने प्रयोज्यस्य खड्गादिस्थानीयत्वात्प्रयोजकस्य सा-
क्षाद्धथत्वमेवेति वाच्यं॥ यतो न हि प्रयोज्यव्यापारमनपेक्ष्य खड्गोद्यमननिपातनवत्प्रयुक्तिमात्रेणैव प्राणवियोगो दृश्यते। किं न हि
सन्याममपि प्रयुक्तो प्रयोज्यगतखड्गादिनिपातानंतरमेव। न च विषतृसदानइवात्राप्ययतनएव प्रयोज्यव्यापारस्यापि प्रयोजकव्यापार-
निमित्तत्वेनाव्यवधायकत्वं। अप्रवृत्तप्रवर्तकत्वेन प्रयुक्तिवशादेव प्रयोज्यव्यापारसंभवात्। तेन व्यवधायकरूपांतरव्यापारापहि-
तत्वात्साक्षाद्धथत्वलक्षणाभावेन अप्रवृत्तप्रवर्तकस्यापि न साक्षाद्धथित्वं किंतु प्रयोजकत्वमेव॥ एवमर्थग्राहकोऽपि द्विविधः॥ वध्यं तेन गवे-
मनेच्छया पादनेन वानंदीयार्थं ग्राहकोऽन्तरमुदासेन वा। अनुमंता च भवति प्रवृत्तस्योन्मुखोऽपि हंता यदनुमतिव्यतिरेकेण प्र-
वायवं कथा न प्रवर्तते तदनुमतौ च प्रवर्तते। न चार्थप्रयोजकः। प्रवृत्तस्य तु प्रदेशाकत्वात्॥ नाप्यनुग्राहकः वर्तमानप्राणवियोगफ

Indira Gandhi National
Centre for the Arts

लप्रवृत्त्यननुकूलत्वात् ॥ किंतु मतिज्ञानमात्रेणोत्पद्यमानप्राणवियोगफलप्रवृत्त्यनुकूलत्वात् ॥ प्रयोजकानुग्राहकानां
तित्तत्र एवानुमन्तेति ॥ निमित्तीवयत्वकृतमनुष्यादेनप्राणत्यागश्चेत्तीनिधीयते ॥ तेन समविधोहैना कामाकामतश्चतुर्दशविधः ॥ ॥
इति वधस्वरूपनिरूपणम् ॥ ॥ इदानीं प्रायश्चित्तं निरूप्यते ॥ प्रायश्चित्तं च पत्रशृंगयाहिकतैयानश्रूयते । ननु सर्वत्र ब्रह्मवधादि
षु ज्ञानिनां शक्तिवयोपेक्षं सह्रहुद्धिलुत्तं तथा । अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेदिति विश्वामित्रवचनात् ॥ तथा देश
कालवयःशक्तिपापं चावेक्ष्य यत्नतः । प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिरिति याज्ञवल्क्यवचनात् ॥ प्रायश्चित्तं
कल्प्यमिष्यत्वा ॥ वधश्च द्विविधः कामतोऽकामतश्च ॥ तत्र सोकामतः सामान्यब्रह्मवधविशेषाश्रवणात् सर्वेषामेव वर्णानां मरणां
तिकं प्रायश्चित्तं ॥ यथाह याज्ञवल्क्यः ॥ लोमभ्यः स्वाहेत्येवं हि [illegible] लोमप्रभृति वै तनुं ॥ मज्जांतां जुहुयाद्वापि
मंत्रैरेभिर्यथाक्रममिति ॥ लोमभ्यः स्वाहा त्वचे स्वाहेत्यादिमंत्रैरेभिर्लोमत्वग्लोहितमांसमेदःस्नायुमज्जांतां तनुं हुत्वा श्रीः ल
कृत्य जुहुयात् ॥ एवं मृतः शुद्धिमवाप्नोति ॥ संग्रामे वा हतो लक्ष्यभूतः शुद्धिमवाप्नुयात् ॥ मृतकल्पः प्रहारार्त्तो जीवन्नपि वि ५

शुध्यतीति ॥ तथा च मनुः ॥ लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः । प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः ॥ तथा ॥
गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेत् ॥ मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति ॥ यद्यप्येषु वचनेषु कामकृतस्योप
दानं नास्ति । तथापि प्राणांतिकत्वेन कामविषयत्वमेव द्रष्टव्यं ॥ तथा च मध्यमांगिराः ॥ प्राणांतिकं तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः
तत्तु कामकृते प्रोक्तं विज्ञेयं नात्र संशय इति ॥ न च मनुवचनात् कामतो ब्राह्मणवधे प्रायश्चित्ताभाव इति वाच्यं । तथा च मनुः ॥ इयं विशु
द्धिरुदिता प्रमाप्याकामतो द्विजं । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इति । यतो द्वादशवार्षिकव्रतरूपप्रायश्चित्तमभिधाय म
नुना कामिदं ते नैव द्वादशवार्षिकव्रतरूपाया विशुद्धेस्तु अकामतः कामतो ब्रह्मवधे निष्कृतिर्न विधीयत इत्येवं गम्यते । नप्रा सवनी पो६
णांतिकापि न निष्कृतिरिति । यत्तु श्रीकरेण कामतो ब्राह्मणवधे प्राणांतिकं प्रायश्चित्तमस्त्येव तथापि ज्ञानकामनयोर्मुख्यत्वे प्राय
श्चित्तानामस्तु [illegible] कामनायाज्ञानाव्यतिचारात् । ब्रह्मवधविषया कामनाकामनाशब्देनाभिधीयते । ननु श्रुद्वादिव
धविषया । तद्विषयाकामना [illegible] जनयति । कामनाप्रवृत्त्योः समानविषयत्वात् [illegible] त्यागमादौ तावत्

न॰ आ॰
६

शूद्रादिवधकामनया प्रवृत्तस्य ब्रह्मवधो निषिध्यते तत्र विद्यमानापि कामना ब्रह्मवधगोचरत्वेनासक्तस्यैव । शूद्रज्ञानवस्त्रा
दिदानकामेन भ्रान्त्या ब्राह्मणगतवस्त्रादिदाने । तेन यथा ब्राह्मणगतदानत्वेपि न कामनाकृतब्राह्मणगतदानफलं अपि तु
ब्राह्मणत्वेन दानमात्रफलं तथात्रापि शूद्रादिवधकामनया भ्रान्त्यादिना ब्रह्मवधेन कामनाकृतब्रह्मवधफलं अपि तु ब्रह्मव
धफलमेवेति ब्रह्मवधकामनायां तु ज्ञानपूर्वकत्वात् कामनाया ज्ञानाव्यभिचारात् कामनया ब्रह्मवधे प्राणान्तिकं प्रायश्चित्तं
ज्ञानकामनास्थले प्रायश्चित्तावधारिवचनमनर्थकमेवेति । एवं कामनाव्यतिरेकेण ब्रह्मवधे प्राणान्तिकं यदुक्तं तदप्ययुक्तं
न हि ब्राह्मणज्ञानमात्रं ब्रह्मवधे कारणं । अपि तु ब्राह्मणवधप्रवृत्तिहेतु ब्राह्मणज्ञानात् स्वकामनाद्वारेणैव प्रवर्त्तकत्वात्
सर्वत्र ज्ञानकामनयोरव्यभिचार एव । ननु यत्र केश्चिदुक्तं बलात्कारेण कार्यप्रवृत्तौ ज्ञानमस्ति कामना नास्तीति तत्र प्रत्युक्तं ॥
यतो ज्ञानकामनयोः किं समुच्चयः प्रवर्त्तकत्वे हेतुः उत प्रत्येकमेवेति विविच्यतां । तथा च तस्य तु ज्ञानस्य सत्तोपि अप्रवृत्तिहेतुत्वात्
नाज्ञानतुल्यत्वमेवेति । नास्ति व्यभिचार इति । अनेनैवाभिप्रायेण ज्ञानान्ते देनोक्तं । म्लेच्छेनाधिगता शूद्रा अकामाद्धा कथंचन

राम
श्रा॰म
६

कृच्छ्रत्रयं प्रकुर्वीत ज्ञानेन द्विगुणं स्मृतं ॥ तथा याज्ञवल्क्येनोक्तं ॥ प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ॥ कामतो व्यवहार्यस्तु वचनादि
ह जायते इति । अत्र चाकामे कृच्छ्रत्रयं विधाय कामतो द्विगुणमेव कर्त्तव्यं ज्ञाता तत्येन द्विगुणमुक्तं । याज्ञवल्क्येनाप्यज्ञानतः प्रायश्चित्तेने
पापक्षयमभिधाय ज्ञानतो व्यवहार्यत्वं कर्त्तव्यत्कामतो व्यवहार्य इत्युक्तं तदपि ज्ञानकामनयोरव्यभिचारादनास्थेयैवेति मन्तव्यं ॥ अतो ज्ञा
नकामनयोरव्यभिचारात् सर्वत्रैव महापातके ज्ञानकामनयोः प्राणान्तिकमेव प्रायश्चित्तं न तु व्रतः प्रायश्चित्तावधारिति सिद्धं ॥ यत्तु कामतो
व्यवहार्यस्तु वचनादिह जायते इत्यनेन ज्ञानकृतपापस्य प्रायश्चित्तेनाप्यनियमस्तिया याज्ञवल्क्येनोक्तं । तत्र कामनया पापप्रवृत्तिनिं
दार्थमिव नाना वचनेषु मतः शुद्धिमवाप्नुयादित्यनेन पापक्षयरूपशुद्धिप्रतिपादनात् । अज्ञानतस्तु साक्षाद् ब्रह्मवधे द्वादशवार्षिकव्र
यदाह याज्ञवल्क्यः ॥ शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् । ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात् ॥ तथा च मनुः ॥ ब्रह्म
हा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् ॥ भैक्ष्याश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजमित्यादि ॥ अत्र च द्वादशवार्षिकव्रतचर्यवनवास
देशकालादिनिकर्त्तव्यतावाकुल्यात् [illegible] जापसेवोपवासत्रये परिहाय स्थानादिति कर्त्तव्यतावाकुल्यास्य वाच्य ॥ अविकित्सि [illegible]

Indira Gandhi National
Centre for the Arts

प्र० प्रा० रदर्शनाच्च ॥ यथोक्तद्वादशवार्षिकव्रतस्य द्वादशवार्षिकप्राजापत्यव्रततुल्यत्वमेव ॥ प्राजापत्यव्रतं च द्वादशाहसाध्यं । तथा च मनुः ।
७ त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितं ॥ त्र्यहं परं च नाश्नीयात्प्राजापत्यविधिः स्मृत इत्यनेन च द्वादशवर्षैः षष्ट्यधिकशतत्रयप्राजा
पत्यानि भवंति । प्राजापत्याशक्तौ च धेनुदानं विहितं । तथा च मार्कंडेयः ॥ प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीं । धेनोरभावे दातव्यं
तन्मूल्यं न संशयः ॥ तेन द्वादशवार्षिकव्रतोपदेशे षष्ट्यधिकशतत्रयं धेनवो भवंति ॥ अत्र च वधिबंचसमविधमुक्तं । तच्चाज्ञानतः
साक्षाद्ब्रह्मवधे यथोक्तं द्वादशवार्षिकं । इतरेषां तु यद्यपि शृंगग्राहिकया वचनं नास्ति तथापि योऽयमारंभनेतस्मिंश्च फलविशेष इत्या
पस्तंबवचनाच्च ॥ द्वादशवार्षिकस्य षाड्वार्षिकत्रैवार्षिकप्रायश्चित्तप्रतिपादकवचनदर्शनाच्च ॥ साक्षाद्ब्रह्मवधविषये द्वादशवार्षिकमेव ।
प्रायश्चित्तापकर्षकैर्वचोभिर्भवेस्यादित्युक्तत्वादिति न्यायेनाक्षमाक्षमतारतम्यवशेनैव प्रायश्चित्तव्यवस्था भवति । तेनापि प्रवर्तकस्य श्रीकल
प्रयोजकस्यानुग्राहकादित्वे स्मोत्कर्षत्वाद् क्षमताक्षमवशेन साक्षाद्द्वादशवार्षिकं वेमनस्यापादकानुग्राहकस्यापि किंचिन्न्यूनत्वा ७

न्नववार्षिकम् । प्रवृत्तोत्साहजनकस्य ततोपि न्यूनत्वान्नववार्षिकं । अनुग्राहकांतरस्योदासकस्यानुग्राहकस्य ततोपि न्यूनत्वात् षाड्वार्षिकं
अनुमंतुस्ततोपि न्यूनत्वात्सार्द्धचतुर्वार्षिकं । निमित्तिनस्तु ततोपि न्यूनत्वात्त्रैवार्षिकं ॥ तत्राप्ययं वाचनिको विशेषः । अर्थापहारताडनादि
संबंधव्यतिरेकेण केवलक्रोधमात्रेण यो म्रियेत तद्वधे वार्षिकं । अर्थापहारताडनादिसंबंधेन तस्मिंस्त्रैवार्षिकं । तथा च विष्णुपुराणोक्तं
निकेयडवाच ॥ यस्तु द्विजं हन्यात्स्वयमेव हि ॥ आत्मानं समहस्तात्क्रोधात्तस्य किं भवति प्रभो ॥ संबंधेन विना देव शुद्धवाद
नकोपितः ॥ अग्निरुवाच यस्ते विप्र विषादिति निर्गुणादपि ॥ ईश्वर उवाच ॥ केशश्मश्रुनखादीनां कृत्वा निर्वर्तनं गुह ॥ ब्रह्मचर्यं चरन्वि
प्रो वर्षमेकेन शुध्यति ॥ संबंधेन यदा विप्रो हत्वात्मानं मृतो गुह ॥ निर्गुणः सहसा क्रोधाद्गृहक्षेत्रादिकं प्रति ॥ त्रैवार्षिकं व्रतं कुर्या
द्ब्रह्मचर्यं चरन्निति ॥ एतेन यदंगिरसोक्तं । षड्भिर्वर्षैर्ब्रह्मचारी ब्रह्महा शुध्यते नरः ॥ तथा महापातकसंयुक्तो वर्षैः शुध्यति तैस्त्रि
भिरिति । तदपि यथोक्तविषयमेव द्रष्टव्यं ॥ एतच्च मूलस्य द्वादशवार्षिकप्रायश्चित्तस्याज्ञाननिबंधनत्वाद् क्षमतागहानिप्रवे
शया प्रायश्चित्तं प्रयोजकादीनामप्यज्ञानत एव द्रष्टव्यं ॥ प्रायश्चित्तमकामानां कामात्प्राप्नोति मानवः । विहितं यदकामानां

स. प्रा.
८

कामान्न द्विगुणं स्मृतमित्यंगिरसवचनात् ज्ञानकामनयोश्च व्यतिचारात् ज्ञाने द्विगुणमेव। एतेन प्रयोजकादीनामपि प्रयोज
कादयः षड्ङ्ग तेषामपि प्रयोजकादिमूलत्वं तत्प्रायश्चित्तं लाघवगौरव लागहानिव्यवस्थया प्रायश्चित्तमूहनीयमिति॥ एतच्च ब्राह्मणमात्र
वधविषयं॥ पितृमातृसोदरभ्रातृगुरुश्रोत्रियाहिताग्नीनां वधमज्ञानतः प्रत्येकं वधे द्वादशवार्षिकव्रतं॥ ज्ञानानिवृत्तिनिव्य
किंतु यावज्जीवमेवव्रतमाचरणीयं॥ तथा च विष्णुपुराणं॥ मातरं पितरं हत्वा सोदरं भ्रातरं तथा॥ गुरुं हत्वा श्रोत्रियं च आहिताग्निं तथा
पिवा॥ अंतिमाद्यावद्वुद्ध्यासाद्भुतेनीर्वा विशुध्यतीति॥ अत्र धेनुसंकलना यावज्जीवनकाले स्यात्॥ यतश्चाद्विशाब्धिकं शतं परमा पुरे
वयात्यं। तेन द्वादशवार्षिके कृत्वा वधकालादूर्ध्वं त्रिंशत्यधिक त्रातस्य यावदवशिष्टतावत्परिमाणेन द्वादशवार्षिकरूपो व्रतानु
पाधेन वा दातव्याः॥ यत्तु याज्ञवल्क्येनोक्तं॥ द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेत्॥ द्वितीयं त्वाहिताग्नेः पदे नैव यजमानस्योप श्रीराम
२ दानात्सवस्थोऽग्निर्द्विगुणमेव पेदं द्वे सं॥ यत्तु शंखलिखितवचनं सर्ववादिति। सर्वं चतुर्थवर्णेषु प्रमाप्य द्वादशवत्सरान् षट्त्रीन्वत्सा ८
दूं संवत्सरं व्रतान्यादिशेत्॥ तेषामंते गोसहस्रं ततोऽर्धं तस्यार्धमर्धं च दद्यात्सर्वेषामनुपूर्वेणेति। तत्र यथाक्रमं चातुर्वर्ण्ये पुत्रापि

हूयं

त्वविषयं॥ मातुलविषये चतुर्थवर्णेऽपीति॥ हंतव्यानिर्दिष्टाः॥ सर्वेषामनुपूर्वेणेति पुनरुपादानसामर्थ्यादिदं त्वनिर्दिष्टाः॥ तेनायमर्थो लब्ध
ति॥ ब्राह्मणः पुत्रं पितृव्यं मातुलं च हत्वा द्वादशवार्षिकांते गोसहस्रं दद्यात्॥ क्षत्रियस्तु षाड्वार्षिकांते गवां पंचशतानि दद्यात्॥ वैश्यस्तु
त्रैवार्षिकांते सार्द्धशतद्वयं गवां दद्यात्॥ शूद्रः सार्द्धवार्षिकांते सपादशतं गवां दद्यात्॥ यत्तु मध्यमांगिरसोक्तं गवां सहस्रं विधिवत्पात्रे
भ्यः प्रतिपादयेत्॥ ब्रह्महा विशुध्येत सर्वपापेभ्य एव वेति॥ तत्पितृव्यपुत्रादिसपिंडविषयमात्मबंधुविषयं च। आत्मबंधवश्चोक्ताः॥
आत्ममातृष्वसुः पुत्राः आत्मपितृष्वसुः सुताः॥ आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः॥ इति॥ एतेन यथायथा संबंधोत्कर्षेऽपि व
त्तितथातथाल्पत्वस्य दिकादधिकं प्रायश्चित्तमूहनीयमिति॥ एतच्च सर्वमज्ञानतः साक्षाद्वधे प्रयोजकादीनां तु सर्वत्रापि यथो
वृत्तलाघवहानिर्द्रष्टव्या॥ ज्ञानतस्तु द्विगुणमिति। जातिमात्रपतितब्राह्मणवधे तु कामतोपि न मरणांतिकं किंतु द्वादशवार्षिकमेव।
तथा च भविष्यपुराणे। जातिमात्रं हत्वा विप्रं कामतो यद्वे बुद्धिपूर्व चरेद्द्वादशवर्षाणि कृत्वा शवशिरोध्वजमिति। अज्ञानतस्तु तदर्धं
मिति॥ इदानीं वधप्रसंगस्य वधानुत्पादे प्रायश्चित्तं निरूप्यते। तत्राह गौतमः॥ प्रयुक्तो ब्राह्मणवधे हत्वापीति॥ इदं च प्रसक्त वध

Indira Gandhi National Centre for the Arts

स॰ प्रा॰
९

हत्वो ब्रह्मवधप्रायश्चित्तातिदेशकं वचनं तत्रापि निमित्तवधप्रायश्चित्तस्याल्पत्वात्तदतिदेशकमेव। तेन यदि ब्राह्मणमरणाभिसं
धानं हिंसनघातादिना विद्धो ब्राह्मणः कदाचिज्जीवति तदा निमित्तवधोक्तं त्रैवार्षिकम्। अथ ब्राह्मणमरणाभिसंधानं हिंसनका
ण्डादिना न दैववशाद्विद्धो सोऽतदा लघुत्वात्पोत्यश्चार्त तेन तस्मिन्नफलविशेषश्रुतिवचनेनानुसारान्निमित्तवधोक्तं वार्षिकमेव
प्रायश्चित्तं। अज्ञानतस्त्वर्द्धम्। यत्तु पुनर्वचनं द्वादशरात्रमुपवसेदिति तद्वार्यमाणसमाप्तप्रवृत्तिविषयमिति द्रष्टव्यम्। अत्र च
धेनुसंकलनायां द्वादशोपवासेन धेनुद्वयं। द्वादशाहजलाहारेण षडुपवाससंकलनया एका धेनुरिति मिलित्वा धेनुत्रयं॥ यदि
तु वधाभिसंधानं विनाऽपमानहेतुताडनाद्यर्थमुद्यमं करोति तदा प्राजापत्यं। अथ वेदनाहेतुलगुडादिपातमात्रं करोति तदाति
कृच्छ्रं। अथ तत्रैव रक्तदर्शनं तदा कृच्छ्रातिकृच्छ्रं। तथा च मनुः॥ अवगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने॥ कृच्छ्रातिकृच्छ्रौ कुर्वीत विप्रस्यो
त्पाद्य शोणितं॥ कृच्छ्रं प्राजापत्यं तत्रैका धेनुः। अतिकृच्छ्रे धेनुद्वयं। कृच्छ्रातिकृच्छ्रे धेनुचतुष्टयं। यत्तु पाराशरवचने चरेद्व्रतमह श्रीहल ९
तापि ज्ञातार्थेव समाहितः॥ इति तद्वधोद्यमकार्ययाऽस्मै विषयमेव। अत एव क्रोधवशाद्वधार्थमलाभिप्रवेशोऽनमानेन

लपाद्यो विषभक्षणं देवकुलादिस्थः प्रपतनं शस्त्रेणोदरादिहननं कृत्वैवं दैवाज्जीवति तथापि स्पष्टं ब्राह्मणवधेऽहत्वापीत्यनेना
न्यायेन त्रैवार्षिकं प्रायश्चित्तं। यदि तु जलाग्निप्रवेशानशनपाशादिना मरणोद्यतस्यापि केनापि प्रतिबंधकेन जलाग्निप्रवेशादिकं
न निष्पन्नं तदा तत्र प्रायश्चित्तमाह यमः॥ जलाद्युद्बंधनभ्रष्टाः प्रव्रज्यानाशकच्युताः। विषप्रपतनप्रायः शस्त्रघातहताश्च ये॥ नवै
ते प्रत्यवसिताः सर्व एव बहिःकृताः। चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वेति॥ अत्र निरुपपदचान्द्रायणशब्दयोगाद्यमिष्टेनोक्तं भवा
न्द्रायणं ग्राह्यं। तदशक्तौ वा चान्द्रायणमकुर्वाणः कृच्छ्रं तप्तकृच्छ्रद्वयमित्यर्थः। तद्विषयत्वेन चाधेनुचतुष्टयं तप्तकृच्छ्रे वा अविषयो
श्चान्मन्त्रोपदेशं॥ न स्पृष्टं वर्तिन्या जलक्षीरघृताशिनाम्॥ प्रतिग्रहं पिबेदुष्णान्समहत्कायी समाहित इति। अत्र धेनुद्वयं इति
नात्र तप्तकृच्छ्रं चान्द्रायणाभ्यां महोदधेः न बोधनवदनीति॥ इति ब्राह्मणस्य ब्रह्मवधप्रायश्चित्तनिरूपणम्॥ अथ क्षत्रियादीनां ब्रह्म
वधप्रायश्चित्तं निरूप्यते॥ तत्र क्षत्रियादीनां ब्राह्मणतः साक्षाद्ब्रह्मवधे विशेषश्रवणान्ब्राह्मणीकमेव। इतरत्र तु यद्ब्राह्मणस्य
ब्रह्मवधे प्रायश्चित्तं तत्क्षत्रियवैश्यशूद्राणां यथाक्रमं द्विगुणं त्रिगुणं चतुर्गुणमिति विज्ञेयं॥ ननु विप्रे तु सकलं देयं पादोनं क्षत्रि

Indira Gandhi National Centre for the Arts

स॰प्रा॰
२०

यस्मृतं वैश्ये द्विपादत्रयं शूद्रे इत्याति शुद्धास्यत इति वृद्धहारीतवचनात्॥ क्षत्रियवैश्यशूद्राणां पादपादहानिर्वा विनाकार्यं द्वैगुण्यं
त्रैगुण्यं वानुगुण्यमिति॥ मेवम्॥ साधारणोपदेशस्यास्य ब्रह्मवधविषयविशेषवचनेन बाधितत्वात्। तथा च ब्रह्मवधप्रायश्चित्त
प्रकरणे अंगिरसोक्तं। परिषच्छूद्रहन्तॄणां या मारात्री द्विगुणा स्मृता। वैश्यानां त्रिगुणा प्रोक्ता शूद्राणां तु चतुर्गुणा॥ पर्षद्यद्ब्रवीत्पातकं तु
द्रव्येपापकर्मणामिति॥ अस्यार्थः॥ यावद्ब्राह्मणो ब्राह्मणस्य पर्षत्कल्पिते तद्द्विगुणं क्षत्रियैः क्षत्रियस्य त्रिगुणं वैश्यैर्वैश्यस्य चतुर्गुणं
शूद्रैः शूद्रस्य॥ पर्षद्यत्पापकं त्वयेहेनुक्तमुक्तं। तेन क्षत्रियवैश्यशूद्राणां ब्रह्मवधे द्वैगुण्यं त्रैगुण्यं चातुर्गुण्यमिति॥ तथा च तद्विष्णुपुरा
णम्॥ अधमानां तु वर्णानां मुक्त्वाष्टहननेगृहीतो गुरुतरो ज्ञेयः न्तरादीनां न संशय इति। किंच। यत्र यत्र क्षत्रियादि लिङ्गः शूद्र
वैश्य क्षत्रिये ब्राह्मणे किंतु वादेक्ष्ने यथाक्रमं चतुर्गुणं त्रिगुणं द्विगुणं दण्डानुशासनं उक्तं न च ब्रह्मवधब्राह्मणप्रायश्चि
त्तात् क्षत्रियादीनां प्रायश्चित्तस्य पादपादहानिमिति लिङ्गं दत्तम्। चित्यप्रामाणं तथा च याज्ञवल्क्यः। प्रातिलोम्यापवादेषु द्विगुणा त्रिगु श्रीहरि
णा दमाः॥ वर्णानामानुलोम्येन तस्मादर्द्धार्द्धहानितः इति॥ तेन यथोक्तमेव क्षत्रियादीनां प्रायश्चित्तमिति॥ अत्र च सर्वत्रैव च १०

यो वस्त्रावज्ञेनापि प्रायश्चित्तद्वाद्धस्यः। तदुक्तं। अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो व्याधित
एव चेति। अत्रैकादशवर्षादूर्ध्वं षोडशवर्षपर्यन्तं बालेद्रष्टव्यः॥ यत्तु वृद्धहारीतोक्तं। स्त्रीणामर्द्धं प्रदातव्यं वृद्धानां रोगिणां तथा॥ पा
दो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति। तत्पादप्रायश्चित्तं पञ्चवर्षादूर्ध्वं एकादशवर्षपर्यन्तं जातिशास्त्रिगुणापेक्षं सहरुद्धेनैव तं ति
नयेति वचनानुसारेण योजनीयमिति॥ तथा तस्यैव वस्तु असामर्थ्ये तदीयभ्रात्रादिः पितदर्थं प्रायश्चित्तानुष्ठानोपदेशात्॥ प
ञ्चवर्षान्यूनस्य प्रायश्चित्तानावरव। तदुक्तं। ऊनैकादशवर्षस्य पञ्चवर्षाधिकस्य तु। प्रायश्चित्तं चरेद्भ्राता पिता वान्यः सुहृज्जनः॥ त
तोन्यूनतरस्यास्य नापराधो न पातकं॥ न चास्य राजदण्डोस्ति प्रायश्चित्तं न विद्यत इति॥ ॥इदानीमनेकब्रह्मवधे कियत्प्रायश्चि
त्तानुष्ठानमथ सकृद्वेति निरूप्यते॥ ॥तत्रावृत्तमेव प्रायश्चित्तानुष्ठानमित्युचितं। तथा च देवलवचनं। यद्यन्यादनतिसंधाय पापं क
र्म सकृत्कृतं॥ तस्येयं निष्कृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः॥ विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत्॥ तृतीये त्रिगु
णं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति॥ गौतमोप्याह। एनसि लघुनि लघूनि गुरुणि गुरूणि। तेन ब्रह्मवधसंख्यापरिमितान्यव्रा

यश्चित्तान्यनुष्ठेयानि॥ तदप्युक्तं॥ तुल्यरूपाणां बहूनां तन्त्रेण प्रायश्चित्तानुष्ठानादेव सकलपापक्षयसिद्धेः। पुनरनुष्ठान
वैयर्थ्यात्। नन्वेकप्रयोगविधिपरिगृहीतानां तन्त्रेणानुष्ठानं न त्विति यथा प्रयाजादीनामाग्नेयादित्रितयोपकारकाणां तन्त्रेणानुष्ठा
नं। न चेहानेकतुल्यरूपप्रायश्चित्तानामेकप्रयोगविध्युपसंग्रहोऽस्तीति कथं तन्त्रत्वं। मैवं। नह्येकप्रयोगविध्युपसंग्रहः तन्त्रत्वे का
रणं। किं तर्हि समानदेशकालकर्तृत्वे नागृह्यमाणविशेषत्वं। तच्चाङ्गानां तन्त्रत्वे एकप्रयोगविध्युपसंग्रहादेव॥ प्रायश्चित्तानां तु प्रधा
नानां समानरूपाणां समानदेशकालकर्तृत्वे नागृह्यमाणविशेषत्वस्य स्वतावादेवोपस्थितत्वात्। किमिति तन्त्रानुष्ठानेन न भ
वितव्यं। नन्वेकप्रधानानुष्ठानस्य युगपदनेकफलत्वं योगसिद्ध्यधिकरणविरुद्धं तथैव च कथमेकप्रायश्चित्तानुष्ठानस्य युगपदने
कपापक्षयफलत्वं भविष्यतीति। मैवं। योगसिद्ध्यधिकरणसिद्धान्तापरिज्ञानात्॥ यत्र हि पृथगनुष्ठानसाध्यान्येव फलानि ए
कस्मैवा कामायाध्यक्षकानवइति संकीर्त्य सर्वेभ्यो दर्शपूर्णमासाविति प्रयोगविधानात् तत्रैव एकस्य पृथगनुष्ठानसाध्यत्वं इ
ह तु तथात्वे तत्पृथगनुष्ठानसाध्यत्वप्रतिपादकत्वात्। अनेकफलानां च तन्त्रेणादर्शाहरान्याये नैककामनाविषयत्वं भंतत्वात्तं च तत्वमे श्रीकृष्ण
११

वेति। न चैवमनेकप्रयोगसाध्यानां षष्टिवर्षोद्धुपभोग्यमजातीयानेकफलानामेकस्मादेव तन्त्रानुष्ठितज्योतिष्टोमादिप्रयोगादेक
फल देवसकलं निष्पत्तिसंभवात् पुनरनुष्ठानेन स्यात् इति कर्मण्यपार्थेनाधिकरणसिद्धान्तबाध इति वाच्यं। यतो न वेदवयं यदि षष्ट्यादिसंख्या
वच्छिन्नफलश्रुतिविरोधेन न वेत्ता तथाहि। यद्येकस्मिन् प्रयोगे षष्टिवर्षभोग्यान्यनेकानि फलानि लभेयुस्तदा षष्टिवर्षभोग्यफ
लश्रुतिरेव न स्यात्। अयमेव तु ते नाभ्यस्यते प्रयोगे तदा देव फलं तेद सिद्धिरिति। यत्तु देवलवचनं विधेः प्राथमिकादस्मादिति न त
दावृत्तानुष्ठानप्रतिपादनार्थं किंतु द्विगुणत्रिगुणप्रायश्चित्तानिधानद्वारेण परापरपापहेत्वनुष्ठानानामधिकाधिकपापजन
कतया निन्दार्थमेव। तथा चोक्तं। चतुर्थे नास्ति निष्कृतिरिति। न च परमार्थेन चतुर्थे नास्ति निष्कृतिः महापातकिनां सहयाजनादिसं
सर्गेण संवत्सरपर्यन्तानुष्ठानादेव पिह्वादग्र वार्षिकस्य वक्ष्यमाणत्वात्। कामतोपि ब्रह्मवधे प्राणान्तिकाया निष्कृतेरुक्तत्वात्॥ अ
तो नायं विधिः किंतु निन्दार्थवाद एवायं। यत्र त्वेकस्मिन्नेव विषये लघुगुरुगुरुतरप्रायश्चित्तामनानं तत्र लघुगुरुगुरुतरप्रायश्चित्तं स
कारल्यासाध्यनात्यासमविषयमेव इष्टम्। यत्र त्वेकस्मिन्नेव चण्डालाभ्यन्तक्षे जैमिनिमध्यमां गिरः स्वल्पयमेर्यथाकमंवोद्वायणानस

Indira Gandhi National
Centre for the Arts

स॰प्रा॰ कृच्छ्रसहितं चान्द्रायणं चान्द्रायणद्वयं वा विहितं तन्महदत्यासात्यंतात्यासविषयं द्रष्टव्यं। एतच्च सुरापानविषयमेव वक्ष्यामः।
१२ तदभिप्रायेण दं गौतमेनोक्तं। एतमिक्षुरूपाणि गुरूणि लघूनि लघूनि। यत्र तु विजातीयान्येव समानप्रायश्चित्तानि पापानि तत्र
विधेः प्रायश्चित्तकादभ्यादित्यस्य वचनस्य सजातीयापत्तित्वे नानवकाशत्वात्संबंधनिरपवादमेव। यथा शौण्डिकचर्मकारपा
खंडस्पर्शे सकृदाचमनं। एवं तुल्यरूपपापेषु विजातीयेषु सजातीयेषु वा महापापेषु द्वादशवार्षिकादिप्रायश्चित्तेष्व
न्यपापानां पशुपुरोडाशन्यायेन प्रसंगादेव कार्यसिद्धेः नैषां पृथक्प्रायश्चित्तानुष्ठानमिति॥ ॥इति स्त्रियादिकृतब्रह्मव
धप्रायश्चित्तं॥ ॥इदानीं क्षत्रियादिवधप्रायश्चित्तं निरूप्यते॥ तत्र यादृशो ब्रह्मवधे ब्राह्मणस्य यादृशं प्रायश्चित्तं तच्चतुर्थो भागः
क्षत्रियवधे अष्टमो भागः। वृत्तस्थे वैश्यवधे षोडशो भागः। वृत्तस्थे शूद्रवधे। तथा च मनुः। तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृ श्रीकृष्ण
तः। वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः॥ अत्र वृत्तस्थपदस्य समानविलक्षणत्वाद्वैश्यशूद्रसंबंध एव न तु मध्यमांतेनाभि १२
यसंबंधः। वृत्तं वेदगुरुशास्त्रानुशासनं शौचसत्येन्द्रियसंयमः। प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते। अवृत्तस्थशूद्रमात्रवधे तु ष

ण्मासिकं। तथा च कात्यायनः। वर्षत्रयं तु राजन्ये वैश्ये मेकं तु वत्सरं॥ हत्वा शूद्रं तु षण्मासान् एतदेव व्रतमाचरेत्। यत्तु गौतमेनोक्तं। शूद्र
वधे कृच्छ्राब्दं गोदशदानं च ब्राह्मणजातशूद्रवधविषयं। यत्तु शूद्रजातीयषण्मासान् गोमूत्रयावकाहारो मासद्वयं इति तन्नवतीत्यापस्तंबेनोक्तं गो
प्रदानाधिकषण्मासव्रतमुक्तं तत्क्षत्रियजातशूद्रवधविषयं। यत्तु काश्यपवचनं। शूद्रे सांतपनं तिलधेनुं च तद्वैश्यजातशूद्रवि
षयं। तिलधेनुश्चात्र केवलतिलमयी वैव द्रष्टव्या। गुडधेनुवद्दिवशाधेनुदानात्तन्निविष्टा। सांतपनं च याज्ञवल्क्येनोक्तं। कुशोदकं
च गोक्षीरं दधि मूत्रं शकृद्घृतं। जग्ध्वा परेऽह्न्युपवसेत्कृच्छ्रं सांतपनं स्मृतं। अस्यार्थः। कुशोदकमध्यक्षीरदधिघृतमूत्रगोमयान्येकीकृ
त्य एकस्मिन्नहनि पीत्वा अपरस्मिन्नहनि उपवासः एवं द्व्यहसाध्यं सांतपनं। यच्च संवर्तेनोक्तं। निपात्य क्षत्रियं मोहात्त्रिभिः कृ
च्छ्रैर्विशुध्यति। वैश्यहत्यां तु संप्राप्य कथंचिद्वै कमोहितः। कृच्छ्रातिकृच्छ्रौ कुर्वीत मनरो वैश्यघातकः। मोहाच्छूद्रवधं प्राप्य तप्तकृच्छ्रं
समाचरेत्। तज्जातिमात्रहीनक्षत्रियवैश्यशूद्रवधविषयं। अत्र कृच्छ्रैरित्यादिबहुवचनोपादानादेव कृच्छ्रत्रये सिद्धे त्रिभिरिति
पदोपादानं क्षत्रियवधे त्रिगुणप्राजापत्यप्रतिपादनार्थं। कृच्छ्रातिकृच्छ्रश्च याज्ञवल्क्येनोक्तः। कृच्छ्रातिकृच्छ्रः पयसा दिवसानेक

Indira Gandhi National Centre for the Arts

न.प्रा.
१३

विंशतिं॥ पयः पानीयं अन्नं तः कृच्छ्रातिकृच्छ्र इति गौतमवचनात्। न समक्षं तु मन्त्रं ग्राह्यं। न समक्षं तु वर्णद्विशोडशलक्षणोक्तानि
लान्॥ प्रतिग्रहं पि वेदविद्भ्यः सर्वस्वार्थी समाहितः। अत्र धेनुसंकलनेन यावद्धेनुद्वयं। एतत्तु सर्वमकामतः क्षत्रियादिवधविषयं।
कामतो ब्रह्मवधप्रायश्चित्तात्तावत्तदीयतुरीयत्वाद्यसंभवात् कामतः क्षत्रियादिवधे विहितं यदकामात् कामात्तु द्विगुणं स्मृ
तमिति। द्विगुणमेव प्रायश्चित्तं तथा च बृहद्धारीतः। षट् संवत्सराणि राजन्ये त्रीणि वैश्ये सार्द्धं शूद्र इति। यत्तु वसिष्ठेनोक्तं। राजन्यं हत्वा
ष्टौ वर्षाणि ब्रह्मचर्यं चरेत् षड् वैश्यं त्रीणि शूद्रमिति। यच्च गौतमेनोक्तं। राजन्ये षाड्वार्षिकं ऋषभैकादशाश्च गा दद्यात् वैश्ये त्रैवार्षिकं ऋ
षभैकादशाश्च गा दद्यात् शूद्रे सार्द्धं वत्सरं ऋषभैकादशाश्च गा दद्यात्। इत्येवमादीनि नानामुनिवचनानि नानावधप्रायश्चित्ता
क्षप्रतिपादकानि तानि निर्गुणब्राह्मणजातमात्रक्षत्रियाद्यागस्थषडंगवेदाध्ययनादिगुणयुक्तक्षत्रियादिवधविषयाणि यथायोगं व्या
ख्येयानि इदानीं तथाविधक्षत्रियाद्यभावेन व्यवहारानंगत्वात्। प्रत्येकं विषयव्यवस्थया व्याख्येयानीति॥ सर्वं चेदं ब्राह्मण
स्य क्षत्रियादिवधविषयप्रायश्चित्तमुक्तं क्षत्रियस्य तु क्षत्रियवैश्यशूद्रवधे ब्राह्मणस्य यत्क्षत्रियादिवधे प्रायश्चित्तं तत्पादो

श्रीराम
१३

नं। एवं वैश्यस्य क्षत्रियवैश्यशूद्रवधे ब्राह्मणस्य क्षत्रियादिवधे यत्प्रायश्चित्तमुक्तं तदर्द्धं। एवं शूद्रस्य क्षत्रियवैश्यशूद्रवधे ब्राह्म
णस्य क्षत्रियादिवधे यत्प्रायश्चित्तं तदीयचतुर्थभागः प्रायश्चित्तं साधारणं बृहद्विष्णुवचनाद् बोद्धव्यं। तथा च बृहद्विष्णुः। विप्रे तु स
कलं देयं पादोनं क्षत्रिये मतं। वैश्येऽर्द्धं पादमेकं तु शूद्रजातिषु शस्यते इति। नन्वधमानां सुवर्णानामुत्कृष्टहनने गुरुः। दो
षो गुरुतरो ज्ञेयः स्वाम्यादीनां न संशय इति विष्णुपुराणवचनात् प्रातिलोम्यवधे द्विगुणमिति वाच्यं। ब्रह्मवधप्रकरणपठितत्वेन
उत्कृष्टशब्दस्य ब्राह्मणवचनत्वात् पात्रेनादिविधायकस्य नानामुनिभिरनेकस्थानपठितत्वेन साधारणत्वादिति। सर्वं चैतत्
साक्षाद्वधविषयं। प्रयोजकादिषु तु पूर्ववदुक्तमसांगहानिव्यवस्थया प्रायश्चित्तमूहनीयमिति। अत्रापि स्त्रीवृद्धरोग्यूनषोड
शवर्षीयबालानामर्द्धं प्रायश्चित्तं पंचवर्षादूर्ध्वमेकादशवर्षपर्यंतं पादमात्रं द्रष्टव्यमिति॥ ॥इति क्षत्रियादिवधप्रायश्चित्तम्॥ ॥इदा
नीं स्त्रीवधप्रायश्चित्तं निरूप्यते॥ तत्र याज्ञवल्क्यः। स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकमिति। अत्र यद्यपि प्रमाणांतरप्रा
प्तब्राह्मणहननानुवादेनोद्देश्यस्य लिंगमविवक्षितमिति ब्राह्मणीवधस्यापि महापातकत्वं न्यायतः प्राप्नोति तथापि श्रु

Indira Gandhi National
Centre for the Arts

द्वादित्यः पृथक्त्वश्रीशब्दोपादानाद्ब्राह्मणीवधस्यवचनादेवोपपातकत्वमिति। तत्रप्रायश्चित्तमाहवसिष्ठः। आत्मणींचात्रेयींहत्वाभ्रू॰
णहत्यावत्प्रायश्चित्तमिति। इहैणत्वाब्राह्मणहत्यायथोक्तं तेनैवब्राह्मणंहत्वाभ्रूणहाभवतीति। अज्ञातेचगर्भमिति। अत्रस्त्रीवधस्य
महापातकगणनाभावात्। महापातकत्वाभावेनमरणान्तिकस्यातिदेशायोग्यत्वात्। कामतोपिस्त्रीवधेप्रथमोक्तस्यद्वादशवार्षिकस्यैव
यमतिदेशः। आत्रेयीवरज्ञोयोगान्प्रवृत्तिषोडशदिनपर्यंतंतयावसिष्ठः। रजस्वलामृतुस्नातामात्रेयीमाहुस्तयोर्दशाहानि। अस्या
र्थः। यथारजस्वलात्रेयीतथाऋतुस्नातापितयोर्दशदिनपर्यंतमात्रेयीतेनषोडशदिनपर्यंतमात्रेयी। एतेनक्षत्रियावैश्याशूद्राणा
मप्यात्रेयीणांवधेयथाक्रमंक्षत्रियादिपुरुषवधप्रायश्चित्तमेवद्रष्टव्यं। तथाचयाज्ञवल्क्यः। यागस्थक्षत्रविट्घातीचरेद्ब्रह्महणोव्र
तं। गर्भहाचयथावर्णंतथात्रेयीनिषूदनइति। तथाचमनुः। हत्वागर्भमविज्ञातमेतदेवव्रतंचरेत्। राजन्यवैश्यावेजानावात्रेयीमेवचस्त्रि
यमिति। अत्रहत्वागर्भमित्येतावतैवोपपन्नेयदविज्ञातपदंतेनपुंस्त्रीरूपगर्भवधेकामतोपिद्वादशवार्षिकमेवेत्यभिमतं। यदितुकेना
प्यवाप्तिवाहिणालिंगेनपुंस्त्वेनविज्ञातोभवतिपश्चादपिसंवदतितदामरणान्तिकमेव। अथयजनेविज्ञातोभवतितदावक्ष्यमाणस्त्री



वधोक्तमेवप्रायश्चित्तमिति। तेनयथोक्तकामतोयथाविधुत्पन्नाज्ञातब्राह्मणीगर्भवधेपिब्राह्मणवधप्रायश्चित्तंद्वादशवार्षिकमेव। ए
वंक्षत्रियागर्भवधेक्षत्रियवधोक्तंत्रैवार्षिकमेव। वैश्यागर्भवधेवार्षिकंवैश्यवधोक्तमेव। शूद्रागर्भवधेतुशूद्रवधोक्तंषाण्मासिकमेवप्रा
यश्चित्तमितिद्रष्टव्यं। तथाआहिताग्निब्राह्मणस्ययासर्वाकारेणनिंद्यापत्नीतद्वधेपिज्ञानतोद्वादशवार्षिकमेव। तथाचांगिराः। आ
हिताग्नेर्द्विजातेश्चहत्वापत्नीमनिंदितां। ब्रह्महत्याव्रतंकुर्यादात्रेयीघ्नस्तथैवच। तथान्यनगुणोपियायगिव्याम्रियमाणाधर्मपत्नी
तद्वधेपिज्ञानतोद्वादशवार्षिकमेव। तथाचपराशरः। सवर्णस्थांस्त्रियंहत्वाचरेद्ब्रह्महणोव्रतमिति। एवमाहिताग्नेःक्षत्रिय
वैश्ययोःसर्वाकारेणानिंदितापत्नीत्वन्यगुणोपियायोगिव्याम्रियमाणातद्वधेपियथाक्रमंक्षत्रियवैश्यवधोक्तप्रायश्चित्तमूहनीयं। ए
तेनसपत्नीमातृदुहितृभगिनीस्नुषास्वपत्नीनामन्योपिसंबंधसन्निकर्षविशेषेणाहिताग्निपत्नीवदन्यहितवासास्तासांब्राह्मणतस्त
द्वधेद्वादशवार्षिकमेव। एवंसापत्नभगिनीपितृष्वस्तमातृष्वस्तमातुलानीपितृष्वस्तायीभ्रातृस्तायीणांविप्रकृष्टत्वान्नतोन्यूनवा
र्षिकमेव। ततोपिविप्रकृष्टसंबंधस्त्रीणांसपिंडसमोत्रस्त्रीणांचवधेसंबंधसन्निकर्षविप्रकर्षमपेक्ष्याष्टवार्षिकसप्तवार्षिकाद्यूहनीय

Indira Gandhi National Centre for the Arts

न·प्रा· मिति। सर्वत्राज्ञानतस्तदर्द्धं। प्रयोजकादीनां त्वत्रापि पूर्ववद्देवाष्टमतागहानिक्रमेण प्रायश्चित्तव्यवस्थोहनीया॥ इतरब्रा
१५ ह्मणस्त्रीवधे तु कामतः क्षत्रियवधोक्तं षाड्वार्षिकं। क्षत्रियस्त्रीवधे तु कामतो वैश्यवधोक्तं त्रैवार्षिकं। वैश्यस्त्रीवधे तु कामतः शू
द्रवधोक्तं सार्द्धवार्षिकं। शूद्रस्त्रीवधे तु शूद्रवधोक्तं द्विपादोनं वार्षिकं प्रायश्चित्तं। एतच्च कामतः। क्षत्रियादिवधप्रायश्चित्त
कामतो ब्राह्मण्यादिवधविषयमेव। अकामतो ब्राह्मण्यादिवधप्रायश्चित्तं तु अकामतः क्षत्रियादिवधप्रायश्चित्तं त्रैवार्षि
कवार्षिकषाण्मासिकमेव द्रष्टव्यं। तथा च विष्णुपुराणे। राजन्यवद्ब्राह्मणीं तु राजन्यां चैव वैश्यवत्। वैश्यां तु शूद्रवच्छूद्रां
शूद्रार्द्धेन विधानवत्। तथा हारीतेनाप्युक्तं। क्षत्रियद्ब्राह्मणीषु वैश्यवत्क्षत्रियायां शूद्रवद्वैश्यायां शूद्रां तु शूद्रार्द्धेनेति। यत्तु
वसिष्ठेनोक्तं। शूद्रां हत्वा संवत्सरं प्राकृतं ब्रह्मचर्यं चरेदिति। तदत्यन्तगुणवद्ब्राह्मणजनितशूद्रावधविषयमिति॥ ॥
इदानीं व्यभिचरितस्त्रीवधप्रायश्चित्तं निरूप्यते॥ तत्र सकलसवर्णव्यभिचरितस्त्रीवधप्रायश्चित्तमाह याज्ञवल्क्यः॥ श्रीकृष्ण
अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेदिति। अस्यार्थः। अत्र प्रकर्षेण दुष्टा सकलसवर्णव्यभिचरितामित्यर्थः। न। १५

त्वदुष्टां। अदुष्टस्त्रीहनने प्रायश्चित्तस्य वक्तुनरस्योक्तत्वादिति॥ तेन सकलसवर्णव्यभिचरितब्राह्मणीवधे अकामतो ब्राह्मणजातशूद्रव
धोक्तं वार्षिकप्रायश्चित्तमिति। तथा सकलसवर्णव्यभिचरितक्षत्रियावधे कामतः क्षत्रियजातशूद्रवधोक्तं त्रयाधिकषाण्मा
सिकं प्रायश्चित्तं। तथा सकलसवर्णव्यभिचरितवैश्यावधे ऽकामतो वैश्यजातशूद्रवधोक्तं सांतपनपूर्वकं तिलधेनुदानं प्रायश्चि
त्तं। तथा सकलसवर्णव्यभिचरितशूद्रावधे कामतो हीनशूद्रवधोक्तं तप्तकृच्छ्रप्रायश्चित्तं द्रष्टव्यं। कामतस्त्वेतत्सर्वं द्विगुणमिति॥ यद्यपि ब्राह्म
संतंध भिचरितत्वाच्च प्रायश्चित्तह्रासो युज्यते। तथापि गुणवतीनां सकलसवर्णव्यभिचरितत्वमतीमानि प्रायश्चित्तानि। निर्गुणानामत्यासेन
सवर्णव्यभिचरितानां प्रायश्चित्तह्रासमूहनीयमिति। एतच्च सर्वमुत्तमवर्णव्यभिचरितस्त्रीणां वधे द्रष्टव्यमिति॥ ॥इदानीं अनुलोमव
भिचरितस्त्रीणां वधे प्रातिलोम्येन जातानां मोडुरुषाणां च वधे समानत्वेनैकदेवप्रायश्चित्तं निरूप्यते॥ तत्र ब्रह्मगर्भः। स्त्रीणामासां वृद्धे
त्रियाश्चैतरपत्नवेष्व। प्रातिलोम्येन जातानां मशूद्रवच्चतुर्द्विषडिति। अत्र प्रातिलोम्यजातसमभिव्याहारात् स्त्रीणामपि प्रातिलो
म्येन व्यभिचरितानां वधप्रायश्चित्तं। तत्र शूद्रत्वे सति चतुर्द्विषडिति यथाक्रमं संतवाल्पयथायोग्यमन्वयादर्शनीयः। अस्य शूद्रत्व इति
ज्ञानं त्यजत्वे सतीत्यर्थः इति नायमर्थो भवति। प्रातिलोम्यव्यभिचरितस्त्रीणां वधे प्रातिलोम्यजातानां च वधे चतुर्द्विषण्मासा एव यथा।

न॰प्रा॰ १८

यागं व्रतमेवं विधिनः॥ शुद्धिहेतवा न वर्षाणि निनद्ध त्रियव्यतिचरितब्राह्मणीवधे षाण्मासिकं प्रायश्चित्तं॥ वैश्यव्यतिचरितब्रा
ह्मणीवधे चातुर्मासिकं॥ शूद्रव्यतिचरितब्राह्मणीवधे द्वैमासिकं। तथा वैश्यव्यतिचरितक्षत्रियावधे पादोनमासिकं। शूद्रव्यति
चरितक्षत्रियावधे षाण्मासिकार्द्धं। तथा शूद्रव्यतिचरितवैश्यावधे सार्द्धमासिकं व्रतमित्यूहनीयं। इत्थमेव प्रातिलोम्येन।
संकरजातानामपि वधे प्रायश्चित्तं योजनीयं। यत्तु याज्ञवल्क्येनोक्तं। दुष्टा तु ब्रह्मविट्क्षत्रशूद्रयोषा प्रमाप्य तु। दृतिं धनुर्व
स्तमविं क्रमाद्दद्याद्विशुद्धये। तत्र प्रातिलोम्येनात्यन्तात्यासेन व्यतिचरितानां ब्राह्मणीक्षत्रियावैश्याशूद्राणां वधे यथाक्रमं।
दृतिं धनुर्बस्तमविं दानं योजनीयमिति। एतच्च प्रायश्चित्तान्तरस्य अकामतो वधे द्रष्टव्यं। कामतस्तु वधे द्वैगुण्यमिति॥ एतच्च स
र्वं ब्राह्मणहन्तृस्त्रीवधे विहितं। क्षत्रवैश्यशूद्रहन्तेनु ब्राह्मणीव्यतिरिक्तस्त्रीवधे तु विप्रस्तु सकलं देयं पादोनं क्षत्रियस्मृतं। वै
श्यैर्द्धं पादशेषं तु शूद्रजातिषु शस्यते॥ इति वृद्धविष्णुवचनानुसारेण पादपादहानिर्द्रष्टव्या। ब्राह्मणीस्त्रीवधे तु यद्यपि
स्त्रीवधस्योपपातकत्वेन प्रायश्चित्तान्तरं मनुयादिभिरुपवर्णितं तथापि ब्राह्मणजातिविशेषात् ब्रह्मवधप्रकरणपठितस्य प्रा॰न॰
वपरिषद्या ब्राह्मणानां तु राज्ञां साद्विगुणा मता। वैश्यानां त्रिगुणा प्रोक्ता शूद्राणां तु चतुर्गुणा। परिषद्वृद्धं तेषां प्रोक्तं शुद्धये पाप १८

कर्मणामिति॥ अस्य वचनस्याविशेषप्रवृत्तत्वात्। ब्राह्मणीस्त्रीवधेपि क्षत्रियवैश्यशूद्राणां तु यथाक्रमं द्वैगुण्यं त्रैगुण्यं चातुर्गुण्यं
योजनीयं। प्रयोजकादीनां बालस्यमास्मत्ता गहानिर्द्रष्टव्या। अत्रापि स्त्रीवृद्धरोग्यूनषोडशवर्षीयबालानामर्द्धप्रायश्चित्तं पंचव
र्षादुपरि एकादशवर्षपर्यन्तं पादमात्रं द्रष्टव्यमिति॥ इति स्त्रीवधप्रायश्चित्तं॥ ॥इदानीं गोवधप्रायश्चित्तं निरूप्यते॥ तत्र म
नुः। उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत्। कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः। चतुर्थकालमश्नीयादक्षारलवणं
मितं। गोमूत्रेणाचरेत्स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत्॥ शुश्रूषित्वा नमस्कृत्य रात्रौ वीरा
सनं वसेत्॥ तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्। आसीनासु तथासीनो नियतो वीतमत्सरः॥ आतुरामभिप वा चौरव्या
घ्रादिभिर्भयैः। पतितां पंकलग्नां वा सर्वप्राणैर्विमोक्षयेत्। उष्णे वर्षति शीते वा मारुते वाति वा भृशं। न कुर्वीतात्मनस्त्राणं गोर
कृत्वा तु शक्तितः। आत्मनो यदि वान्येषां गृहे क्षेत्रेथवा खले। भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकं॥ अनेन विधिना यस्तु गो
घ्नो गामनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति। वृषभैकादशा गाश्च दद्यात्सुचरितव्रतः। अविद्यमाने सर्वस्वं वेद

Indira Gandhi National Centre for the Arts

प्रा॰
२७ विज्ञो निविदयेत्॥ अत्र धेनुसंकलनायां मासत्रयचतुर्थकालव्रतेन द्वादशधेनवो वृषभैकादशगो निःसहस्रपो विंशतिधेन
वो भवंति। इदं च कामतः सामान्यगोवधे ब्राह्मणेन कृते स निदुष्यं। यत्तु अंगिरसा समंत्र दंडधी मेखला धारणषष्ठकालभोज
नाधिकमेतद्व्रतमनेकग्रंथकलापेनाभिहितं तेन त्रिंशद्धेनवोऽत्र भवंति तद्ब्राह्मणकर्तृकबुद्धिपूर्वकाशक्तगोवध
विषयं। एतच्चोत्तयमपि ब्राह्मणसंबंधिगोवधविषयं। ब्राह्मणद्रव्यस्यैवमतरद्रव्याद्गुरुत्वेन प्रायश्चित्तगुरुत्वोचितत्वात्। य
त्तु वसिष्ठेनोक्तं गां चेद्धन्यात्तस्याश्चर्मणार्द्रेण परिवेष्टितः षण्मासान्कृच्छ्रं तप्तकृच्छ्रं वा तिष्ठेत् ऋषभवेहतो दद्यादिति
पूर्वोक्तं स्वल्पत्वात्क्षत्रियसंबंधिगोविषयं। कृच्छ्रं प्राजापत्यं तप्तकृच्छ्रं वा चेमन्क्रमेव। वसिष्ठेनोक्तं त्र्यहमुष्णाः पिबेदापः
त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयं। अत्र यद्यपि प्राजापत्येन दिवसेषु वर्तनमस्ति द्वादशा
सादिपरिमितग्रासभोजनस्य तप्तकृच्छ्रे चादिवसे त्र्ययथेष्टजलक्षीरघृताशनसद्भावाद्वंते चोपवासत्रयसाधारण्यात्प्राजापत्य
त्यतुल्यत्वमेव। तेनायमर्थो भवति। क्षत्रियसंबंधिगोवधे कृच्छ्राषण्मासान्कृच्छ्रं तप्तकृच्छ्रं वाचरेत्। अत्र ऋषभवेहतोर्दद्या श्रीहर
२७

ता मितिकर्तृद्वयनिर्देशाद्वृषहंता वृषभं स्त्रीगवीहंता वेहतं दद्यादिति ध्येयं। गर्भपातनशीलां गामंते ब्राह्मणाय दद्यात्। अत्रोत्त
यत्रापि वृषभवेहद्वयाभिधानमासिकव्रते न षोडश धेनवो भवंति। यत्तु याज्ञवल्क्येनोक्तं दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु
गा इति। तद्वैश्यसंबंधिगोवधविषयं। अत्र धेनुसंकलनया द्वादशधेनवो भवंति। यदपरं याज्ञवल्क्येनोक्तं पंचगव्यं पिबेद्गोघ्नो मा
समासीत संयतः। गोष्ठेशयो गोनुगामी गोप्रदानेन शुध्यतीति कृच्छ्रं चैवाति कृच्छ्रं च चरेद्वापि समाहितः॥ इति। तच्छूद्रसंबंधिगोवधविष
यं। अत्र धेनुसंकलनया पंचगव्याहारस्य स्वल्पत्वात्गोष्ठशयनादीतिकर्तव्यतांगत्वान्मासैकव्रतधेनुचतुष्टमाकलनीयं तथा
गोप्रदानं कृच्छ्रं च धेनुरेका अतिकृच्छ्रे च धेनुद्वयं इत्येवं मिलित्वा सप्तधेनवः४। एतच्च सर्वं कामतो ब्राह्मणकृतगोवधविषयं। अका
मतस्तदर्धं॥ क्षत्रियवैश्यशूद्रकामकृतगोवधेतु। विप्रेतु सकलं देयं पादोनं क्षत्रिये मतं। वैश्येर्द्धं पादशेषस्तु शूद्रजातिषु शस्य
ते इति वृद्धहारीतवचनात्पादपादहानिर्द्रष्टव्येति। गर्भिण्याधिगोवधे तु द्विगुणं गोव्रतं। तथा च वृद्धहारीतः। गर्भिणीं कपिलां दोग्ध्री
होमधेनुं च सुव्रतां। लगुडादिना घातयित्वा द्विगुणं गोव्रतं चरेत्॥ यदि लगुडाद्यभिघातेन गो जीवति गर्तमात्रं च ततोऽनवति तदा

त्र·प्रा·
१८

विशेषमाह यमः॥ पादमापन्नमात्रे तु द्वौ पादौ गात्रसम्मिते। पादोनं व्रतमाचक्ष्व हत्वा गर्भमचेतनमिति। अस्यार्थः। उत्पन्नमात्रगर्भ
घाते यथोक्तप्रायश्चित्तपादाचरणं। गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयं। सकलगात्रोत्पत्तौ चैतन्याभावे पादत्रयम्। अथ चैतन्यसु
त्पन्नगर्भघाते कृत्स्नमेव प्रायश्चित्तं गृहणीयमिति। अतिवृद्धातिकृशादिगोवधे अर्द्धप्रायश्चित्तं तथा च बृहस्पतिः। अतिवृद्धाम
तिकृशामतिबालां च रोगिणीं। हत्वा पूर्वविधानेन चरेदर्द्धव्रतं द्विजः। ब्राह्मणान्भोजयेत्पश्चाद्दद्याद्धेमतिलांस्तथा। हेमान्न
तिलदानेन नरः पापात्प्रमुच्यते इति। अत्यंतव्याधिपीडितमरणावस्थोत्पन्नबालादिगोवधे तु यथोक्तप्रायश्चित्तपादमा
त्रं तथा च यमः। स्वांतमज्ञानमुन्मत्तप्रमत्तं व्याधिपीडितं। अंधं वा लंतमारूढं हत्वा पादं समाचरेदिति। एतच्च प्रायश्चित्तं साक्षा
द्गोवधविषयं। साक्षाद्गोवधप्रकाराश्चापस्तंबेनोक्ताः। पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात्। निपातयंति गां ये तु तेषां स
र्वं विधीयते। मुष्टिचपेटकीलैश्च तथा शृंगादिमोटनैः। लगुडादिप्रहारेण गोवधं तत्र निर्दिशेत्। हले च शाकटे चैव दुर्बलं यो श्रीकृष्ण
नियोजयेत्। प्रत्यवाये समुत्पन्ने तत्र साक्षाद्गोवधमिति॥ एतच्चोपलक्षणमात्रं। विषाग्निदाहादिनापि साक्षाद्वध एव प्रहन्नी १८

यमिति। याहत्रे गोवधे प्रायश्चित्तस्याल्पत्वं तदाहापस्तंबः। दमने दामने चैव संधाने चैव योजने॥ स्तंभ शृंगं न वर्थैवा मृते पादोनमा
चरेदिति। तथा यमः। वाहने दोहने चैव शकटे चैव योजने। स्तंभ शृंगं बंधे वा मृते पादोनमाचरेत्॥ अतिदाहातिवाहाभ्यां ना
सिकाछेदनेन वा। नदीपर्वतसंरोहे मृते पादोनमाचरेदिति। दीर्घरज्वा हते वापि शृंगे युग्मयोजिते॥ हलयुग्मयुते चैव द्विपा
दं तत्र निर्दिशेत्। घंटाभरणदोषेण गवां यत्र विपद्भवेत्। चरेदर्द्धव्रतं तत्र दृष्टणार्थं हि तत्कृतं॥ कांतारेष्वथवा दुर्गे गृहदाहेवृटे
षु वा। यदि तत्र विपत्तिः स्यात्पाद एको विधीयते। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। पोषणे पादहीनं तु चरेत्सर्वं निपातने।
आहारानुसंधानकाले नित्यमवरोधः। बंधनं या पश्चात्काले पोषणं हीनपोषणं। निपातनं कूपावटादिपातनं। काष्ठलो
ष्ठाश्मलगुडैः साक्षाद्वधे कृते सांतपनादिव्रतपूर्वकं यथोक्तप्रायश्चित्तं कर्तव्यं। तथा च यमः। काष्ठलोष्ठाश्मभिर्गावः श
स्त्रैर्वा निहता यदि। प्रायश्चित्तं कथं तत्र शस्त्रे शस्त्रे विधीयते। काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्ठके। तप्तकृच्छ्रं तु पाषाणे श
स्त्रे वाप्यतिकृच्छ्रकमिति। वह्निना च गवामेकशालादौ बंधने निर्गमाद्यवरोधे च अज्ञानेन तेषां पहारे च एकदा मरणे द्विगुणं।

Indira Gandhi National
Centre for the Arts

स॰ प्रा॰

गोव्रतं। तथा च संवर्त्तः॥ आयसानां बहूनां च रोधने बंधने पि वा॥ त्रिषड्भिरप्यपचारे तु द्विगुणं गोव्रतं चरेत्। तथा च संवर्त्तः॥ ए
कायन्नानुबहुभिर्दैवाद्व्यापादिता क्वचित्। पादं पादं तु हत्याया श्चरेयुस्ते पृथक् पृथक्। अत्र सर्वत्र गोवधे कृतवापो वसेद्गोष्ठ
इत्यादिवचनानुसारेण सशिखवपनपूर्वकं प्रायश्चित्ताचरणं। तत्रायं विशेषः। यदि केशरक्षणं कर्त्तव्यं तदा त्रैवार्षिका
दिव्रतं। त्र्यब्दे तु कादशाद्विगोदानं तु द्विगुणं। तथा च यमः॥ केशसंरक्षणार्थं तु द्विगुणं गोव्रतं चरेत्। द्विगुणे तु व्रते चीर्णे द्वि
गुणा द्विगुणा तथैव च॥ स्त्रीणां तु विशेषमाह॥ वपनं नैव नारीणां नानुव्रज्या जपादिकं। न गोष्ठशायनं तासां न च दध्यात्स्वजिनं
सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं। एवमेव तु नारीणां मुंडमुंडनमादिशेदिति॥ गोरमरणे व्याघ्रसंगादिकरणे प्रायश्चित्त
माह यमः॥ अस्थिसंगं गवां कृत्वा लांगूलस्य च छेदनं। पातने कर्णशृंगाणां मासार्द्धं तु यवान्पिबेदिति। अत्र धेनुसंकलनया धेनु
द्वयं। यत्पुनस्तत्काव्यायनेन गोवधे त्रैवार्षिकं यद्धगोतमेन त्रैवार्षिकं पूर्वे वृषलाधिकगोदानदानेन यच्च संवर्त्तेन षाण्मासिकपूर्वकं
गोसहस्रदानमुक्तं तथा पराशरं अनतितिरपि नाना धिकाधिकप्रायश्चित्तान्युक्तानि तानि कामाकामकृत सवनश्रोत्रियषडंग श्री लक्ष्म॰ १९

॥५

वेदाध्यायिब्राह्मणसंबंधिगुणवद्गर्भिणीहोमधेनुकपिलादिवधविषयाणि यथायोगं व्याख्येयानि॥ इदानीं तु तथाविधगवा
मावेनव्यवहाराभावात्त्वत्केविषयव्यवस्थया न व्याख्यातानीति॥ ॥ अथादोषविषयमाह संवर्त्तः॥ यंत्रणे गोश्चिकित्सार्थे मूढग
र्भविमोचने। यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते॥ सायं संयमनार्थं तु न दुष्येद्दोषबंधयोः। एकल्याग्निदाहे तु प्रायश्चित्तं न वि
द्यते। अत्रापि प्रयोजकादीनाम प्रमादप्रमत्ततागहानिः॥ स्त्रीशूद्ररोग्यनषोडशवर्षीयबालानां च प्रायश्चित्तार्द्धं पंचवर्षादुपर्येका
दशवर्षपर्यंतं पादमात्रं इष्टव्यम्॥ ॥ इति गोवधप्रायश्चित्तं॥ ॥ इदानीमितरप्राणिवधप्रायश्चित्तं निरूप्यते॥ तत्र मनुः॥ वासो द
द्याद्धयं हत्वा पंच नीलान्वृषान्गजे॥ अजं मेषमनड्वाहं खरे हत्वैकहायनं॥ हयं हत्वा वासो दानं। हस्तिवधे पंच नीलवृषदानं। अ
जंमेषं गर्द्दभं प्रत्येकं हत्वा अनड्वाहं वर्षं एकहायनं दद्यात्॥ यथाह व्यासः॥ हंसबलाकाचकाकबर्हिणमेव च। वानरं श्येनवासौ
चस्पर्शयित्वा ब्राह्मणाय गां॥ तथा क्रव्यादांस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीं॥ अक्रव्यादान्वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं। क्रव्या
दाव्याघ्रादयो मृगाः॥ कृष्णसारादयः अक्रव्यादा महिषादयः। कृष्णलपरिमितं सुवर्णमित्यर्थः॥ तथा॥ अस्थिकास्थियसीदद्यात्सर्प

कृष्णलं॰

Indira Gandhi National
Centre for the Arts

स॰ प्रा॰
२०

हत्वा द्विजोत्तमः। पलालसारकं षंढं सीसकं चैव माषकं। अथवा कार्ष्णायसीमिति कृष्णलोहमयीं कुद्दालिकां। षंढं नपुंसकं तत्रष्ट
गपत्वाद्यत्तिप्रेतं। तथा च याज्ञवल्क्यः। मार्जारगोधानकुलमंडूकश्वपतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत्। अ
श्वपतत्रिणः पूर्वोक्तपक्षिव्यतिरेकेणाभिप्रेताः। कृच्छ्रपादश्चोक्तः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन
कृच्छ्रपादः प्रकीर्तितः। तथा शूद्रहत्याव्रतमभिधायोक्तं अस्थिमतां सहस्रं वा तथानस्थिमतामनश इति। अस्थिमतां कृक
लासादीनां सहस्रवधे तथानस्थिमतां जलौकोदंशमशकादीनां शकटैकवहनीयराशिवधे शूद्रहत्याव्रतं। तच्च मोहाच्छू
द्रवधं प्राप्य तप्तकृच्छ्रं समाचरेदिति वचनविषयं मनूक्तं तप्तकृच्छ्रमभिप्रेतं। एतच्चाकामतः कामतस्तु द्वैगुण्यं। अस्थिमदल्प
प्राणिवधे किंचिद्धान्यादि ब्राह्मणाय दद्यात्। अनस्थिमदल्पप्राणिवधे तु प्राणायाममात्रं तथा च मनुः। किंचिदेव तु विप्राय
दद्यादस्थिमतां वधे। अनस्थिमतां हिंसायां प्राणायामेन शुध्यति॥ ॥इदानीं रहस्यब्रह्मवधप्रायश्चित्तं निरूप्यते॥ तत्राह गौ
तमः। रहस्यप्रायश्चित्तमविज्ञातदोषस्येति। अस्यार्थः। अन्येनाविज्ञातदोषस्य रहस्यप्रायश्चित्तं तत्प्रायश्चित्तमपि क्रि

श्रीराम
२०

यमाणमन्येनाविज्ञायमानमेव कर्तव्यं तथा च प्रचेताः। रहस्ये रहस्यं प्रकाशे प्रकाशमिति। अत्र यदि कर्ता स्वयं प्रायश्चि
न त्तं नातिज्ञस्तदा कस्यचिद्रहस्यकृतपापस्य किं रहस्यप्रायश्चित्तमिति व्याजेन प्रायश्चित्तातिज्ञं पृष्ट्वावगम्य प्रायश्चित्तं कु
र्यात्। सप्तविधश्च ब्रह्मवधः पूर्वमुक्त एव। अत्र यद्यपि अस्मिन्ब्रह्मवधे रहस्ये इदं प्रायश्चित्तमिति शृंगग्राहिकया वचनं
नास्ति तथापि गुरूणि गुरूणि लघूनि लघूनीति गौतमवचनानुसारात्प्रायश्चित्तव्यवस्थोहनीया। तत्राज्ञानतः सा
क्षाद्ब्रह्मवधे भैक्षाहारो गवामनुगमने कुर्वन्पावमानीर्जपन्संवत्सरेण शुध्यति तथा च मनुः। महापातकसंयुक्तोऽनुगच्छे
द्गाः समाहितः। अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुध्यतीति। यत्तु मनुना अरण्ये पराकत्रयं प्रतिपराकं प्रतिपराकस्त्व
ध्यायनमुक्तं तद्ब्रह्मत्वप्रयोजकब्रह्मवधविषयं तथा च मनुः। अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां। मुच्यते पातकैः
सर्वैः पराकैः शोधितस्त्रिभिरिति। पराकस्वरूपमाह मनुः। यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनं। पराको नाम कृच्छ्रोऽयं स
र्वपापापनोदकः। यत्तु गौतमेन। प्रथमदशादिनानि दुग्धमात्रमशनं द्वितीयदशदिनानि घृतमात्रमशनं तृतीयदशादि

Indira Gandhi National
Centre for the Arts

त॰ प्रा॰ नानिजलमात्रमात्रमशनमुक्तं तद्व्यगतेर्वैमनस्यापादकानुग्राहकविषयं तथा च गौतमः । द्वयोरन्तरं रात्रौ च ह्वितेन क्षिति
२१ पमद्भिस्तरणीयमिति। यत्तु याज्ञवल्क्येन त्रिरात्रमुपोष्य जलमध्येऽघमर्षणमनेन गोदानमुक्तं तत्स्वहृत्तोग्राहकप्रयोजक
विषयं तथा च याज्ञवल्क्यः। त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम्। अन्तर्जले विशुध्येत दत्त्वा गां च पयस्विनीमिति। अ
घमर्षणं च वारत्रयमावर्तनीयं तथा च गौतमः। अन्तर्जलेऽघमर्षणं त्रिरावर्तयन्सर्वपापेभ्यो मुच्यत इति। यत्तु मनुना प्र
त्यहं त्रिषवणस्नानं वारत्रयमघमर्षणावर्तनं चोक्तं तद्व्यमानानुग्राहकमुदासकानुग्राहकविषयं। तथा च मनुः। त्र्यहं
तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः। मुच्यते पातकैः सर्वैर्जप्त्वा त्रिरघमर्षणमिति। यत्तु विष्णुना मासेन घ्रास्नानं षोडश
प्राणायामकरणं प्रत्यहमेककालहविष्यभोजनमुक्तं तदशुमेत्वविषयं। तथा च विष्णुः। सवनं मासाद्य स्नातः प्रत्यहं षोड श्रीकृष
श प्राणायामान्कृत्वैककालं हविष्याशी मासेन ब्रह्महा पूतो भवतीति। मनुरप्याह सव्याहृतिकाः सप्रणवाः प्राणायामा २१
स्तु षोडश। अपि भ्रूणहणं मासात्पुनन्त्यहरहः कृताः। प्राणायामश्चोक्तो योगयाज्ञवल्क्येन। सव्याहृतिं सप्रणवां गाय

त्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते। तेनायमर्थः। प्राणान्संयम्य सोंकाराः सप्त व्याहृतीः पठित्वा गायत्रीं पठेत्तत
दन्ते चापो ज्योतिरिति शिरो लागः ततो निश्वासं त्यजेदित्यमेव षोडशधावर्तनमिति। यच्च याज्ञवल्क्येन अहोरात्रोषितो जलशायन
तुर्वीर्यलोमत्वक्स्नायुहिलोमक्रव्यासनखशोणितस्नायु अस्थिमज्जासु प्रत्येकं पञ्च पञ्चाहुतीन् स्वशरीराद्धुतानां जुहुयादित्युक्तं तदर्थापहा
र्ताडनादिनिमित्तात्मनब्राह्मणवधविषयं। तथा च याज्ञवल्क्यः। लोमभ्यः स्वाहेत्यथवा दिवसं मारुताशनः। जले स्थित्वाभिजुहुयाच्चत्वा
रिंशद्धुताहुतीः इति। यत्तु गौतमेन सावित्र्याः सहस्रावर्तनमात्रमुक्तं तद्व्याज्ञाननिमित्तजातक्रोधोत्पन्नब्रह्मवधविषयं। तथा च गौत
मः। सावित्रीं वा सहस्रकृत्व आवर्तयन्पुनीते चैवमात्मानमिति। सर्वत्रैवात्रसात्वाद्युधव्यतिरिक्ते। विहितं यदकामानां कामात्तद्द्विगुणं
स्मृतमिति देवलवचनात्कामतो द्वैगुण्यं। कामतस्तु साक्षाद्धस्य ब्रह्मवधेऽपि मरणान्तिकमेव। कामतो ब्रह्मवधे निष्कृत्यभावस्योक्त्वा
त्। अपि च कामकृतसाक्षाद्ब्रह्मवधव्यतिरिक्तवधान्तरेणावत्तप्रकारान्तरेणान्तरूपं प्रायश्चित्तमिति निश्चितमेव। तत्समनिव्याहृतं च व्रत
रूपं ब्रह्मवधस्य प्रायश्चित्तमतस्तदपि कामकृतसाक्षाद्ब्रह्मवधव्यतिरिक्तवधान्तरविषयमेवमवतिष्ठते। तथा च याज्ञवल्क्यः। विख्या

Indira Gandhi National Centre for the Arts

प्र·प्रा· २२ तदोषःकुर्वीतषष्ठेनुमतंव्रतं।अविरमापितदोषस्तुरहस्यंव्रतमाचरेदिति।तेनेतररहस्यव्रतवधव्रतानांकामतोष्टगुण
मिति॥ ॥इतिरहस्यवधव्रतवत्स्वधप्रायश्चित्तनिरूपणम्॥ ॥इदानींनानाविधरहस्यकृतप्रायश्चित्तंनिरूप्यते।तत्रयाज्ञ
वल्क्यः॥प्राणायामशतंकुर्यात्सर्वपापापनुत्तये।उपपातकजातानामनादिष्टस्यचैवहीति।अस्यार्थः॥उपपातकस्यजातं
जन्मयेषुतेउपपातकजाताउपपातकत्तीरइत्यर्थः॥तेषांसर्वपापापनुत्तयेप्राणायामशतंकरणीयं।अन्यस्याप्यनुक्तप्राय
श्चित्तविशेषस्यपापस्यापनोदायप्राणायामशतंकरणीयं।तदुक्तमनादिष्टस्यचैवहीति।अत्रैवचगौरवलाघवापेक्षयाप्रा
णायामशतमेवएकाहद्व्यहत्र्यहादिक्रमेणमासंषण्मासंसंवत्सरंवाभ्यसनीयमिति॥ ॥इतिरहस्यप्रायश्चित्तं॥ ॥इतिप्रा
यश्चित्तप्रकरणेवधपरिच्छेदःसमाप्तः॥ ॥इदानीमलक्ष्यलक्षणप्रायश्चित्तंनिरूप्यते॥तत्रमहापातकत्वेनगुरुत्वात्प्रथमंसुरा
पानप्रायश्चित्तमेवनिरूप्यते।तत्रानिरूपितेसुराशब्दार्थेसुरापानप्रायश्चित्तानिरूपणात्प्रथमंसुराशब्दार्थएवनिरूप्यते।कि श्रीहर
ंसुरानामेति।तत्रतावल्लोकेतनायावन्मद्यंसर्वसुराशब्दप्रयोगोदृश्यते।नत्वस्मत्तुवचनादेवनिर्णयःतस्यापिचेविवक्षि २२

ते।यदाहमनुः॥सुरावैमलमन्नानांपाप्माचमलमुच्यते।अतोब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदिति।तत्रान्नविकारस्यै
वसुरात्वमवगम्यते।पुनरप्याह।गौडीपैष्टीचमाध्वीचविज्ञेयात्रिविधासुरेति।अत्रगुडपिष्टमधुविकाराणांत्रयाणामेवसु
रात्वंपरिस्फुरति।तत्कथमन्नाध्यवसायइति।उच्यते।पैष्टीशब्दाभिधेयैवसुरामुख्यासुराशब्दार्थइतिक्रमः॥तथाहि।नतावन्म
द्यमात्रपर्यायेसुराशब्दःमद्यसुराशब्दयोर्भिन्नार्थत्वप्रतिपादकानेकवचनदर्शनात्।तथाचमनुः॥यक्षरक्षःपिशाचान्नंमद्यं
मांसंसुरासवं।तद्ब्राह्मणेननात्तव्यंदेवानामश्नताहविरिति।तथाचवृहद्याज्ञवल्क्यः॥कामादपिहिराजन्योवैश्योवापि
कथंचन।मद्यमेवासुरांपीत्वानदोषंप्रतिपद्यते।तथाचशंखः॥असुरामद्यपायीवाब्राह्मणंचरेदिति।नापिगुडपिष्टमधुविका
राणांत्रयाणामेवसुरात्वं।एकस्यशब्दस्यानेकशक्तिकल्पनागौरवप्रसंगात्।नचमद्यांतरव्यावृत्तमेतत्त्रितयानुगतंकिंचिदे
कंसुरात्वंनामसामान्यमस्ति।किंचगौडीमाध्वीशब्देनगुडमधुविकारस्यनसुरात्वमभिप्रेतं।पुलस्त्यस्यापिगुडमधुविकारव्यतिरि
क्तामेवसुरामाह।तथाचपुलस्त्यः॥पानसंज्ञाममाधूकंखार्जूरंतालमैक्षवं।माक्षिकंटांकमाध्वीकंमैरेयंनालिकेरजं।समाना

Indira Gandhi National
Centre for the Arts

स·प्रा·
२३

निविजानीयान्मद्यान्येकादशैवतु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति। तेन पदे तन्मूत्तुनो कं सुरा वै मल
मन्नानां पाप्मा वमलमुच्यते। तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति तदनुरोधेनान्नविकारस्यैव मुख्यं सुरा
त्वं अन्नशब्दश्च व्रीहिविकार एव तण्डुलपिष्टकादौ प्रसिद्धः। ननु गुडादौ मद्यस्यापि पिष्टकादिवदोदनादेरपि निष्पा
त्तेः। पैष्टीशब्दोपि व्रीह्यन्नविकारपर एव। अत एव पनसादिविकाररूपमेकादशमद्यमभिधाय सकलव्रीह्यन्नवि
कारसाधारणमेवोक्तं द्वादशं तु सुरामद्यमिति। तेन पैष्टीशब्दात्तिष्ठेयव्रीह्यन्नविकार एव मद्यविशेषो मुख्यः सु
राशब्दार्थ इति निर्णीयते। मद्यांतरे तु मदकारित्वगुणयोगाद्गौणोयं सुराशब्द इति। तथा च विष्णुपुराणे सुरा च पैष्टी
मुख्योक्ता न तस्यास्त्वितरे स्मृते। पैष्ट्याः पाने तु वेतेषां प्रायश्चित्तं निबोध मे। अतः पैष्टीसुरापानमेव त्रैवर्णिकस्य महापात
कं निषिद्धत्वात्। ननु गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्वा न पेया द्विजोत्तमैरिति मनुव
चनस्य का वार्त्ता उच्यते। गौणत्वेपि सुराशब्दस्य गौडीमाध्वीमद्यपानस्य ब्राह्मणगतत्वेन तुल्यप्रायश्चित्तप्रदर्शनार्थं॥ श्रीकृष्ण
२३

तदर्थं वचनार्थं॥ गौडी पैष्टी माध्वी त्रिविधैव ब्राह्मणगोचरत्वेन सुरा ज्ञेया। सुरायामसुरायां च सुराशब्दो ब्राह्मणगोचरत्वेन तुल्य
रूपप्रदर्शनार्थं॥ एतदेवोत्तरार्द्धेन व्यक्तीकृतं। यथा एका पैष्टी सुरा मुख्या त्रैवर्णिकैरपेया तथा द्विजोत्तमैर्ब्राह्मणैर्गौडीमाध्वी
च न पातव्या। यदि तु पैष्ट्यादि सुराणामेव मुख्यसुरात्वं स्यात्तदा त्रिविधा सुरा न पातव्येत्येतावतैवार्थपरिसमाप्तौ यथैवैकेत्या
दि सर्वमेव वचनमनर्थकं स्यात्। यदा तु पैष्टीमात्रमेव मुख्यसुराशब्दार्थं तदा तत्तुल्यप्रायश्चित्तप्रदर्शनार्थं तदिदं पद्यमतो युक्तं
न तु पैष्टीसुरैव मुख्यसुरा विधीयते तेनायमर्थो लभ्यते। पैष्टीशब्दात्तिष्ठेयव्रीह्यन्नविकार एव मुख्यः सुराशब्दार्थः। तत्पानमे
व त्रैवर्णिकस्य महापातकमिति। गौडीमाध्वीसुरापाने तु ब्राह्मणस्य पैष्टीपानवदेव प्रायश्चित्तं क्षत्रियवैश्ययोस्तत्पानेपि न दो
ष इति। अथ यद्यपि ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति पुल्लिंगनिर्देशोस्ति। तथापि रागतः सुरापानानुवादेन निषेधप्र
तिपादनाद्विशेषविवक्षाहितुक्तविधेयपेक्षा तावाल्वाजपेययूप इतिवद्व्याख्यानन्यगतित्वाद्वोपादानाभावाद्ब्राह्मणादिजाति
मात्रस्यैव विवक्षितत्वात् स्त्रीणामपि ब्राह्मणीक्षत्रियावैश्यानां सुरापाने महापातकमेव। एतच्च सर्वमाचाराधिकरणे वार्त्तिक

Indira Gandhi National
Centre for the Arts

कारेस्तूपक्रमेवप्रपंचितं।बालोकेन तु गौडमाध्वीपैष्टीश्चैव सुराशब्देन मुख्या इति यद्दत्तिहितं तद्व्यटीकापरिज्ञानेनैवेति॥ ॥
इदानीं प्रायश्चित्तं निरूप्यते॥ ॥तत्राह मनुः।सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेदिति।तया तु काये निर्दग्धे मुच्यते पात
कात्ततः।गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।पयो घृतं वा मरणाद्गोशकृद्रसमेव वा।याज्ञवल्क्योप्याह।सुराम्बुघृतगो
मूत्रपयसामग्निसन्निभं।सुरापोन्यतमं पीत्वा मरणाच्छुद्धिमृच्छतीति।एतच्च कामतः सुरापानविषयं।तथा बृहस्पतिः
सुरापाने कामकृते ज्वलंतीं तां विनिक्षिपेत्।मुखे तया विनिर्दग्धे मृतः शुद्धिमवाप्नुयादिति।एतत्संकल्पानेऽपि द्रष्टव्यं।त
थाचांगिराः।सुरापानं सकृत्कृत्वा योग्निवर्णां सुरां पिबेत्।स पावयेत्तथात्मानमिहलोके परत्र चेति।अकामतस्तु बला
त्कारेण भ्रमेण वा सुरापाने न मरणांतिकं किंतु द्वादशवार्षिकमेव।तथा च शंखः।अधःशायी जटाधारी पर्णमूलफला
शनः।एककालं समश्नानो वर्षे तु द्वादशे गते।स्वर्णस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः।व्रतेनैतेन शुध्यंति महापातकि 
नस्त्विमे।एतच्चाकामतः सकृत्सुरापानविषयं।अभ्यासे त्वकामतोपि मरणांतिकमेव।तथा च वसिष्ठः।अभ्यासेन तु सुरापो 

ग्निवर्णां सुरां पिबेद्द्विजो मरणात्पूतो भवतीति विज्ञायत इति।अत्र यद्यपि द्रवद्रव्यस्यैकदेशादेवोन्नय
नमात्रमेव पानं तच्चैकस्मिन्प्रयोगेऽनेकधैव संभवति तथापि न तथाभूतोभ्यासोपेक्षितः।यतः प्रवृत्तिधा
त्वर्थाभ्यासोत्राभ्यासः।एकफलोद्देशप्रवृत्तानां हि व्याख्यानाद्ध्येकोपक्रमाणां व्यापारनिवहानामेक
धात्वर्थत्वं।यथैकफलोद्देशेनैकप्रयत्नोपक्रमाणां स्थालीसम्मार्जनादीनामोदनपरिक्षणपर्यंता
नां व्यापारनिवहानामेकपचतिधात्वर्थत्वं।यथा वा प्रहारप्रहाररक्षणानां भिन्नत्वेप्येकफलोद्देशेनैक
प्रयत्नत्वेनैकावहारतिधात्वर्थत्वं।अन्यथा प्रतिग्रहं रमप्रहर्तरक्षरत्यादिप्रयोगापत्तिप्रसंगात्।तेना
त्रापि एकफलोद्देशेनैकप्रयत्नोपक्रमाणामभ्यवहाराणामेकस्मिन्प्रयोगे सकृत्पानत्वेनाभ्यासः प्र
योगभेदे त्वभ्यास एवेति सिद्धं।यच्चांगिरसा महापातकसंयुक्ता वर्षैः शुध्यंतीत्येतैर्गिरितिसकल
महापातकसाधारणं त्रैवार्षिकं प्रायश्चित्तमुक्तं।तद्द्रवतक्रादिमिश्रिते षडुपलभ्यमानगंधरससुरा

Indira Gandhi National
Centre for the Arts

प्रा०
२५

पानविषयमूानवमिश्रितत्वे पिष्टरात्वानपायाद मिश्रितसमत्वमेवेतिवाच्यं। तक्रादिद्रव्यान्तःपाते
नविभक्तसूक्ष्मरूपत्वे नामिश्रितद्रवैलक्षण्यात्सूक्ष्मसुरायाश्चनोपसर्जनत्वेनास्वहार्यपिदोष
उत्पत्वेसतिवानागतसूक्ष्मसुरासंयुक्ततक्रादिपानेपिमहापातकित्वप्रसङ्गात्। नचतत्रमहत्त्वमेवनाम
नं सुरायाः इतिवाच्यं। तक्रमानदेशापवृत्तरागंधोपलब्धात्। तेनयथायथासूक्ष्मत्वंभवतितथातथाप्रायश्चि
त्तविशेषस्तक्रादिमिश्रितकिंचिदुपलभ्यमानगंधरससुरापानेत्रैवार्षिकमेवेति। यत्तुयाज्ञवल्क्येन·क
णान्वाभक्षयेदब्दं पिण्याकंवासकृन्निशि। सुरापानापनुत्यर्थंवालवासाजटीध्वजीतिवार्षिकप्रायश्चित्त २५
मुक्तंतत्प्रचुरतरतक्रादिप्रवेशनानुपलभ्यमानगंधरससुरापानविषयं·तत्तु मुखमात्रप्रवेशविषयमिति
बालोकेनाभिहितमादरणीयंतस्यपानशब्दानभिधेयत्वात्। एतदुभयमपिज्ञानतस्तक्रादिमिश्रितसु
रापानविषयं। अज्ञानतस्तदर्धं। यत्तुबोधायनेनोक्तं। अमत्यासुरापानेकृच्छ्राब्दपादंचरित्वापुनरुपनयन

प्रा० २५

पानविषयमूा। न च मिश्रितत्वे पि सुरात्वानपायाद मिश्रितसमत्वमेवेति वाच्यं। तक्रादिद्रव्यान्तरैः पाते
न विभक्तसूक्ष्मरूपत्वे शामिश्रितसुरावैलक्षण्यात्सूक्ष्मसुरायाश्च स्वोपसर्जनत्वेनास्वहार्येपि दोष
तुल्यत्वे सति वा नागतसूक्ष्मसुरासंयुक्ततक्रादिपानेपि महापातकित्वप्रसङ्गात्। न च तत्र मद्यत्वमेवागम
नं सुरायाश्च तिवाच्यं। तत्समानदेशएव सुरागंधोपलम्भात्। तेन यथायथा सूक्ष्मत्वं भवति तथा तथा प्रायश्चि
त्तविशेषस्तक्रादिमिश्रितकिंचिदुपलभ्यमानगंधरससुरापाने त्रैवार्षिकमेवेति। यत्तु याज्ञवल्क्येन। क
णान्वाभक्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजीति वार्षिकप्रायश्चित्त २५
मुक्तं तत्प्रचुरतरतक्रादिप्रवेशनानुपलभ्यमानगंधरससुरापानविषयं। न तु सुरवमात्रप्रवेशविषयमिति
बालाकेनाभिहितमादरणीयं। तत्र पानशब्दानभिधेयत्वात्। एतदुभयमपि ज्ञानतस्तक्रादिमिश्रितसु
रापानविषयं। अज्ञानतस्तदर्थं। यत्तु बोधायनेनोक्तं। अमत्या सुरापाने कृच्छ्राब्दपादं चरित्वा पुनरुपनयन

मितिानदप्यज्ञानतस्तक्रादिमिश्रितकिंचिदुपलभ्यमानगंधरसपीतोद्गारितसुरापानविषयमूा। यत्तु वसि
ष्ठेनोक्तं। मत्या पानेत्वसुरायाः सुरायाश्चाज्ञानेकृच्छ्रातिकृच्छ्रौ घृतप्राशश्च पुनस्संस्कारश्चेति। तत्प्रचुरतरतक्रादि
प्रवेशेनानुपलभ्यमानगंधरसपीतोद्गारितसुरापानविषयमूा। अत्र यद्यपि उद्गारितत्वानुद्गारितत्वविशेषो
न श्रूयते तथापि स्वल्पलाघवदर्शनेनोद्गारितत्वानुद्गारितत्वेन प्रायश्चित्तविशेषस्य वक्तव्यत्वादुद्गारूहनी
यं। तथा चोद्गारणस्यापि पापक्षयहेतुत्वमाह मनुः। अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञानाद्भुक्तमु
त्तार्यं शोध्यं वाप्याशु शोधनैरिति। अविज्ञातगंधरससुरासंसृष्टद्रव्यभक्षणे तु पुनरुपनयनमात्रं। तथा च मनुः।।
अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव वा। पुनस्संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः। पुनः संस्कारे च विशेष
माह मनुः। अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च। निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणीति। इहहि
स्मरणाद्धा। वपनं मेखला दण्डो भैक्षचर्या व्रतानि च। निवर्तन्ते द्विजातीनां पुनस्संस्कारकर्मणीति। मुत्वेक्त्रुहर

Indira Gandhi National Centre for the Arts

प्रा० २६ मात्रप्रवेशोत्वनभ्यवहारे सतिपानोपक्रमस्यानिष्पन्नत्वात् यथाविधसुरापाने यत्प्रायश्चित्तमुक्तं तदर्द्धं द्रष्टव्यं । ए
नद्यसुरापाने प्रायश्चित्तं । गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमै
रिति मनुवचनप्रतिपादिततुल्यत्वानुरोधेन मुख्यत्वेपि गौडी माध्वी सुरापानेपि ब्राह्मणस्य द्रष्टव्यं । क्षत्रियवैश्ययो
स्तु पैष्टीसुराव्यतिरिक्तसकलमद्यपाने न दोषः । पैष्टीसुरापाने तु विप्रे तु सकलं देयं पादोनं क्षत्रिये तथा । वैश्येऽर्द्धपा
दशेषं तु शूद्रजातिषु शस्यत इति वचनानुसाराद्यत्सुरापाने ब्राह्मणस्य प्रायश्चित्तं तस्य क्षत्रियवैश्ययोः पादपादहा
निर्द्रष्टव्या । मरणान्तिके तु प्रायश्चित्ते न्यूनाधिकभावासंभवात् कामतः सुरापाने क्षत्रियवैश्ययोरपि मरणान्तिकमेव । एवमुप
नयनरूपेपि प्रायश्चित्ते न्यूनाधिकभावासंभवान्नकादिमिश्रितसुरापाने क्षत्रियवैश्ययोरपि पुनरुपनयनमेव । शूद्रस्य तु सुरा
पाननिषेधस्याभावादिदं वचनमनवकाशमेव । अनुपनीतब्राह्मणापरिणीतब्राह्मणीकृतसुरापाने तु न मरणान्ति २६
कं सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेदित्यादिवचने अनुपनीतब्राह्मणस्यापरिणीतब्राह्मण्याश्च द्विजत्वेन मरणा

न्तिकप्रायश्चित्तोपदेशात् । न वायं द्विजशब्दो ब्राह्मणमात्रोपलक्षकः मुख्यत्वे नैवोपपत्तावुपलक्षणत्वे प्रमाणाभावात् । ननु निषे
धविषयोयं प्रायश्चित्तोपदेशो निषेधश्च जातिमात्राश्रय एवं तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति । अतः कथं नोपल
क्षणत्वमिति । न । सुरा पेया न च द्विजैरिति द्विजोल्लेखेनापि निषेधदर्शनादेतन्निषेधविषय एव मरणान्तिकप्रायश्चित्तविधि
र्लविष्यति । तेनानुपनीतब्राह्मणस्यापरिणीतब्राह्मण्याश्च व्रतरूपमेव प्रायश्चित्तं । न चैवं सति पुरोडाशं चतुर्द्धा करोति आग्ने
यं चतुर्द्धा करोतीतिवत् तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्यत्र ब्राह्मणशब्दस्यापि द्विजपरत्वे निषेधाभावात् कथं
व्रतरूपमपि प्रायश्चित्तं । तथा च मनुः । शूद्रेण हि समस्तावद्यावद्वेदे न जायते । कृतोपनयनस्यास्य व्रतादेशनमिष्यते । नत्वाक्र
माराः सितदक्षाः । जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः । स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः । तस्मात्तस्पेतथा पेयेवा
च्यावाच्ये तथानृते । अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते । उपनीतस्य दोषोस्ति क्रियमाणे विगर्हिते । तथा च कुमाराः मद्यस्य
पुरीषाणां लक्षणेनास्तिकस्य नादोषस्त्रूवत्सरान्यच ऊर्द्ध्वमपितो । गौतमोप्याह प्रागुपनयनात् कामचारः कामवादः का

Indira Gandhi National
Centre for the Arts

मलत्वादिति। ननु कथमनुपनीतस्यापि निषेधविषयत्वमिति। उच्यते। लवेदेवं यदि जातिमात्राश्रयो निषेधो न संभवेत्। तथा च कुमाराणां सु
रापाननिषेधश्च जात्याश्रय इति स्थितिः। अनेनैव तस्माद्ब्राह्मणो जन्मनैव श्यश्च न सुरां पिबेदित्येतद्वचनविषया निषेधस्यजा
तिमात्रोपसंहृतत्वात्तत्रापि यं च उद्धीकरोतीत्येतन्न्यायेनोपनीतमात्रविषयोपसंहारः संभवति। नैनद्द्विविधोयं सुरापाननिषेधः सं
भवति द्विजसंबंधिविषयतया जातिमात्रसंबंधिविषयतया च। तत्र द्विजसंबंधिनिषेधे मरणान्तिकप्रायश्चित्तविधिः। तस्य हि
जोह्येव नैव विहितत्वात्। जातिमात्रसंबंधिनिषेधे तु साधारणमापस्तम्बेन स्तेयं कृत्वा सुरां पीत्वा गुरुदारांश्च गत्वा चतुर्थकाला
हारः स्त्रीन् त्रिवर्षैः पापं नुदतीति यत्प्रायश्चित्तमुक्तं तदेतेन योजनीयम्। अनेनैव पञ्चविंशदधिकं शतवर्षेणोक्तमित्रि। एतच्च प
ञ्चवर्षादूर्ध्वं ज्ञानतः अज्ञानतस्त्वर्धं। पञ्चवर्षादर्वाक् ज्ञानाज्ञानात्वात्सकलपातकाभावप्रतिपादकनानावचनदर्शना
द्वानित्यमर्धमेव प्रायश्चित्तं द्रष्टव्यमेव। अनुपनीतस्य स्वयं प्रायश्चित्ताचरणासामर्थ्यान्न्वीदीयभ्रात्रादिभिरेव तदर्थं प्रा
यश्चित्तं कर्तव्यम्। तदुक्तम्। ऊनैकादशवर्षस्य पञ्चवर्षाधिकस्य वा प्रायश्चित्तं पिता कुर्यादज्ञातो वान्यः सुहृज्जनः। ततो न्यू २७

नतरस्यास्य नापराधो न पातकं न चास्य राजदंडो न प्रायश्चित्तं नाविद्यते। न च पञ्चवर्षात्प्रागूर्ध्वं भ्रात्रादीनां प्रायश्चित्तोपदेशात्पञ्च
वर्षपर्यन्तं भ्रात्रादिभिः प्रायश्चित्तं न करणीयमिति वाच्यम्। यतः पञ्चवर्षादूर्ध्वं भ्रात्रादिभिः प्रायश्चित्तं करणीयमित्युक्तमेव। य
दा तु पञ्चवर्षपर्यन्तमपि प्रायश्चित्ताधिकारस्तदा तदपि प्रायश्चित्तं सामर्थ्याविशेषाद्भ्रात्रादिभिरेव करणीयमिति। तेनानुप
नीतस्य बालस्य यानि दोषाभावप्रतिपादकानि नानामुनिवचनानि तानि सुरापानव्यतिरिक्तेतरपापविषयाण्येव सुरापान
निषेधस्य जात्याश्रयत्वस्थितिरिति कुमारवचनात्। अतो यदपि कुमारेणोक्तं मद्यमूत्रपुरीषाणां भक्षणे नास्ति कश्चन दो
षस्तु वत्सरान्नाच्च कर्त्वं पित्रोः सुहृद्गुरोरिति। तदपि सुराव्यतिरिक्तेतरमद्यपानदोषाभावप्रतिपादनार्थमेव बोद्धव्यम्। एतेन यद
पि गौतमेनोक्तं मद्यं नित्यं ब्राह्मणस्येति तदपि सुरामद्यातिप्रायेणैव द्रष्टव्यम्। तेनानुपनीतस्य ब्राह्मणस्यापि परिणीता याश्च
ब्राह्मणाय थोक्तं व्रतरूपं महाप्रायश्चित्तं न तु मरणान्तिकमेवेति सिद्धम्। कामतोऽभ्यासे न सुरां तां डल्यजलपाने द्वादशाहं तु भै
नव्रह्मसुवर्चलापानं गायत्र्यष्टसहस्रजपश्च। तथा च ट्टहयमः। सुरालांडच्छितामापो यदि कश्चिद्द्विजः पिबेत्। द्वादशाहं तु

Indira Gandhi National Centre for the Arts

प्रा· क्षीरेणपिबेद्वालीसुवर्चलां।गायत्र्यष्टसहस्रञ्चजप्यंकुर्वीतमानसमिति।यत्तुबृहद्विष्णुनोक्तं।आपःसुराभाजनस्थाःपीत्वास
२८ प्तरात्रंशंखपुष्पीश्रृतंपयःपिबेत्।तत्कामतःसकृत्पानविषयं।यच्चमनुनोक्तं।आपस्सुराभाजनस्थामद्यभांडस्थितास्तथा।प
ञ्चरात्रंपिबेत्पीत्वाशंखपुष्पीश्रृतंपयः।तदकामतोभ्यासेनपानेसतिद्रष्टव्यं।यच्चशातातपेनोक्तं।सुराभांडोदकपानेछर्द
२८ नंघृतप्राशनमहोरात्रोपवासश्चेति।तदकामतःसकृत्पानविषयं।यत्तुबौधायनेनोक्तं।सुरापाणस्ययोभांडेअपःपर्यु
षिताःपिबेत्।शंखपुष्पीविपक्वेनषडहंक्षीरेणवर्तयेदिति।तदकामतएवसुराभांडस्थितपर्युषितजलसकृत्पानविषयं।
सर्वंचैतच्छुद्धसुराभांडस्थितजलपानविषयंद्रष्टव्यं।आर्द्रसुराभांडस्थितजलपानेतुपूर्वोक्ततक्रादिमिश्रितसुरापानव
त्वत्वमेव।इतिसुरापानप्रायश्चित्तम्।इदानींब्राह्मणस्येतरमद्यपानप्रायश्चित्तंनिरूप्यते।तत्रकामतोमद्यपानेकृच्छ्रातिकृ
च्छ्रपूर्वकंघृतप्राशनंपुनस्संस्कारश्चेति।तथाचवसिष्ठः।मत्यापानेत्वसुरायाःकृच्छ्रातिकृच्छ्रौघृतप्राशनंपुनस्संस्कारश्चेति। २८
तत्रकृच्छ्रेधेनुरेका।अतिकृच्छ्रेधेनुद्वयं।द्वाभ्यांधेनुत्रयं।अकामतस्तुमद्यपानेतिकृच्छ्रपूर्वकंपुनस्संस्कारकरणंविप्राणांभोजन २८

ञ्च।तथाचबृहस्पतिः।पीत्वाप्रमादतोमद्यमतिकृच्छ्रंचरेद्द्विजः।कारयेत्पुनस्संस्कारंशक्त्याविप्रांश्चभोजयेत्।अनुपनीतस्यपुनरत्यन्ताभ्या
सेनकामतोमद्यपानेकृच्छ्रत्रयंमात्रादिभिःकरणीयं।तथाचजातूकर्ण्यः।प्रागुपनयनाद्बालोमद्यंमोहात्पिबेद्यदि।तस्यकृच्छ्रत्रयंकु
र्यान्माताभ्राताथवापितेति।इदंत्वपञ्चवर्षादूर्ध्वं।तदर्वाक्तुसुराव्यतिरिक्तमद्यपानेदोषाभावएव।तथाचकुमारवचनं।मद्यमूत्र
पुरीषाणांभक्षणेनास्तिकश्चन।दोषस्तुवत्सरान्पञ्चऊर्ध्वंपित्रोःसुहृद्गुरोरिति।एतच्चानुपनीतस्यस्वयंव्रतकरणाशक्तस्यतत्प
पुत्रशमार्थंमात्रादिभिःकर्तव्यमित्यर्थः।अथत्रिविधसुराव्यतिरिक्तमद्यभांडस्थितजलपानप्रायश्चित्तं।तत्रबृहद्यमः।मद्य
भांडस्थिताआपोयदिकश्चिद्द्विजःपिबेत्।कुशमूलविपक्वेनत्र्यहंक्षीरेणवर्तयेत्।तदकामतस्सकृत्पानविषयं।यत्तु
वसिष्ठेनोक्तं।मद्यभांडस्थिताआपोयदिकश्चिद्द्विजःपिबेत्।पद्मोदुम्बरबिल्वानांपलाशस्यकुशस्यच।एतेषामुदकंपी
त्वात्रिरात्रेणैवशुध्यति।इदमकामतोभ्यासविषयं।यत्तुबृहस्पतिनोक्तं।मद्यभांडस्थिताअपःपीत्वापञ्चरात्रंशंखपुष्पी
श्रृतंपयःपिबेदिति।तत्कामतःसकृत्पानविषयं।यच्चशंखेनोक्तं।मद्यभांडस्थिताअपःपीत्वासप्तरात्रंव्रतीभवेदिति।तत्का

Indira Gandhi National
Centre for the Arts

प्रा॰ मतोऽस्यासविषयं। व्रतश्चात्रपयोभक्षणमात्रमभिप्रेतं। सर्वत्रवाच अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः। प्रायश्चित्तार्द्धमर्ह
२८ ति स्त्रियो रोगिण एव चेति वचनाद्बालानामर्द्धप्रायश्चित्तं। बालश्चैकादशवर्षादूर्द्ध्वं षोडशवर्षपर्यन्तं। पंचवर्षाधिकस्यैका
दशवर्षपर्यन्तं पादमात्रं। पंचवर्षपर्यन्तं तु प्रायश्चित्ताभावएव। इदानीमितरापेयप्रायश्चित्तं निरूप्यते। तत्र चंडालोदक
तांडस्थजलपाने अंगिराः। चंडालोदकतांडेषु यः पिबेत्तृषितो जलं। तत्क्षणात्तस्य शुद्ध्यर्थं प्राजापत्यं समाचरेत्। यदि वा तु धृतं
तोयं शरीरे तस्य जीर्यति। तदा विप्रः सुवर्णस्य अर्धकृच्छ्रं सान्तपनं चरेत्। चंडालसंबंधिजलपाने हारीतः। चांडालस्य तु पानीयं
ब्राह्मणः कृ यदा पिबेत्। षड्रात्रोपोषितो भूत्वा पंचगव्येन शुध्यति। इदमपि पीतोद्गारितविषयं। अनुद्गारिते षड्रात्रोपवासः
सान्तपनस्य च गव्य चेति द्रष्टव्यं। एतच्च ब्राह्मणविषयं। क्षत्रियवैश्यशूद्राणां तु पादपादह्रासो द्रष्टव्यः। चांडालोपभुक्तशेष
जलपाने षट्त्रिंशन्मतं। चांडालोपभुक्तमुदकं निपेव्य विप्रः षट्त्रिंशदहानि कृच्छ्रमनुतिष्ठेत्। चतुर्विंशतिं क्षत्रियो वैश्यो द्वा
दश शूद्रः षडिति। एतदपि पीतोद्गारितविषयं। अनुद्गारिते तु सर्वत्र सान्तपनाधिकं द्रष्टव्यं। चांडालस्पृष्टजलपाने अ २९

ङ्गिराः। यस्तु चंडालसंस्पृष्टं पिबेत्तोयमकामतः। स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः। चंडालकृततडजलपाने आपस्तम्बः।
चांडालकूपभांडेषु यस्त्वज्ञानाज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते। चरेत्सान्तपनं विप्रः प्राजापत्यं तु भूमिपः।
तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत्। सर्वत्रात्र विषयगौरवात्सान्तपनशब्देन महासान्तपनमभिप्रेतं। तांडतत्र धेहद्वयं। चंडा
महासान्तपनञ्च त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः। महासान्तपनश्चैतत्स
र्वपापप्रणाशनं। एतच्च पंचदशाहसाध्यं महासान्तपनं। संस्पृष्टकूपजलपाने अंगिराः। चंडालतांडसंस्पृष्टं पिबेच्चेत्कूप
तो जलं। गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति। चंडालपतितादिपरिगृहीतवापीकूपतडागादिजलपाने उपपंचगव्यम
तं तथा च प्रचेताः। चंडालपतितादिपरिगृहीतवापीकूपतडागादेरुदकपाने पंचगव्यमात्रं। सर्वं चेदमकामतः। कामतो द्वै
गुण्यमिति। रजकाद्यन्त्यजतांडस्थोदकपाने तु पराशरः। तांडस्थितमलोऽस्पानामापो दधि पयः पिबेत्। ब्राह्मणः क्षत्रियो
वैश्यः शूद्रश्चैव यथाक्रमात्। ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः। शूद्रस्य चोपवासेन दद्याद्दानं च शक्तितः। चतु

Indira Gandhi National Centre for the Arts

प्रा॰ शङ्कितः।चतुर्दश्यामुपवासंकृत्वायथाविहितपञ्चगव्यपानेनअस्पृश्यस्रोतवति।रजकाद्यस्पृश्यजलसंवर्धिततोयपानेत्वापस्तम्बः।अ
३॰ न्त्यानांचपिबेत्तोयमन्त्यजस्यद्विजोयदि।त्रिरात्रोपोषितोभूत्वापञ्चगव्येनशुध्यति।तथाचाहाऽस्पृश्यजैःखानिताःकूपास्तडागानिज
थैवच।एषुस्नात्वाचपीत्वाचपञ्चगव्येनशुध्यति।आपत्कालेतुरजकादितोयपानेविशेषमाहबृहस्पतिः।अन्त्यानांचैत्पिबेत्तो
यंब्राह्मणोऽस्वस्थआपदि।अहोरात्रोषितःशुद्ध्येत्प्राणायामशतेनचेतिशूद्रोदकपानेतुविशेषमाहशातातपः।यदिविप्रः
प्रमादेनशूद्रतोयंपिबेत्स्वयं।आपाद्यस्थितंकथनवयेनशुद्धिमवाप्नुयात्।उपोष्यदिनत्वपञ्चानांपलाशस्यकुशस्यच।एते
षामुदकंपीत्वातेनशुद्धिमवाप्नुयात्।शूद्रपीतशेषजलपानेतुचतुर्विंशतिमतं।पीतशेषंतुयत्तोयंब्राह्मणःपिबतेऽनुनः।अ
पेयत्वेनस्येत्तोयंपीत्वाचान्द्रायणंचरेत्।यत्तुशंखेनोक्तं।पीतावशेषितंपीत्वापानीयंब्राह्मणःक्वचित्।त्रिरात्रंतुव्रतंकुर्याद्
वामहस्तेनवापुनरिति।तद्ब्राह्मणपीतावशेषितोदकपानविषयं।वामहस्तेनवापुनरितिसोऽत्राद्वामहस्तोद्धृतजलपानवि ३०
षयं।तथाचशातातपः।वामहस्तेनवोद्धृत्ययोनरःपिबतेजलं।सुरापानसमंतस्यमनुराहप्रजापतिः।एवंपात्रान्तरस्थमशुद

कंदक्षिणहस्तेनैवोद्धृत्यपातव्यंनतुवामहस्तेन।तथाचपुलस्त्यः।शंखशुक्तिकरंकाश्चयद्यान्यत्पानभाजनं।दक्षिणेनैवतत्तूर्ध्य
न्नवामेनकथञ्चन।तथा।करेणतुपिबेत्तोयंयावन्मासंनलक्षयेत्।मांसलिप्तकरेतोयंतुल्यंगोमांसभक्षणैः।अत्रसर्वत्रातु
कूपाद्यस्थितेभाण्डायामशतमेवकरणीयं।तथाचशङ्खः।वामहस्तस्थितेदर्लेदक्षिणेनोदकंपिबेत्।रक्तपानंतवेत्तस्यपी
त्वाचांद्रायणंचरेत्।तथाङ्गिराः।हत्वयित्वाद्विजन्मार्गस्मृतिंस्थाजलंपिबेत्।कृपोष्यरजनीमेकांपञ्चगव्येनशुध्यति।
तथाचहारीतः।मत्स्यकंटकशंबूकशंखशुक्तिकपर्दकान्।पीत्वानवोदकंचैवपञ्चगव्येनशुध्यति।शवदूषितकूपोद
कपानेत्वापस्तम्बः।यस्तुकूपात्पिबेत्तोयंब्राह्मणःशवदूषितात्।कथंतस्यविशुद्धिःस्यादापस्तंबोऽब्रवीन्मुनिः।उच्छिन्नेतिन्न
क्लिन्नेचकेवलेशवदूषिते।त्रिरात्रमुपवासःस्यात्पञ्चगव्येनशुध्यति।इदंचकामतः।नक्लिन्नेननभिन्नेनकेवलंशवदूषि
ते।पीत्वाकूपादहोरात्रंपञ्चगव्येनशुध्यति।इदंचाकामतः।तथाचदेवलः।क्लिन्नोभिन्नःशवश्चैवकूपस्थोयदिदृश्यते।
पयःपिबेत्त्रिरात्रंतुमानुषेद्विगुणंस्मृतमिति।इदंचकामतः।तथाचापस्तंबः।क्लिन्नेभिन्नेशवेचैवतत्रस्थेयदितत्पिबे

Indira Gandhi National
Centre for the Arts

प्रा॰ तापराकेणविशुद्धिःस्याद्ब्राह्मणानान्तुभोजनात्।इदञ्चकामतोल्पासेसतिद्रष्टव्यं।कूपेविण्मूत्रसंसृष्टेपीत्वातोयंद्विजो
३१ त्तमः॥त्रिरात्रेणविशुध्येत्तुकुम्भेसान्तपनञ्चरेत्।सान्तपनञ्चात्रमहासान्तपनमतिप्रसंगविषयत्वात्।तथाचबृहद्विष्णुः
जलाशयेष्वथाल्पेषुस्थावरेषुमहीतले।कूपवत्कथिताशुद्धिर्महत्सुनतुदूषणं॥इति।वापीकूपतडागेषुदूषि
तेषुविशोधनं।घटानांशतमुद्धृत्यपञ्चगव्यंततःक्षिपेत्॥अथापेयक्षीरपानप्रायश्चित्तंनिरूप्यते।तत्रमनुः।अनि
र्दशायागोःक्षीरमौष्ट्रमैकशफंतथा।आविकंसन्धिनीक्षीरंविवत्सायाश्चगोःपयः।आरण्यानाञ्चसर्वेषांमृगा
णांमहिषींविना।स्त्रीक्षीरञ्चैववर्ज्यानिसर्वशुक्तानिचैवहि।दधिभक्ष्यञ्चशुक्तेषुसर्वञ्चदधिसंभवं।लोहितान्वृक्षनि
र्यासान्व्रश्चनप्रभवांस्तथा।शेलुंगव्यञ्चपीयूषंप्रयत्नेनविवर्जयेत्।अनिर्दशायागोरित्युपलक्षणमजामहिष्यो
रपिद्रष्टव्यं।तथाचगौतमः।गोश्चक्षीरमनिर्दशायाःसूतके।अजामहिष्योश्चेति।स्यन्दिनीस्वयंक्षीरस्राविणी।शु ३१
क्तंस्वतावमधुरंगुडाद्यन्नेनोपगतं।तद्वद्दधिव्यतिरिक्तमतत्संभवं।द्रव्यान्तरमिश्रितन्तुभक्ष्यमेव।तथाचगौतमः।

गोश्चक्षीरमनिर्दशायाःसूतके।अजामहिष्योश्चेति।स्यन्दिनीस्वयंक्षीरस्राविणी।शुक्तंस्वतावमधुरंगुडाद्यन्नेनोप
गतम्।तद्वद्दधिव्यतिरिक्तमतत्संभवं।द्रव्यान्तरमिश्रितन्तुसद्भक्ष्यमेव।तथाचगौतमः।शुक्तंकेवलमदधीति।व्रश्चनप्रभ
वाः।लोहितान्वृक्षनिर्यासानितिसामानाधिकरण्यं।शेलुंवक्रवारफलंश्लेष्मात्मकंबोध्यं।तथाचबृहद्विष्णुः।स्य
न्दिनीसन्धिनीविवत्साक्षीरममेध्यभुजश्च।सन्धिनीगृहीतगर्भा।अमेध्यभुजोमद्यादिलक्षणशीलायाः।तथा
चापस्तम्बः।क्षत्रियश्चैवहन्तव्योवैश्यःशूद्रस्तथापुनः।यःपिबेत्कापिलंक्षीरंनततोन्योस्तिपापकृत्।अत्रप्रायश्चि
त्तमाहशंखः।लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथा।केवलानिचशुक्तानितथापर्युषितानिच।गुडपकंसकृ
द्भुक्त्वात्रिरात्रव्रतमाचरेत्।त्रिरात्रव्रतंत्रिरात्रोपवासएव।अत्रपर्युषितशब्देनशाकलक्षस्नेहमांसमधुवर्जिता
न्यभिप्रेतानि।तथाचगौतमः।पर्युषितमशाकलक्षस्नेहमांसमधूनीति।एतदन्नमणोऽशेषेषूपवसेदहरिति।
मनुवचनादेकरात्रोपवासः।इदमकामतोद्रष्टव्यंकामतोद्विगुणमिति।यत्तुशंखेनोक्तंदीर्णधान्यंस्यात्ति।

प्राय·
३२

तद्विकाराशने तु च ।। सप्तरात्रं व्रतं कुर्याद्यदेतत् परिकीर्तितमिति ।। तत्कामतोत्यन्ताभ्यासविषयं ।। इत्यपेयपानप्रायश्चित्तं ।।
अथाभक्ष्यभक्षणप्रायश्चित्तं निरूप्यते ।। तत्र चांडालान्नभक्षणे मध्यमांगिराः ।। अभ्यासे सायिनामन्नमश्नीयाद्यस्तु कामतः
। स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा ।। अत्र चांद्रायणतप्तकृच्छ्रयोर्विषमशिष्टत्वेन विकल्पासंभवात्समुच्च
यार्थो वाशब्दः ।। तेनायमर्थः ।। प्रथमं चांद्रायणं कृत्वानंतरं तप्तकृच्छ्रमपि कुर्यादिति ।। अत्र चांद्रायणे धेनुचतुष्टयं
तप्तकृच्छ्रे धेनुद्वयं ।।
मिलित्वा षड्धेनवः ।। इदमकामतः ।। कामतो द्विगुणमिति ।। यदि चोरादितिलयमुत्पाद्य कामश्चांडालान्नंतो
ज्पतेतदा चांद्रायणमेव ।। तथा च जैमिनिः ।। अस्यान्नतोऽज्पतेयस्तु चौरैर्म्लेच्छैस्तथाग्निकैः ।। प्रायश्चित्तं कथं तस्य व
र्णो वर्णो विधीयते ।। चांद्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् ।। प्राजापत्यं चरेद्वैश्यस्त्रिरात्रं च वर्णयोः स्तु स्पर्शाः ।। सांत ३२
पनस्यात्र विषयगौरवात् सांतपनं तत्र धेनुद्वयं ।। इदमज्ञानतः ।। ज्ञानतो द्विगुणं ।। यत्तु हारीतेनोक्तं

चांडालान्नं भुक्त्वा त्रिरात्रमुपवसेदिति ।। तदसिद्धतंडुलादिलक्षणविषयं यत्तु तेनैवोक्तं सिद्धं भुक्त्वा पराकं कुर्यादिति ।। तद
कामतो भुक्तोद्गारितविषयं ।। अत्र पराके धेनुद्वयं ।। यत्तु शंखलिखिताभ्यामुक्तं चांडालपुल्कसानां तु भुक्त्वा गत्वा च योषितं ।। कृ
च्छ्राब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति ।। तदत्यन्ताभ्यासविषयं ।। एतच्चांडालीगमनप्रायश्चित्ते रेतःसेकात्कृ
र्वमित्यगम्यागमनपरिच्छेदे व्याख्यास्यामः ।। वरुणलस्पृष्टान्नभोजने तु प्राजापत्यं तथा चांगिराः ।। चांडालस्पृष्टमन्नं तु यो
ऽश्नीयाद्ब्राह्मणः क्वचित् ।। तस्य शुद्धिं प्रवक्ष्यामि प्राजापत्येन नित्यशः इति ।। तथा स्वल्पयमः ।। कापालिकान्नभोक्तॄणां
तन्नारीगामिनां तथा ।। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति ।। रजकाद्यन्त्यजान्नभक्षणे तु चांद्रायणं ।। तथा चाप
स्तंबः ।। रजकव्याधशैलूषवेणुचर्मोपजीविनां ।। यो भुंक्ते ब्राह्मणश्चान्नं शुद्धिश्चांद्रायणेन तु ।। चांद्रायणे धेनुचतु
ष्टयं ।। इदं चाकामतः ।। अकामतस्त्वर्द्धमिति ।। तथा शूद्राद्यन्नभक्षणे विशेषमाहापस्तंबः ।। शूद्रस्यान्नमथवान्नं
क्षमांसमकामतः ।। भुक्त्वा कृच्छ्रं चरेद्विप्रो ज्ञानात्कृच्छ्रद्वयं चरेत् ।। ब्राह्मणस्य तु वैश्यान्नभोजने एतदेव पादहीनं·

प्राय क्षत्रियान्नंतद्वर्णेद्विपादहीनं।एवंक्षत्रियस्यशूद्रान्नभोजनेपादहीनं।वैश्यान्नंतद्वर्णेद्विपादहीनं।वैश्यस्यापिशूद्रान्न
३२ तद्वर्णेद्विपादहीनमित्यूहनीयं।आपत्कालेतुशूद्रान्नंतद्वर्णेविशेषमाहपराशरः।आपत्कालेतुविप्रेणभुक्तंशूद्रगृ
हेयदि।मनस्तापेनशुद्ध्येतद्रुपदांवाशतंजपेत्।शूद्रेराजनस्याप्रतद्वर्णेतुप्रायश्चित्तमाहापस्तम्बः।शूद्राणांतुराज
नेभुक्त्वाब्राह्मणस्यप्रमादतः।उपोष्यरजनीमेकांपंचगव्येनशुद्ध्यति।इदमकामतः।कामतोद्विगुणमिति।शूद्रा
न्नस्तद्वर्णेतुदोषान्तरमाहहारीतः।उपोष्यरजनीमेकांमस्तुकंतुपक्वंस्नेहपक्वमपापसंदधिसक्तवः।एतान्यशूद्रान्नभुजो
भोज्यानिमनुरब्रवीत्।तथाचापस्तम्बः।आममन्नंदधिघृतंधानाःक्षीरंतथैवच।गुडमांसरसाद्यानिहत्वेनापिशू
३ द्रतइति।शूद्रस्यैवचर्मकाराद्यन्त्यजान्नंतद्वर्णेविशेषमाहापस्तम्बः।शूद्रोऽन्त्यजातीनांकथञ्चिद्भुक्त्वान्नादि।अहोरात्रो
षितोस्नात्वादानंदत्त्वाविशुद्ध्यति।इदमकामतः।कामतोद्विगुणं।ब्राह्मणस्यचनटनर्तकचर्मकारस्वर्णकारादिव्यापा ३३
रजीविनोऽन्नंभुक्त्वाब्राह्मणःप्राजापत्यंचरेत्।तथाचबृहद्यमः।नटनर्तकतक्षाणःस्वर्णकारःसुवर्णकृत्।शौण्डिकाःका

ण्डिकाःशुण्डश्चतोज्यान्नाःप्रकीर्तिताः।कर्मारःकार्मिणश्चैवसूचकाःपेचकास्तथा।वक्रोपजीवीरजकःकैवर्त्तश्चि
त्रकारस्तथा।ध्वजोपजीविनश्चैवशूद्राध्यापकयाजकाः।चित्रोपजीवीशिल्पीचवार्धुषीब्रह्मविक्रयी।हस्त्याश्वमीन्तथाय
स्पादाश्रमाणांचभेदकः।पुण्यविक्रयिकोयश्चयोनिसंकरजश्चयः।रङ्गोपजीवीकुंडाशीपरिवित्तिश्चवीरहा।भिषजो
गरदश्चैवलग्नजीवीतथैवच।कर्मच्युतेचयोमोहाद्ब्राह्मणोवर्त्ततेसदा।प्रायश्चित्तेत्वनाचीर्णेपरिहार्योचवेत्सतं
तेषांतुब्राह्मणोभुक्त्वाकृत्वाचैवप्रतिग्रहं।प्राजापत्येनशुद्ध्येतततःपापान्नसंशयः।इदंचकामतः।अकामतस्त्वर्द्धमेव।तथाच
मनुः।भुक्त्वातोन्यतमस्यान्नममत्याक्षपणंत्र्यहं।मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेति।तथाशातातपः।क्लीबाति
शम्यपतितैःसूतिकोदक्यानास्तिकैः।दृष्टमन्नंनदत्तंतुतस्यनिष्कृतिरुच्यते।तद्भुक्त्वोपवसेद्रात्रिंतत्संसृष्टेचतुर्गुणं।(?)
छिष्टेषड्गुणंप्रोक्तंमस्यासेऽष्टगुणंस्मृतं।तथाव्यासः।स्नानार्हंस्नानयदास्नानमकृत्वाश्नातिवैद्विजः।अहोरात्रोषितःस्ना
त्वापञ्चगव्येनशुद्ध्यति।रजकादिस्पर्शेचाचमनार्हस्यानाचम्यपानेतद्वर्णेचसंवर्त्तः।अनाचान्तःपिबेत्तोयंयदिवान

Indira Gandhi National
Centre for the Arts

प्रा.
३४
न्तये द्विजाः। शतानि त्रीणि गायत्र्याः प्रायश्चित्तं विशोधनं। तथा पराशरः। सूत्रोच्चारे द्विजः कृत्वा अकृत्वा शौचमात्मनः। मोहाद्भु
क्त्वा त्रिरात्रं तु यवान् पीत्वा विशुध्यति। तथा च शातातपः। अथ भोजनकाले चेदशुचिर्भवति द्विजः। भूमौ निक्षिप्य तं ग्रासं स्ना
त्वा विप्रो विशुध्यति। भक्षयित्वा तु तं ग्रासमहोरात्रेण शुध्यति। अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुध्यति। तथा च तत्रापि
मतः। पिबतो यत्पतेत्तोयं भाजने मुखनिःसृतं। अभोज्यं तद्भवेदन्नं भुक्त्वा चान्द्रायणं चरेत्। तथा हारीतः। द्विनायज्ञो
पवीते नष्टे भग्ने च ब्राह्मणो यदि। स्नानं कृत्वा जपं कुर्यादुपवासेन शुध्यतीति। अथोच्छिष्टभोजनप्रायश्चित्तं। त
त्र शंखः। ब्राह्मणोच्छिष्टभोजने महाव्याहृतिभिरभिमन्त्रिता आपः पिबेत्। क्षत्रियोच्छिष्टभोजने ब्राह्मीरसवि
पक्वेन त्र्यहं क्षीरेण वर्तयेत्। वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्रह्मसुवर्चलां पिबेत्। शूद्रोच्छिष्टभोजने षड्रात्र
मभोजनमिति। यच्चापस्तम्बेनोक्तं। ब्राह्मणस्य परोच्छिष्टभक्षणात्पानतो द्विजः। अहोरात्रं च गायत्र्या जपं कृ
त्वा विशुध्यतीति। तद्दीनब्राह्मणोच्छिष्टभोजनविषयं। तथा च बृहद्यमः। मातावातृगिनीनां पितापत्न्याश्च ये ३४
ने

पितुः। नप्तादिसहृद्भोक्तवं भुक्त्वा चान्द्रायणं चरेत्। समानजातीयतापर्यायं विशेषमाहाङ्गिराः। ब्राह्मणस्य सहायोन्नीयात्तु
च्छिष्टं वा कथंचन। तत्र दोषं न मन्यन्ते सर्व एव मनीषिणः। आपस्तम्बस्तथा। अन्येषां भुक्तशेषं तु भक्षयित्वा द्विजातयः।
चान्द्रायणं तदर्धं वा प्रैषद्वं च विशां विधिरिति। अथोच्छिष्टस्पर्शादि। तत्राकामतः कामतो द्विगुणमिति। तथा चाङ्गिराः। चा
ण्डालपतितादीनामुच्छिष्टस्य च संस्पर्शे द्विजः स्पृष्टो वाकेणार्द्धकृच्छ्रेण शुध्यति। इदमकामतः। कामतो द्विगुणं। तथा च
मनुः। बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्रह्मसुवर्चलां। तथा च बृहद्बृहस्पतिः। श्वविडा
लजम्बुकाश्वखरासतोच्छिष्टभोजने प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति। यत्तु शंखेनोक्तं शुनोच्छिष्टं तथा भुक्त्वा मा
समेकं व्रती भवेत्। काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेदिति। तत्कामतोऽभ्यासविषयं। तथा च बृहद्यमः। उ
दक्यया तु यत्स्पृष्टं गवाघ्रातं च यद्भवेत्। काककुक्कुटसंस्पृष्टं शुक्तं वा कृमिसंयुतं। अभोज्यं तद्द्विजातीनां धर्मराजव
चो यथा। तथा च देवलः। विशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः। केशलोमनखैर्वापि दूषितं परिवर्जयेत्। तथा

Indira Gandhi National
Centre for the Arts

श्रा॰ वमनुः।केशकीटावपन्नंचपदास्पृष्टंचकामतः।भ्रूणघ्नावेक्षितंचापिसंस्पृष्टंचाप्युदक्यया।पतत्रिणावलीढंचपतत्रु
३५ नासंस्पृष्टमेवच।गवाचान्नमुपघ्रातंघुष्टान्नंचविशेषतः।गणान्नंगणिकान्नंचविदुषांचजुगुप्सितं।भुक्त्वातोन्यतम
स्यान्नममत्याक्षपणंत्र्यहं।मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेति।अत्रानन्तरोक्तदुष्टदोषदुष्टान्नभक्षणेसंवत्सर
मध्येपानापत्यंप्रायश्चित्तंज्ञाततोयथोक्तविशेषप्रायश्चित्तं।तथाचमनुः।संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः।
अज्ञातभुक्तशुद्ध्यर्थंज्ञातस्यतुविशेषतइति।अथसूतकसूतकाशुद्ध्यान्नभक्षणेप्रायश्चित्तं।तत्रमार्कंडेयः।भुक्त्वा
तुब्राह्मणाशौचेचरेत्सांतपनंद्विजः।अत्रयाज्ञवल्क्येनोक्तंसांतपनंत्र्यहसाध्यंग्राह्यं।तथाचयाज्ञवल्क्यः।भुक्त्वा
तुक्षत्रियाशौचेतथाकृच्छ्रोविधीयते।वैश्याशौचेतथाभुक्त्वामहासांतपनंचरेत्।अत्रधेनुद्वयं।शूद्राशौचेतथा
भुक्त्वाद्विजश्चांद्रायणंचरेत्।अत्रधेनुचतुष्टयं।इदंकामतः।अकामतस्तदर्धं।आशौचेयस्ययोभुंक्तेसोप्यशुद्धस्तथा
तदेवावत्।यावदशौचंतुतस्याशौचंप्रकीर्तितं।तस्याशौचव्यपगमेप्रायश्चित्तंसमाचरेदिति।एकादशाहवारशा ३५

हादिश्राद्धभोजनेप्रायश्चित्तमाहशंखः।चांद्रायणंनवश्राद्धेपराकोमासिकेमतः।पक्षत्रयेतिकृच्छ्रंस्यात्षण्मासेकृच्छ्रमेवच।
आब्दिकेपादकृच्छ्रंस्यादेकाहस्तुनराब्दिके।उत्तराब्दिकशब्देनवार्षिकश्राद्धाद्द्वितीयेहनियच्छ्राद्धंतदुच्यते।तदुक्तं।पू
र्वेद्युर्वार्षिकंश्राद्धंपरेद्युरुत्तराब्दिकमिति।तथाचाङ्गिराः।याजकान्नंनवश्राद्धंसंग्रहेचैवभोजनं।नारीप्रथमग
र्भेचभुक्त्वाचांद्रायणंचरेत्।संग्रहभोजनंगणान्नभोजनं।नारीप्रथमगर्भःपुंसवनं।भिन्नकांस्यभोजनेत्वापस्तंबः
भिन्नकांस्येतुयोविप्रोयदिभुंक्तेतुकामतः।उपवासेनचैकेनपञ्चगव्येनशुद्ध्यति।अथलशुनादिभक्षणेप्रायश्चित्तं
निरूप्यते।तत्रवृद्धहारीतः।लशुनंकवकंचैवपलांडुंगृंजनंतथा।चत्वार्यज्ञाततोजग्ध्वातप्तकृच्छ्रंचरेद्द्विजः।अत्र
धेनुद्वयं।तथाछत्राकंविड्वराहंचलशुनंग्रामकुक्कुटं।गृंजनंकवकान्भुक्त्वाद्विजश्चांद्रायणंचरेदिति।इदंच
कामतः।यत्तुवृद्धहारीतेनोक्तं।लशुनपलांडुगृंजनछत्राकलशुनेवाचांद्रायणं।प्रायश्चित्तान्तेपुनःसंस्कारंकुर्यादि
ति।तत्कामतोत्यन्ताभ्यासविषयं।तथाचवृद्धहारीतः।जुड्वार्ताककुंभीकाव्रश्चनघृतवारुणीवाक्षत्रणंशिग्रुकंचैव

Indira Gandhi National
Centre for the Arts

प्रा॰
३६

वस्तुरगुंकवकानिचाएतेषांलक्षणंकृत्वाप्राजापत्यंचरेद्द्विजः।तथाचापस्तम्बः।तद्दृयेद्यस्कनीलीचुभमादाशल्लणःक्वि
त्वाचान्द्रायणेनशुद्धिःस्यादापस्तम्बोब्रवीन्मुनिः।अनुक्तप्रायश्चित्तेतरनिषिद्धशाकमूलफलतक्षणेतुशेषेऽप्युपवसेदह
रितिमनुवचनादेकोपवासःप्रायश्चित्तमिति।अथालद्व्यमांसादिलक्षणप्रायश्चित्तं।तत्रप्रचेताः।श्वशृगालकाक
कुक्कुटदंष्ट्रिवानरशिशुमारक्रव्यादटकखरोष्ट्रगजवाजिविड्वराहगोमानुषमांसलक्षणेतुतप्तकृच्छ्रमादिशेदिति।एतेषां
मूत्रपुरीषलक्षणेत्वतिकृच्छ्रं।तप्तकृच्छ्रश्चात्रद्वादशाहसाध्योविवक्षितोविषयगौरवात्।नचतुरहःसाध्यइति।तप्तकृच्छ्र
तिकृच्छ्रयोर्व्रततरेदेपिचेतुसंकलनयाप्रत्येकंचेतुद्वयमेवाऽऽदद्दकामतः।यच्चेदंप्रचेतसोक्तं।श्वसृगालकाककु
क्कुटदंष्ट्रिक्रव्यादशिशुमारवानरखरोष्ट्रगजवाजिगोमानुषमांसलक्षणेचांद्रायणंचरेदिति।तत्कामतोभ्यास
विषयं।यच्चशंखेनोक्तंभुक्त्वाचोभयतोदन्तांस्तथाचैकशफानपि।दाष्ट्रिणश्चतथाभुक्त्वाषण्मासाव्रतमाचरे ३६
दिति।तत्कामतोत्यन्ताभ्यासविषयं।यच्चप्रचेतसोक्तंरेतोमूत्रपुरीषाणांप्राशनेचांद्रायणंपुनःसंस्कारश्चेति।

तदप्यत्यन्ताभ्यासविषयमेव।तथाचव्यासः।नकुलम्मूषकञ्चैवसर्प्पमाखुमेववा।विकृतांश्चैवमत्स्यांश्चजग्ध्वाकृच्छ्रंसमाचरेत्।
तथाहारीतः।तद्विपाणामथामममांसभक्षणेत्रिरात्रंपञ्चगव्यञ्चेति।इदंकामतोकामतश्चद्रष्टव्यं।तथाकात्यायनः।गोदृष्टैकश
फक्रौञ्चकलविङ्कशुकप्लवाः।लामोथवापमास्फःहंससारसटिट्टिभाः।बकबलाकादात्यूहश्येनवायसकोकिलाः।जीव
ञ्जीवकचक्राङ्कश्यामकुक्कुटसूकराः।शतपत्रमद्गुकरररज्जुदालकपिञ्जलाः।रक्तपादशुखोलूकटट्टिभचातकाः।चको
रसारिकाकंककोयाष्टिनखविष्किराः।खंजरीटककाकोलस्टकपारावतादयः।अलक्ष्याश्चाप्यविज्ञातायेचरक्तपरि
स्रवाः।मुक्त्वाचरखड्गशशकगोधाशल्लकिकच्छपान्।श्वाविधःपरिवर्ज्याःपञ्चनखागणाः।तथाचदेवलः।।
जलौकाशुक्तिशम्बूकशिशुकनखककर्कटाः।मत्स्याश्चविकृतानक्राः।सर्पशीर्षदरीशयाः।जालपादाश्चमार्जारि
तथापांडुकपीतकाः।हारीतोगवयश्चैवनैवतद्याद्द्विजातिभिः।अत्रैतानेवसङ्कीर्त्यात्रिएकरात्रोपवासोप्यत्रस्पष्ट
शाजपेयतिसुमन्तुनाप्यत्राश्चित्तमुक्तंनदकामतोतत्क्षणविषयंद्रष्टव्यं।यत्तुबृहद्विष्णुना।एतानेवसङ्कीर्त्यत्रिंभवत्पा

Indira Gandhi National
Centre for the Arts

प्रा॰ त्रिरात्रमुपवसेदित्युक्तं। तत्कामतो लशुनाविषयं। यत्तु मनुना। अतोऽन्यतमभुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव वा जग्ध्वा मांस
३२ मभक्ष्यञ्च सप्तरात्रं यवान् पिबेत्। इत्युक्तं तत्कामतो पलाण्ड्वादिविषयं। अनिषिद्धमत्स्यमांसभक्षणे तु दोषाभावात्
प्रायश्चित्ताभाव एव। यत्तु वृथा मांसं न तोऽकव्यं सोऽकव्यं श्राद्धकर्माणि। अन्यथा तत्र यदि विप्रः प्राजापत्यं समाचरेदिति
छागलेयेनोक्तं। यदपि मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेदिति याज्ञवल्क्योक्तं। यदपि नाद्यादविधिना मां
सं विधिज्ञोऽनापदि स्थितः। जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवश इति मनुनोक्तं। यदपि। श्राद्धे यदत्तं विधिनादे
वे चात्यर्थितो द्विजः। तथा चार्त्तो महारोगान्मांसं भुञ्जीत नान्यथेति। व्यासेनोक्तं। तत्सर्वं निषिद्धचतुर्दश्यादिति
थिविषयं। अन्यथा सामान्येनैवालम्पत्वे सति तिथिविशेषेषु निषेधस्यानर्थकत्वप्रसङ्गात्। किञ्च। मत्स्या
दिपरित्यागे फलश्रुतिरर्थलब्धत्वेनोपपद्यते। तथा च याज्ञवल्क्यः। सर्वान् कामानवाप्नोति हयमेधफलं तथा। ३२
गृहेऽपि निवसन् विप्रो मुनिर्मांसविवर्जनात्। अतोऽपि मत्स्यमांसभक्षणे दोषाभाव एवेत्यवगम्यते इति॥

यत्तु मनुनोक्तं। यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं। तद्ब्राह्मणेन नात्तव्यं देवानामश्नता हविरिति। तदप्याममांसादिप्रायेणै
व। आममांसस्यैव राक्षसान्नत्वेन नानागमेषु प्रसिद्धत्वादिति। इदानीं ब्रह्मचारिणोऽपपात्रे प्रायश्चित्तं निरूप्यते। तत्र
शातातपः। सूतकेऽपि यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत्पानीयमज्ञानात्समश्नीयात्स्पृशेत्तथा। पानीयपाने कुर्वीत प
ञ्चगव्यस्य भक्षणं। त्रिरात्रं भोजने प्रोक्तं स्पृष्टे स्नानं विधीयते। तथा बृहद्यमः। मधु मांसं च योऽश्नीयाच्छ्राद्धे सूतकमेव वा।
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत्। तथा बृहद्विष्णुः। आमश्राद्धाशने त्रिरात्रमुपवसेदिति। इदञ्च ब्राह्मणः कामम
श्नीयाच्छ्राद्धे व्रतमलोपयन्निति वचनेन ब्रह्मचारिणः श्राद्धभोजनस्याविहितत्वाच्छूद्रकृतश्राद्धादिविषयं। ब्राह्मणस्या
पि मासिकश्राद्धभोजने त्वाह बृहद्यमः। मासिकान्नं तु योऽश्नीयादसमावर्त्तनो द्विजः। त्रिरात्रमुपवासोऽस्य प्रायश्चित्तं
विधीयते। प्राणायामत्रयं कृत्वा घृतं प्राश्य ततः शुचिरिति। अत्र च मासिकश्राद्धेन प्रेतश्राद्धं सर्वमेवातिदेशेन द्रष्टव्यं।
तथा सुमन्तुः। ब्रह्मचारिणो लशुनपलाण्डुगृञ्जनकुम्भीकशावसूतकान्नरेतोविण्मूत्रमधुमांसामेध्यभक्षणे तप्तकृ

Indira Gandhi National Centre for the Arts

प्रा· ३८ क्षुप्तनस्पर्शनशयनश्चारंकामतः। तथा च वृद्धहारीतः। अनुच्छिष्टमश्नीयाद्ब्रह्मचारी कथंचन। स्नात्वा सौ नोपवासेन पञ्च
गव्येन शुध्यति। तथा हारीतः। उच्छिष्टं क्षत्रियविशोः शूद्रस्यापि कथंचन। ब्रह्मचारी यदाश्नीयात्तस्य शुद्धिः कथं भवेत्। उप
वासांस्त्रीन्समश्नाद्दशाहं पृथक् पृथक्। कृत्वा शुद्धिमवाप्नोति ब्रह्मचारी न संशय इति। क्षत्रियविट्शूद्रोच्छिष्टभोजने यथाक्र
ममेतद्द्रष्टव्यं। तथा लघुहारीतः। आमिषस्य तु यो लोडेपक्वमश्नाति मद्यतः। कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्तयेत्।
इदं ब्रह्मचार्युक्तप्रायश्चित्तं विधवादीनामपि मत्स्यमांसादिलक्षणे द्रष्टव्यं। इदानीं रहस्यकृतसुरापानादिप्रायश्चि
त्तं निरूप्यते। तत्र स्मृत्याह्निकप्रायश्चित्तविशेषानुपदेशात्कामतो मरणान्तिकमेव। अकामतस्तु रहस्यकृत
सुरापाने सकलमहापातकसाधारणं यन्मनुनोक्तं महापातकसंयुक्तोऽनुगच्छेत्समाहितः। अभ्यस्याब्दं पावमानी
र्भैक्षाहारो विशुध्यतीति। तदेवात्र द्रष्टव्यं। एतच्च ब्रह्मवधपरिच्छेद एव प्रपञ्चितं। यदप्यपरस्मात्तु नोक्तं अरण्ये वा त्रिरभ्य ३८
स्य प्रयतो वेदसंहितां। मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिरिति। तदपि सकलमहापातकसाधारणमेनासियु

क्तं गुरूणि लघूनि लघूनीति वचनानुसारेण तक्रादिमिश्रितोपलक्ष्यमानगंधसुरापानविषयं योजनीयं। यत्तु याज्ञवल्क्येनो
क्तं त्रिरात्रोपोषितो हुत्वा कूष्माण्डीभिर्घृतं शुचिः। सुरापः स्वर्णहारी च रुद्रं जप्या जले स्थित इति। तत्तक्रादिमिश्रितानुपल
क्ष्यमानगंधरससुरापानविषयं। सुरेतरमद्यपाने रहस्यकृते तु तारतम्यलक्षणेन लघुगुरुपापत्वेन प्राणायामशतादि
कमेवोहनीयं। तथा च मनुः। प्राणायामशतं कार्यं सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्य चैव हीति। इति र
हस्यकृतसुरापानादिप्रायश्चित्तं। इति बालबलरामभुजङ्गपरनाम्नो लह्लवदेवस्य कृतौ प्रायश्चित्तप्रकरणे र
हस्यसुरापाणपरिच्छेदः। इदानीं स्तेयप्रायश्चित्तं निरूपणीयं। महापातकत्वेन गुरुत्वात्प्रथमं स्वर्णस्तेयप्रायश्चित्तं निरू
प्यते। तत्रानिरूपिते स्तेयशब्दार्थे स्तेयप्रायश्चित्तानिरूपणात्प्रथमं स्तेयशब्दार्थ एव निरूप्यते। किमिदं स्तेयं नामेति। त
त्रान्यायेन परस्वग्रहणं स्तेयमिति तावल्लोकप्रसिद्धं। स्वत्वं च यथेष्टविनियोगार्हत्वं। ग्रहणं च स्वस्वत्वापादनं। तेन
परकीये यथेष्टविनियोगानर्हत्वमतिव्यतिरेकेणान्यस्य यथेष्टविनियोगार्हत्वापादनं स्तेयं। यथा क्रयणादिना

Indira Gandhi National Centre for the Arts

प्रा.
३९

पूर्वस्वामिनःस्वत्वविनाशेनोत्तरस्वामिनःस्वत्वापादनं।यथास्वविनियोगानिसंधानपूर्वकत्यागानान्तरसञ्चारणा।दिव्या
पारेणापूर्वस्वामिनःस्वत्वविनाशेनचोरस्यापिस्वत्वापादनं।नचैवंचोरस्यापिस्वत्वेसतिपूर्वस्वामिनःपुनर्द्रव्यग्रहणे
तस्यापिस्तेयित्वात्स्तेयदोषभागित्वमितिवाच्यं।चोरोत्पादितस्वत्वस्यद्रव्यस्यपूर्वस्वामिनोपुनःस्वत्वोत्पादनेदोषा
भावप्रतिपादनात्।तथाचनारदः।द्रव्यमस्वामिविक्रीतंपूर्वस्वामीतदाप्नुयात्।प्रकाशेक्रयतःशुद्धिःक्रेतुःस्तेयं
रहःक्रयादिति।अत्रायमस्वामिशब्दःपूर्वस्वामिप्रशंसार्थश्चेतरस्वामिनिद्वापरः।यथाअपशवोवाअन्येगोअश्वे
भ्यःपशवोगोअश्वाइति।यदित्वन्यःस्वाम्येवनतत्रेत्तदास्वामीसमाप्नुयादित्येतावतैवविवक्षितार्थसम्पत्तौपूर्व
स्वामीतिवचनमनर्थकंस्यात्।तथाचयाज्ञवल्क्यः।स्वंलभेतान्यविक्रीतंक्रेतुर्दोषोप्रकाशिते।हीनाद्रहो ३९
हीनमूल्येवेलाहीनेचतस्करः।तथाव्यासः।वलाद्येकामचारेणस्वल्पाद्येस्वंनिरन्तरं।तेषाम्बलेनपूर्वंवयं
दोषोनेत्यपिरवब्रवीदिति।किञ्च।स्वर्णकारस्यापिस्वत्वंचोरइतिस्थितंतस्यसुवर्णमविगानेनसर्वैरेवक्रीयते॥

तद्यद्यपहारेणास्वत्वंनलभतेतदासंदेहेनापिस्वर्णकारस्यसुवर्णंकेनापिनक्रीयेत।क्रीयतेचसर्वैरविगानेन।तेनाचारादपिचौ
र्यंस्वत्वापादकमिति।अतःपरकीयस्ययथेष्टविनियोगार्हद्रव्येतदनुमतिव्यतिरेकेणान्यस्ययथेष्टविनियोगार्हत्वापादनं
स्तेयमितिसिद्धं।अत्रब्राह्मणसंबंधिनएवसुवर्णस्यापहरणंमहापातकं।तथाच[illegible]।अथमहापातकान्याचक्ष
तेब्राह्मणवधःसुरापानंब्राह्मणसुवर्णहरणंगुरुदारगमनंसंयोगश्चैतैरिति।तथावसिष्ठः।पञ्चमहापातकान्याच
क्षतेगुरुतल्पंसुरापानंभ्रूणहत्याब्राह्मणसुवर्णहरणंपतितसंयोगश्चेति।सुवर्णशब्दश्चात्रनजातिमात्रवचनः
किन्तुपरिमितहेमजातिवचनः।तथाचमनुः।पञ्चकृष्णलकोमाषस्तेसुवर्णस्तुषोडशेति।याज्ञवल्क्योप्याह।
जालसूर्यमरीचिस्थंत्रसरेणूरजःस्मृतं।तेऽष्टौलिक्षातुतास्तिस्रोराजसर्षपउच्यते।गौरस्तुतेत्रयःषट्तेयवोमध्यस्तु
त्रयः।कृष्णलःपञ्चतेमाषस्तेसुवर्णस्तुषोडशेति।नचजातिवचनत्वेपरिमितजातिवचनत्वेचसतिविनिगमना
प्रमाणाभावः।परिमाणोपदेशस्यैवविनिगमनाप्रमाणत्वात्।नहिस्मृतिकाराणांसुवर्णशब्दस्यपरिमितहेम

Indira Gandhi National
Centre for the Arts

प्रा॰
५०

त्तिधानोपदेशो विधिनिषेधप्रवृत्तिनिवृत्तिप्रयोजनव्यतिरेकेणोपपद्यत इति परिमितहेमवचनत्वमेवात्र सुवर्ण
शब्दस्येति। एतेन ब्राह्मणसंबंधिन्यूनसुवर्णहरणे क्षत्रियादिसंबंधिहस्तसुवर्णहरणेऽस्तेयमपि न महापातकं किं
त्वुपपातकमेव। तथा सर्वत्रैव ब्राह्मणसुवर्णहरणमिति। वचनाद्ब्राह्मणजातिमात्रग्रहणं न तु ब्रह्मत्वधर्मवत्स
वनेस्थासवनस्थादिविशेषेण प्रायश्चित्तोत्कर्षापकर्ष इति। इदानीं प्रायश्चित्तं निरूप्यते। तत्र सवर्त्तः। स्तेयं कृत्वा
सुवर्णस्य राज्ञे शंसीत किल्बिषं। ततो मुसलमादाय सकृद्धन्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततः पापात्प्रमुच्यते।
मृतस्तावत्प्रमुच्यत एव। यद्यायुःशेषवशाज्जीवति तदापि प्रमुच्यत इत्यर्थः। मुशलं चायसं गृहीत्वा स्वयमेव राज्ञे
दातव्यं। तथा च शंखः। सुवर्णस्तेनः प्रकीर्णकेश आयसं मुशलमादाय राजानमुपतिष्ठेत्। राज्ञा चावश्यमेव स्तेनो हन्त
व्यः। अहनने दोषश्रवणात्। तथा च गौतमः। अघ्नन्नेनस्वी राजेति। एतच्च वर्णचतुष्टयस्यैव साधारणं प्रायश्चित्तं ५०
विशेषाश्रवणात्। तान्तु प्राणान्तिकमिदं प्रायश्चित्तं ब्राह्मणस्यैव मनुनोक्तं। तथा च मनुः। सुवर्णस्तेयकृद्विप्रो रा

जानमभिगम्य तु। स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति। ततो मुशलमादाय सकृद्धन्यात्तु तं स्वयं। वधेन शुध्यते स्ते
नो ब्राह्मणस्तपसैव वेति। मेवं मनुवचनस्याप्यस्य वर्णचतुष्टयसाधारणमरणान्तिकप्रायश्चित्तोपदेशकत्वात्। त
थाहीयमस्य योजना। सुवर्णस्तेयकृद्यः कश्चिद्ब्राह्मणादिः स राजानमभिगम्य स्वकर्माख्यापयन्मुशलमर्प्य
यित्वा स राजा तं हन्यात्। हतः शुद्धो भवति। विप्रस्तु ब्राह्मणः षडङ्गवेदवित्तपसैव केवलेन शुद्धो भवति। उपक्रम
पठितस्यापि विप्रग्रहणस्यानुपठितेनापि ब्राह्मणशब्देन संबंधः। इतरथा विप्रस्य मरणान्तिकमपि वा यद्ब्राह्मण
मात्रस्य केवलेन तपसा विशुद्धिप्रतिपादनमसमञ्जसमेव स्यात्। तपश्चात्र द्वादशवार्षिकमेव। तथा च मनुः। तपस
पनुनुत्सुस्तु सुवर्णस्तेयजं मलं। चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतमिति। अथवा राजदत्तेनायसमयशस्त्रेणात्म
नं व्यापादयेत्। तथा च वसिष्ठः। ब्राह्मणसुवर्णहरणे प्रकीर्यकेशान्राजानमभियाचेत स्तेनोऽस्मि भोः शास्तु मां भ
वानिति। ततस्तस्मै राजोदुम्बरं शस्त्रं दद्यात्। तेनात्मानं घातयेन्मृतः पूतो भवतीति विज्ञायत इति। तथा चापरमपि तेनै

Indira Gandhi National
Centre for the Arts

प्रा०
४१

वोर्क्तः निष्कालकोघृताक्तोवागोमयाग्निनापादप्रभृत्यात्मानंदाहयेत्स्तेनोभवतीति।विज्ञायतइति।एतच्चज्ञानतःअ
ज्ञानतस्तुद्वादशवार्षिकमेवानयाच्चशंखः।अधःशायीजटाधारीपर्णमूलफलाशनः।।एककालंसमश्नानोवर्षेतु
द्वादशेगते।रुक्मस्तेयीसुरापश्चब्रह्महागुरुतल्पगाः।व्रतेनैतेनशुध्यन्तिमहापातकिनस्त्विमे।एतद्ब्राह्मणमात्रस्य
प्रायश्चित्तं।क्षत्रियादीनांतु।विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतं।वैश्येर्द्धंपादशेषंतुशूद्रजातिषुशस्यतइति
साधारणविष्णुवचनात्तुसाएत्पादपादहानिर्द्रष्टव्या।षडङ्गवेदविद्ब्राह्मणस्यतुज्ञानतएवद्वादशवार्षिकोप
देशात्ज्ञानतस्तदर्द्धंनवाज्ञानतःस्वर्णापहरणंनसंभवति।ताम्रादिभ्रमेणान्यस्मात्स्वापहृत्यदत्तस्यचौराप
हृतस्यवापश्चात्स्वर्णत्वावगमेनापहारसंभवात्।यत्तुवालोकेनवस्त्रादिस्तेयेवस्त्रादिनिबद्धसुवर्णहरणेऽज्ञानतः
स्तेयमित्युक्तं।तत्स्तेयशब्दार्थापरिज्ञानेनैव।परकीयेहिद्रव्येतदनुमतिव्यतिरेकेणयथेष्टविनियोगार्हत्वापादनं ४१
स्तेयमित्युक्तं।नचात्रवस्त्रनिबद्धसुवर्णेयथेष्टविनियोगार्हत्वापादनमस्ति।येनतस्यापिस्तेयंसंभवति।यदितु

ज्ञानेपिनसमर्प्पयतितदातदानींज्ञानतएवस्तेयस्यजातं।अथतःसमर्प्पणेतुस्तेयालाभात्नदोषइति।यदातुअज्ञानतोपहृत्य
सुवर्णंपश्यतिसंजाततापश्चसमर्पयतिपरित्यजतिवातदात्रैवार्षिकमेव।ननुपरकीयद्रव्येयथेष्टविनियोगार्हत्वापाद
नंस्तेयं।तच्चपश्चात्समर्पणेत्यागेपिवाऽपूर्वंजातमेवेति।प्रागाह्निकमेवोचितंतत्कथंत्रैवार्षिकं।उच्यते।मरणस्येवव्र
तसमुष्ठितस्यपरित्यागस्यापिपापक्षयहेतुत्वप्रतिपादनात्।तथाचसुमन्तुः।।ब्राह्मणस्वेयीद्वादशरात्रंवापुनरद्धृतोर
वतिद्रव्यत्यागेनवेति।इदंचप्रायश्चित्तान्यत्वात्स्तेयानन्तरमेवपरित्यागेसतिद्रष्टव्यम्।चिरावस्थितयथेष्टविनियो
गापादनस्यतुगुरुत्वात्त्रैवार्षिकव्रतसमुष्ठितस्यैवपरित्यागस्यपापक्षयहेतुत्वंनतुद्वादशवार्षिकसमुष्ठितस्यातप
मापनुत्तुस्तुसुवर्णस्तेयजंमलं।चीरवासाद्द्विजोरण्येचरेद्ब्रह्महणोव्रतमित्यनेनमनुनातपोमात्रापनेयब्रह्मवध
पापविषयत्वेनद्वादशवार्षिकस्यदर्शितत्वात्व्रतसमुष्ठितत्यागापनेयपापविषयत्वात्तेनयदेतदङ्गिरसोक्तः
महापातकसंयुक्तावर्षैःशुध्यन्तितेत्रिभिरिति।एतद्वचनविषयत्वमेवात्रेति।यदित्वज्ञानतोपहृत्यसुवर्णंपश्चात्तु

Indira Gandhi National
Centre for the Arts

प्रा· त्पन्नज्ञानात् समर्पयति तदा वार्षिकमेव प्रायश्चित्तं। तेन यदापस्तम्बेनोक्तं स्तेयं कृत्वा सुरां पीत्वा कृच्छ्रं संवत्सरं चरेदित्ये
४१ तद्वचनविषयत्वमेवास्येति। न्यूनसुवर्णहरणे तु षट्त्रिंशन्मतं। सुवर्णादल्पहरणे वत्सरः परिकीर्तितः। ऊर्ध्वं प्राणान्ति
कं ज्ञेयं यद्वा ब्रह्महणो व्रतमिति। प्राणान्तिकमज्ञानतो ब्रह्महणो व्रतं द्वादशवार्षिकमित्यर्थः। तेनात्र न्यूनसु
वर्णस्य पञ्चदशमाषात्मकस्य हरणे वार्षिकप्रायश्चित्तोपदेशात् तत्र्याहारतः प्रतिमाषकं चतुर्विंशतिदिनव्रतेन प्राजा
पत्यद्वयं वर्त्तते। न चैवं सत्यपहृत्य सुवर्णस्य माषमात्रं द्विजातयः। गोमूत्रयावकाहारा मासैः शुध्यन्तीति विहितत्वेने
न विरोध इति वाच्यं। प्रत्यहं यावकाहारस्य मासत्रयाचरणे उपवासवत्कुलप्राजापत्यद्वयेन तुल्यत्वात्। तेन यथाय
था माषकावृद्धिस्तेन यथा पञ्चदशमाषकपर्यन्तं प्राजापत्यद्वयवृद्ध्या वार्षिकमेव व्रतं भवति। एतच्च प्रायश्चित्तमल्प
त्वादकामतो द्रष्टव्यं ज्ञानतस्तु द्विगुणमिति। षोडशमाषकापहरणे तु प्रायश्चित्तमुक्तमेव। कृष्णलमात्रापहरणे ४१
सान्तपनं। तथा च षट्त्रिंशन्मते। स्वर्णकृष्णलिकामेकामपहृत्य द्विजातयः। कुर्युः सान्तपनं कृच्छ्रं तत्पापस्यापनुत्तय इति।

कृष्णलद्वयापहरणे सान्तपनद्वयमित्याद्यूहनीयमिति। सान्तपनश्चात्र यतिसान्तपनं ग्राह्यं। तथा च शङ्खः। तदेव त्र्यहाभ्यस्तं य
तिसान्तपनं स्मृतं॥ अस्यार्थः। सान्तपने द्रव्यैरेव कुशोदकगोक्षीरदधिगोमूत्रगोमयैस्त्र्यहाभ्यस्तैः सोपवासरहितैर्यतिसा
न्तपनं भवति एतच्च त्र्यहसाध्यं। ब्राह्मणीयादिसुवर्णापहारस्य तूपपातकत्वात् ज्ञानतोऽपि त्रैवार्षिकमेव। तेन यदेतदाप
स्तम्बेनोक्तं स्तेयं कृत्वा सुरां पीत्वा गुरुदारांश्च गत्वा चतुर्थकालमितभोजनोऽपोऽभ्युपेयात् सवनानुकल्पं स्थानासना
भ्यां विहरंस्त्रिभिर्वर्षैरपापं नुदतीति एतद्वचनविषयत्वमेवास्येति। सर्वत्रैवात्राप्यज्ञानतोऽर्द्धं ज्ञानतोऽपहृत्य समर्प
णे चतुर्थभागः अज्ञानतोऽपहृत्य समर्पणे द्वादशभागः। तथा बालवृद्धरोगिस्त्रीणां सर्वोक्तव्यवस्थयैव प्रायश्चित्तार्द्धं पञ्च
वर्षाद्धीनमेकादशवर्षपर्य्यन्तं पादमात्रं पञ्चवर्षपर्यन्तं प्रायश्चित्ताभाव इति॥ अथेदानीमितरद्रव्यस्तेन प्रायश्चित्तं नि
रूप्यते। तत्र मनुः। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानां तु द्वादशाहं कणान्नता। तथा। मनुष्याणां
तु हरणे स्त्रीणां क्षेत्रगृहस्य वा वापीकूपजलानां च शुद्धिश्चान्द्रायणं स्मृतं। अत्र वापीकूपजलहरणस्य स्वल्पत्वेन मनु

प्रा· ४३ घ्यादिहरणेनाऽल्पत्वात्सेतुं छिन्द्याद्वेश्यादिप्लावनार्थं सकलजलाहरणे सति द्रष्टव्यम्।तडागेऽप्यपहरणे यान
शय्यासनस्य वा पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनं तृणकाष्ठद्रुमाणाञ्च शुष्कान्नस्य गुडस्य वा चेलचर्मामिषाणां
च त्रिरात्रं स्यादभोजनं। कार्पासकीटजोर्णानां द्विखुरैकखुरस्य वा। पक्षिगंधौषधीनाञ्च रज्ज्वाश्चैव त्र्यहं पयः। एतेऽवतिरपोहे
न पापं स्रेयस्कृत्तन्द्विजाः। अत्र ज्ञानजाद्वयोगात्सर्वमिदं प्रायश्चित्तं ब्राह्मणक्षत्रियवैश्यसाधारणं। विप्रेतु सकलं दे
यं पादोनं क्षत्रिये मतं। वैश्येऽर्द्धं पादशेषं तु शूद्रजातिषु शस्यत इति साधारणत्वेऽपि द्विजवचनाच्छूद्रस्य चतुर्थभागप्राय
श्चित्तं। अनुक्तानां तु पित्तलसीसकादीनामपहारे सान्तपनव्रतमेव प्रायश्चित्तं। तथा च मनुः। द्रव्याणामल्पसार
णां स्तेयं कृत्वान्यवेश्मतः। चरेत्सान्तपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धय इति। अत्रापि सान्तपनं त्र्यहः साध्यं द्रष्टव्यं। म
णिमुक्तादिस्तेये पित्तलादीनामल्पत्वात्। त्र्यहस्साध्यञ्च सान्तपनं याज्ञवल्क्येनोक्तं कुशोदकञ्च गोक्षीरं दधि मू ४३
त्रं शकृद्घृतं प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं स्मृतमिति। अत्र तन्निर्यात्यात्मशुद्धय इत्यनेन प्रायश्चित्तं विद्य

मानद्रव्यस्य परित्यागे सति द्रष्टव्यं। एतच्चोपलक्षणमात्रं किन्तु सर्वमेव सुवर्णादिस्तेयप्रायश्चित्तं विद्यमानस्यापहृतद्रव्य
स्य परित्यागे सति द्रष्टव्यं। अन्यथा कृतप्रायश्चित्तस्यापि पुनस्तद्द्रव्यस्वीकारे तथैव स्तेयप्रसक्तेः। विनष्टे तु द्रव्ये पुनः
स्वीकाराभावात्प्रायश्चित्तमात्रमेवेति। यत्तु मनुनोक्तं धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः। स्वजातीय
गृहादेव कृच्छ्रार्द्धेन विशुध्यतीति तत्स्ववर्णस्य गृहस्थस्य यागार्थानीतधान्यापहारे पुरोडाशादिरूपान्नापहारे याज्ञीय
दाक्षिण्यार्थोपनीतधनापहारे च सति द्रष्टव्यं। अन्यथा मनुयज्ञीदेत्रापहारे चाद्रायणमात्रमुपदिष्टं तत्रान्नापहारे
वार्षिकोपदेशोऽसमञ्जस एवापद्येत। यदपि याज्ञवल्क्येनोक्तं अश्वरत्नमनुष्यस्त्रीभूधेनुहरणस्य च। निक्षेपस्य
च सर्वस्य सुवर्णस्तेयसमं स्मृतमिति। तथा यदपि मनुनोक्तं निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनाञ्च
रुक्मस्तेयसमं विदुरिति। न तत्प्रायश्चित्तप्रदर्शनार्थं। नराश्वरजताद्यपहारे प्रायश्चित्तविशेषस्य तेनैवोक्तत्वात्।
किन्तु निंदार्थवाद एवायं। अन्यथाऽनृतञ्च समुत्कर्षे राजगामि च पैशुनं। गुरोश्चालीकनिर्बंधः समानि ब्रह्म

Indira Gandhi National
Centre for the Arts

प्रा· हत्यया। ब्रह्मोज्झवेदनिंदा च कौटसाक्ष्यं सुहृद्वधः। गर्हितान्नाद्ययोर्जग्धिः सुरापानसमानि षट्। इत्येतेषामपि मिथ्योत्कर्षादि
४४ मातादीनां ब्रह्महत्याप्रायश्चित्तप्रसक्तौ। वेदनिंदादीनां च सुरापानप्रायश्चित्तप्रसक्तौ। अथ तेषां निंदार्थवादत्वं न
प्रायश्चित्तोपदेशकत्वं तर्हि तत्समभिव्याहृतानामेव निक्षेपहरणादीनां सुवर्णस्तेयप्रायश्चित्तोपदेशकत्वमिति ति
मास्पदमेव। तेन निंदार्थवादेन पापाधिक्यप्रदर्शनाद्यदेव प्रायश्चित्तमुक्तं तदेवात्र द्विगुणं द्रष्टव्यमिति। एतच्च ब्राह्म
णसंबंधिद्रव्यापहारविषयं। क्षत्रियादिसंबंधिद्रव्यापहारे तु पादपादह्रासो द्रष्टव्यः। अत्रापि बालस्त्रीवृद्धरोगिणां पूर्वो
क्तमेव द्रष्टव्यं प्रायश्चित्तार्द्धं। पञ्चवर्षादुपर्येकादशवर्षपर्यन्तं पादमात्रं। पञ्चवर्षपर्यन्तं प्रायश्चित्ताभाव एवेति॥
अथेदानीं रहस्यकृतसुवर्णस्तेयप्रायश्चित्तं निरूप्यते। तत्र कामतो रहःकृतसुवर्णस्तेयप्रायश्चित्तविशेषानुपदेशान्म
रणान्तिकमेव। अकामतस्तु रहःकृतसुवर्णस्तेये सकलमहापातकसाधारणं यन्मनुनोक्तं। महापातकसंयु
क्तोऽनुगच्छेद्गाः समाहितः। अभ्यस्याब्दं पावमानीर्भैक्षाहारो विशुद्ध्यतीति तदेवात्र द्रष्टव्यं। यदप्यपरं मनुनोक्तं। अ ४४

ण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां। मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिरिति। तत्कामतो गृहीत्वा पश्चात्स
ञ्जातबाधकत्वया समर्पणे सति द्रष्टव्यं। यच्च याज्ञवल्क्येनोक्तं। त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शुचिः।
सुरापः स्वर्णहारी च रुद्रं जप्त्वा जले स्थितः। तदकामतो गृहीत्वा पश्चात्समर्पणे सति द्रष्टव्यं। यदपरं मनुनोक्तं। स
कृज्जप्त्वास्य वामीयं शिवसंकल्पमेव वा। अपहृत्य सुवर्णं तु क्षणाद्भवति निर्मल इति। तत्क्षत्रियादिसुवर्णापहारविष
यं। अस्य वामस्य पलितस्य होतुरित्याद्यस्य वामीयं। यज्जाग्रतो दूरमुपैति दैवमित्यादि शिवसंकल्पः। सुवर्णेतरद्रव्या
पहारे [illegible] अस्य वामस्य पलितस्य होतुरित्याद्यस्य वामीयं। यज्जाग्रतो दूरमुपैति दैवमित्यादि शिवसंकल्पः) रहस्य
प्रायश्चित्ते लघुगुरुपापभेदेन प्राणायामशतादिकमेवोहनीयमिति। तथा च मनुः। प्राणायामशतं कार्यं स
र्वपापापनुत्तये। उपपातकजातानामनादिष्टस्यैव हि॥ ॥ इति रहस्यकृतसुवर्णस्तेयादिप्रायश्चित्तं॥ इति बा
लवलभीभुजङ्गापरनाम्नो भट्टश्रीभवदेवस्य कृतौ प्रायश्चित्तप्रकरणेयपरिच्छेदः॥ ॥इदानीमगम्यागमनप्राय

Indira Gandhi National Centre for the Arts

प्रा०
४५

श्चित्तैर्निरूपणीयेगुरुतल्पेमहापातकत्वेनप्रथमंगुर्वङ्गनागमनप्रायश्चित्तंनिरूप्यतेतत्रानिरूपितेगुर्वङ्गनागमन
शब्दार्थेगुर्वङ्गनागमनप्रायश्चित्तानिरूपणात्प्रथमंसएवनिरूप्यते।केयंगुर्वङ्गनानामेति।तत्रमातापित्रोरेवलो
कशास्त्रयोर्गुरुत्वदर्शनान्मातापित्रोरेवायंशरीरोत्पादकत्वोपाधिनागुरुशब्दोमुख्यः।आचार्यादिषुतुतथावि
धैकरूपानुगमाभावाद्गौणएवायमिति।अङ्गनाशब्दश्चस्त्रीमात्रवचनः।तेनगुरुश्चासावङ्गनाचेतिसमासान्मातृत्व
वचनएवायंगुर्वङ्गनाशब्दः।नतुगुरोरङ्गनागुर्वङ्गनेतिषष्ठीसमासात्सपत्नमातृवचनोपि।तथासतिषष्ठ्यर्थलक्षणा
दोषप्रसङ्गात्।तेननिषादस्थपतिंयाजयेदितिवत्कर्मधारयसमासात्स्वमातृवचनएवायंगुर्वङ्गनाशब्दः।अतोगुरुपत्नी
नगच्छेदित्यादिषुपत्नीशब्दस्यपरिणीतस्त्रीवचनत्वेनकर्मधारयासंभवात्षष्ठ्यर्थलक्षणा।अयणोपिनगुर्वङ्गना
शब्दस्यसपत्नमातृविषयत्वंकिन्तुन्यायवशात्स्वमातृविषयत्वमेवेति।किञ्चगुरुतल्पोत्तिताष्येनसहैस्वपा ४५
दमोमध्येरत्यत्रगुरुस्त्रीयस्यासगुरुतल्पः।तल्पशब्दःकलत्रेउच्यते।तदुक्तं।तल्पःकलत्रेशयनेगृहहतेरेवदृश्यतइति।नच

गुरुशब्दःसपत्नमातरिप्रसिद्धःकिन्तुजनन्यामेव।तथाचसतियाज्ञवल्कीयमपिसपत्नमातरिगुरुतल्पातिदेशवचन
मुपपन्नतरंभवति।तथाहयाज्ञवल्क्यः।मातुःसपत्नींभगिनीमाचार्यतनयांतथा।आचार्याणींसुतांस्वांचगच्छंश्चगुरुतल्प
गइति।यत्तुबालोकेनपरिणीतासवर्णसपत्न्यतिप्रायेणातिदेशोयमितिव्याख्यातं।तत्सपत्नीशब्दार्थपरिज्ञानेनैव।
समानःपतिर्यस्याःसपत्नीनचसवर्णासवर्णयोःसमानपतित्वमस्तितेननतत्रसपत्नीशब्दोयञ्जेणोनंदस्तुस्वोसङ्गव
तिगौणएवप्रत्ययइति।अतिदेशोपिसवर्णसपत्न्यातिप्रायेणैव।तेनब्रह्महत्यासुरापानंस्तेयगुर्वङ्गनागमनंम
हापातकान्याहुः।संसर्गश्चापितैःसहेतिमनुवचनात्स्वमातृगमनमेवमहापातकमितिसिद्धं।।इदानींप्राय
श्चित्तंनिरूप्यते।तत्रमनुः।गुरुतल्प्यभिभाष्यैनस्तप्तेस्वप्यादयोमये।सूर्मींज्वलन्तींमाश्लिष्येन्मृत्युनासविशुद्ध्यति।
सूर्मीकार्ष्णायसीप्रतिमा।स्वयंवाशिश्नवृषणावुत्कृत्याधायचाञ्जलौ।नैरृतींदिशमातिष्ठेदानिपातादजिह्म
गइति।तथाचवसिष्ठः।निष्कालकोघृताभ्यक्तस्तप्तांसूर्मींपरिष्वजेन्मरणात्पूतोभवतीतिविज्ञायतइति।निष्का

Indira Gandhi National Centre for the Arts

प्रा·
४६

लकोमुंडितकेशनखलोमेति।एतच्चमरणांतिकप्रायश्चित्तंकामतोगुर्वंगनागमनेद्रष्टव्यं।अकामतस्तुद्वादश
वार्षिकमेव।तथाचगौतमः।अधश्शायीजटाधारीपर्णमूलफलाशनः।एककालंसमश्नानोवर्षेतुद्वादशेगते।रुक्म
स्तेयीसुरापश्चब्रह्महागुरुतल्पगाः।व्रतेनैतेनशुध्यंतिमहापातकिनस्त्विमइति।नचैतत्सपत्नमातृगमनविषयंतत्स
मनस्यातिपातकत्वेनमहापातकत्वाभावात्।अतोबालोकेनयदुक्तंतद्धेयमेव।यदपिबालोकेनलिखितं·पितृ
पत्नीन्त्वविज्ञायसवर्णयोनिंगच्छति।जननीम्वाप्यविज्ञायनामृतःसविशुध्यतीति।तदपिसर्वसंहितास्वदृष्टत्वाद्वि
श्वरूपधारेश्वरश्रीकरादिभिरलिखितत्वाद्धेयमेव।सत्त्वेवातद्वचनं·तथापि·रुक्मस्तेयीसुरापश्चब्रह्महागुरु
तल्पगाः।व्रतेनैतेनशुध्यंतिमहापातकिनस्त्विमइतिशंखादिभिःसातसकलमहापातकगोचरत्वेनैवद्वा
दशवार्षिकस्योक्तत्वादीदृशीयोजनाकर्त्तव्या।पितृदार्यांसवर्णाञ्जननीम्वापिविज्ञाययोनिंगच्छतिसोऽ ४६
विज्ञायामृतोनशुध्यतिनात्वेवमृतःशुध्यतीति।नानश्चयथाविहितमरणांतानमपेक्षितं·तेनैतदुक्तम्भव

तिज्ञानतस्सवर्णांसपत्नमातरमभिगम्याग्निप्रवेशान्मृतःशुध्यति।ज्ञानतःस्वमातरमभिगम्यज्वलन्तीमस्मालिं
गनादिभिर्मृतःशुध्यतीति।यत्त्वापस्तंबेनोक्तं·स्तेयंकृत्वासुरांपीत्वागुरुदारांचगत्वाचतुर्थकालाहारास्त्रिभि
र्वर्षैःपापंनुदतीति·अनेनपञ्चविंशदधिकशतधेनवोत्सवान्ते·तज्ज्ञानतोरेतस्सेकात्पूर्वंद्रष्टव्यं·अज्ञानतस्त
दर्द्धं।यत्तुयाज्ञवल्क्येन·प्राजापत्यञ्चरेत्कृच्छ्रंसमावागुरुतल्पगइत्यत्रसमाइतिवचनेनत्रैवार्षिकमुक्तं।
तथाचांगिरसोक्तं·महापातकसंयुक्तावर्षैःशुध्यन्तितेत्रिभिरिति·तत्सर्वमनभ्यासितचरितगुर्वंगनाविषयंज्ञानतो
रेतःसेकात्पूर्वंद्रष्टव्यं।यत्तुसुमन्तुनावार्षिकमुक्तं।गुरुदाराभिगामीसम्वत्सरम्ब्रह्मचारीकंटकिनींशाखामवलंब्यानधः
शायीत्रिषवणीभिक्षाहारीशुद्धोभवति।तदत्यन्तंबकुक्षुषव्यभिचरितगुर्वंगनाविषयंज्ञानतोरेतःसेकात्पूर्वंद्रष्टव्यं·
अज्ञानतस्त्वर्द्धमितिनयदेतदापस्तम्बेनषाण्मासिकम्प्रायश्चित्तमुक्तं·तदप्येतद्विषयमेव।तथाचापस्तम्बः।गुरुदा
रम्पतिकामीखराजिनम्वाहिलोमपरिधायपयुत्तदाद्व्यातिकामिणोभिक्षांदेहीतिसप्तागाराणिचरेत्साहवनेःष

Indira Gandhi National
Centre for the Arts

प्रा.

षण्मासानिति। एतेनाल्पासवर्णव्यतिचारिण्यां गुर्वङ्गनायां ज्ञानतो रेतःसेकात्पूर्वं द्विवार्षिकमेवाज्ञानतस्त्वर्द्धमित्यूहनी
यमिति। यत्तु मनुनोक्तं चान्द्रायणं वा त्रीन्मासानभ्यसेन्नियतेन्द्रियः। हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये इति। तद्वि
शुद्धगुर्वङ्गनात्वेलाक्षमात्रेण तदीयशय्याक्रमणादिजनितपापक्षयार्थमेव द्रष्टव्यं। एतेन सकृद्व्यतिचारिण्यां
ज्ञानतो रेतःसेकात्संपूर्णधात्वर्थसम्पत्तौ द्वादशवार्षिकं। असकृद्व्यतिचारिण्यां ज्ञानतो रेतःसेकात्तु सम्पूर्ण
धात्वर्थसंपत्तौ नववार्षिकं। अत्यन्ताल्पासवर्णव्यतिचारिण्यां ज्ञानतो रेतःसेकात्तु धात्वर्थसम्पत्तौ षड्वार्षिकं। अज्ञा
नतस्तदर्द्धमित्यूहनीयं। यच्च बालोकेन सवर्णव्यतिचारिणीगमने प्रायश्चित्ताल्पत्वमभिधाय असवर्णव्यतिचा
रिणीगमने किमपि नोक्तं तदसंबद्धमेव। तथाहि। चतुःस्वैरिण्यामृषल्यामवकीर्णस्य चेलस्नातउदकुम्भं ब्रा
ह्मणाय दद्यादित्येवमादिशङ्खवचने व्यतिचारिण्यां प्रायश्चित्ताल्पत्वमवगम्यते। न चात्र सवर्णासवर्णकृ ४७
तो विशेषः श्रूयते। यत्तु हीनवर्णव्यतिचारितस्त्रीगमने प्रायश्चित्ताधिक्यं तत्तु हीनवर्णव्यतिचारिनिबंधनं

किन्तु हीनवर्णागमने स्त्री पततीति पतितसंसर्गनिबंधनं। न च गुर्वङ्गनागमनेऽपि तत्त्वनिबंधनः प्रायश्चित्तातिरेकोऽनुज्ञाते।
पतितत्वानुबंधस्य गुर्वङ्गनानुबंधादल्पत्वेन प्रायश्चित्तातिरेककारित्वासम्भवात्। अत एव प्रायश्चित्ताल्पत्वापादक
त्वमपि न सम्भवतीत्याशङ्क्य। चतुःस्वैरिण्यां वृषल्यामवकीर्णस्य चेलस्नातउदकुम्भं ब्राह्मणाय दद्यादिति वचनेन व्यति
चारस्य प्रायश्चित्ताल्पत्वापादकत्वदर्शनात्। असवर्णव्यतिचारे प्रायश्चित्ताल्पत्वस्यान्यत्रादर्शनात्। अतस्सव
र्णासवर्णव्यतिचारे गुर्वङ्गनायां तुल्यमेव। यथोक्तमिति। एतच्च गुर्वङ्गनाप्रायश्चित्तं यथा पुंसोक्तं तथा पुत्रव्यभि
चरिताया मातुर्गर्भविशिष्टमेव द्रष्टव्यं। तथा च मनुः। एतमेव विधिं कुर्याद्योषित्सु पतितास्वपीति। विप्रदुष्टां स्त्रि
यं भर्त्ता निरुन्ध्यादेकवेश्मनि। यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतं। यथा वा विप्रदुष्टामिति शब्दो न ब्राह्मणदुष्टाम
ह। तदुपरिष्टाद्वक्ष्यामः। तथा च कात्यायनः। एष योगस्तु शुद्धिश्च पतितानामुदाहृता। स्त्रीणामपि प्रसक्तानामे
६ ४पतितत्वानुबंधात्गुर्वङ्गनात्वानुबंधस्य महत्त्वेन प्रायश्चित्ताल्पत्वापादकत्वायोगात्। तानवैवं व्यतिचारेपि प्रायश्चित्ताल्प४
त्वासंभवति २

Indira Gandhi National
Centre for the Arts

प्रा०
४८ षएवविधिःस्मृतइति।तेनज्ञानतोगुर्वङ्गनागमनेज्वलत्सूर्मीसमालिङ्गनाद्विनामरणमज्ञानतस्त्वब्दाद्द्वादशवार्षिकादितितत्स
कलमप्यान्तरपि॥इतिगुर्वङ्गनागमनप्रायश्चित्तम्॥॥इदानीमन्त्यागमनप्रायश्चित्तंनिरूप्यते।तत्रबृहद्विष्णुः।सपत्नमा
तृगमनंदुहितृगमनंस्नुषागमनमित्यतिपातकानि।अतिपातकिनस्त्वेतेप्रविशेयुर्हुताशनं।नत्वन्यान्निष्कृतिस्ते
षांविद्यतेतुकदाचनेति।तथाबृहद्धारीतः।मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानि।सद्योग्निप्रवेशोतिपात
किनामिति।अत्रयद्यपिनिरुपपदमातृशब्दःस्वमातरमेवाभिधत्ते।तथापितस्यमहापातकत्वेनातिपातकशब्द
विषयत्वाद्भगिन्यादिसमभिव्याहाराच्चसपत्नमातृविषयएवायं।तेनसपत्नमात्रादिगमनेपिज्वलदग्निप्रवेशएवप्रायश्चित्तं।त
थाबृहद्यमः।स्वसासखीकुमारीचचांडालीब्राह्मणीसुता।सपिण्डाअन्यदाराश्चप्राणत्यागोविधीयते।अत्रापिसुतादिसम
भिव्याहारेणाग्निप्रवेशादेवप्राणत्यागोबोद्धव्यः।तत्रकुमारीसवर्णोत्तमवर्णाविरुद्धतासवर्णैवासपिण्डाअन्यदाराश्च ४८
सवर्णाएवा।तेनसपत्नमातृदुहितृसोदरभगिनीस्नुषाचांडालीनांज्ञानतोभिगमनेग्निप्रवेशात्प्राणान्तिकमेवप्राय

श्चित्तमितिस्थितिः।नचैवंज्ञानतःप्राणान्तिकप्रायश्चित्ताविशेषादेकमपिमहापातकित्वप्रसङ्गइतिवाच्यं।मरणान्तप्रायश्चित्त
स्यैवाविलक्षणत्वात्।तथाहि।तप्तलोहमयशय्याशयनेज्वलत्सूर्मीसमालिङ्गनेस्वयंशिश्नवृषणावुत्कृत्याञ्जलौनिधाय
निपातपर्य्यन्तस्वस्मागमनेऽतिशयदुःखानुभवेनचिरेणमरणस्यभवतिनतथाज्वलदग्निप्रवेशेनेतिमरणेप्यस्तिविशेष
इतिनमहापातकगुरुतल्पगमनतुल्यत्वमिति।अतएवाज्ञानतोपिसपत्नमातृगमनेगुरुतल्पगमनवत्रद्वादशवार्षिकं।
किन्तुनचांडालीगमनंविहायनववार्षिकं।चांडालीगमनेत्वज्ञानतोवचनबलात्त्रैवार्षिकमेव।तथाचमनुः।यत्करोत्येक
रात्रेणवृषलीसेवनाद्द्विजः।तद्भैक्ष्यभुग्जपन्नित्यंत्रिभिर्वर्षैर्व्यपोहतीति।नचैतज्ज्ञानतोरेतःसेकात्पूर्वमिति।वाच्यं।य
यदेकरात्रेणेत्यपवर्गेतृतीयेयंफलप्राप्तिःसत्पापपरिसमाप्तिश्चापवर्गः।तेनरेतःसेकरूपस्यावश्यकत्वादज्ञानविष
यमेव।यत्तुयमेनोक्तंवार्षिकंतदेवरेतःसेकात्पूर्वंचांडालीगमनेपञ्चमासाः।तेनसपत्नमात्रादिगमनेष्वेवाज्ञानतोनव
वार्षिकस्योक्तत्वात्।तत्रैवज्ञानतोरेतःसेकात्पूर्वंत्रैवार्षिकंअज्ञानतोरेतःसेकात्पूर्वंसार्धवार्षिकमित्यूहनीयं।एतेनप्र

Indira Gandhi National Centre for the Arts

हापातकशब्दंविहायातिपातकशब्दयोगोप्युपपन्नोभवतीति।क्षत्रियसपत्नमातृगमनेप्यज्ञानतोनववार्षिकं
४५ वैश्यसपत्नमातृगमनेषाड्वार्षिकं·शूद्रसपत्नमातृगमनेत्रैवार्षिकंमज्ञानतोद्वैमित्यूहनीयमिति।इदानींगुरुतल्पा
तिदेशप्रायश्चित्तंनिरूप्यते।तत्रबृहस्पतिः।पितृव्यदारगमनेभ्रातृभार्यागमेतथा।गुरुतल्पव्रतंकुर्यान्नान्यथा
निष्कृतिर्भवेदिति।अत्रमरणान्तिकव्रतशब्दाभिधेयत्वात्पितृव्यभार्यागमेभ्रातृभार्यागमेचज्ञानतोरेतःसेकाद्वाद
शवार्षिकप्रायश्चित्तविधिरेवायमिति।अज्ञानतस्तुषाड्वार्षिकाद्यूहनीयमिति।यत्रतुनगुरुतल्पसाम्यप्रतिपा
दकानिमन्वादिवचनानितत्रप्रायश्चित्तमुच्यते।तत्रमनुः।रेतःसेकंस्वयोन्यासुकुमारीष्वन्त्यजासुच।सख्युःपुत्र
स्यचस्त्रीषुगुरुतल्पसमंविदुरिति।तथागुरुतल्पमतिदिश्यशंखलिखिताभ्यामुक्तं।एवम्मातुलानीपितृष्वसृस्नुषाः
स्नुषादिष्वेवं।तथाचयाज्ञवल्क्यः।सखिभार्याकुमारीषुस्वयोनिष्वन्त्यजासुच।सगोत्रासुसुतस्त्रीषुगुरुतल्प ४५
ताभगिनेयीभागिनेयभार्यागमनेगुरुभार्याचार्यदुहितरिचेति।तथाचव्यासः।सखिस्वयोनिस्वगोत्राशिष्यभार्यास्नुषा ४२

समंविदुः।पितुःस्वसारम्मातुश्चमातुलानींस्नुषामपि।मातुःसपत्नींभगिनीमाचार्यतनयांस्तथा।आचार्याणींस्वाश्वसुतां
गच्छंस्तुगुरुतल्पगः।।छित्वालिङ्गंस्वयंसम्यक्कामायास्वयोषितिरति।तथाचनारदः।मातामातृष्वसाश्वश्रूर्मातुलानी
चपितृष्वसा।पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नुषा।दुहिताचार्यभार्याचसगोत्राशरणागता।राज्ञीप्रव्रजिता
धात्रीसाध्वीवर्णोत्तमाचया।आसामन्यतमांगत्वागुरुतल्पगउच्यते।शिश्नस्योत्कर्तनात्तत्रनान्योदण्डोविधीयत
इति।सर्वत्रचात्रगुरुतल्पाभिधानंनगुरुतल्पप्रायश्चित्तप्रतिपादनार्थम्।अन्यथासतिसगोत्राशब्देनैवसपत्नमा
तृपितृव्यभार्याभ्रातृभार्याश्वशुरभार्याणांप्राप्तत्वेनपृथगभिधानंवैयर्थ्यापत्तेः।तथासपत्नमातुर्दुहित्रासहतनि
न्याश्चतस्रव्यासहशरणागतयाचसहसामान्येनगुरुतल्पप्रायश्चित्ताभिधानानुपपत्तेः।किन्तुनिन्दार्थवादोयं
पापाधिक्यप्रतिपादनार्थं।तेनसपत्नमातृदुहितृभगिनीस्नुषाकुमारीचाण्डालीनांतथापितृव्यभार्याभ्रातृभा
र्याणांगमनेयथोक्तमेवप्रायश्चित्तं।इतरासांतुगमनेसवर्णपरदारगमनप्रायश्चित्ताद्द्विगुणंप्रायश्चित्तमि

प्रा· तिद्रष्टव्यं। तथाप्युक्तं महापातकतुल्यानि पापान्युक्तानि यानि वै तानि पातकसंज्ञानि तन्न्यूनमुपपातकं। पातकस्य
५· चोपपातकाद्गुरुत्वादतिपातकाच्च लघुत्वान्मध्यवर्तित्वे शास्त्रोचितावाषाण्मार्षिकप्रायश्चित्तविषयत्वं। तेन
सपत्नभगिनीसपत्नभ्रातृसुताप्यसिपत्रपितृव्यसुतार्यास्तां भागिनेयीनां गमने संवत्सरसंनिकर्षविशेषात्त्रैवार्षि
कमेवास्नानंतमब्दमित्येवमूहनीयमिति। अत्र यद्विप्रब्राह्मणीगमने यादृशं ब्राह्मणस्य प्रायश्चित्तमुक्तं
तद्विधक्षत्रियावैश्याशूद्राणां गमने तादृशमेव ब्राह्मणस्य पादपादहीनं द्रष्टव्यं। एवं स्वपरिणीतक्षत्रियावै
श्याशूद्रासमुत्पादितदुहितृगमने। तथा तत्सुतपरिणीतसुताप्यभिगमने यथाक्रमं त्रैवार्षिकषाण्मार्षिकत्रैवा
र्षिकाद्यूहनीयं स्नानतमब्दमिति। ननु मित्रसुताप्यवाप्यसुताप्यादिष्वपि प्राणान्तिकमेव प्रायश्चित्तं याज्ञ
वल्क्येनोक्तं। येनैवमाह छित्वा लिङ्गं स्ववधस्तस्य सकामायाश्च योषित इति। तथा नारदेनापि। माता मातृष्वसा ५·
श्वश्रूर्मातुलानी पितृष्वसेत्यादिकमतिवायान्तेतिहितं। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधीयत इति। अत्र तथा

थमेवमादीनां गमने ज्ञानतः षाण्मार्षिकमिति। तद्युक्तोत्पादेन तद्यदि प्रायश्चित्तोपदेशोयं तर्ह्युक्तिस्तु राजदंडोपदेशोयं
तथा च छित्वा लिङ्गं स्ववृषणस्य सत्युक्तं न तु निष्कृतिरस्येति। नारदश्चाप्यमुमेवाह। शिश्नस्योत्कर्तनात्तत्र नान्यो दंडो विधी
यत इति। यत्तु यमेनोक्तं चंडालपुल्कसानां तु भुक्त्वा गत्वा च योषितं। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयमिति तद्रेत
तः सेकात्सर्वं द्रष्टव्यं। तथा हृदयमादिवचनानि प्रायश्चित्तोपदेशकानि नानाविधानि तत्र द्रष्टव्यमः। चंडाली
पुल्कसी व्याधी स्नुषाश्च भगिनी सखी। मातुः पितुः स्वसारं च निक्षिप्तां शरणागतां। मातुलानीं स्वसां स्वसगोत्रा
मन्यायनिदिताः। शिष्टालार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेदिति। तथा मनुः। पितृस्वस्रेयीं भगिनीं स्वस्रीयां मा
तुरेव च। मातुश्च भ्रातुराप्तस्य गत्वा चान्द्रायणं चरेत्। तथा बृहस्पतिः। गुरोर्दुहितरं गत्वा स्वसारं मातरेव वा। त
स्याद्दुहितरं चैव चरेच्चान्द्रायणं व्रतं। मातुलानीं तथा श्वश्रूं सुतां वै मातुलस्य च। मातुः स्वसारं मनासिं पराकेण विशु
ध्यति। तथा प्रहरदासिष्ठः। आचार्याणीं तु योगाच्छेत्स कन्यो हाप्तु कामतः। पितृस्वसृश्च गमने द्विजश्चान्द्रायणं चरेत्।

प्रा०
५८

तथा बृहन्मनुः ॥ मातुर्मातुः स्वसागमने पितुर्मातुः स्वसृ तथैव च । एतास्त्वकामतो गत्वा द्विजश्चान्द्रायणं चरेत् । गच्छेद्वै मातुलसुतां मा
तृगोत्रां तथैव च । समानप्रवरां वापि द्विजश्चान्द्रायणं चरेत् । तथा स्वल्पशातातपः । मातुलानीं च यो गच्छेच्छ्वश्रूं श्याली
ञ्च मानवः । मातुलस्य सुतां गत्वा चरेच्चान्द्रायणव्रतम् । तथा बृहद्यमः । मातुलानीं च यो गच्छेत् स्नुषां चैव मानवः ॥ मातु
स्वसुः स्वसागमने द्विजश्चान्द्रायणं चरेत् । तथा षट्त्रिंशन्मते । पितृमातृस्वसृस्नुषाभगिनीभागिनेयीगोत्रचाण्डालीगम
ने तप्तकृच्छ्रत्रयं सावित्र्यपनयनम् ॥ तथा संवर्तः । असती मातुलानी च स्वसा रश्चान्यमातृजाः । एता द्विजः स्त्रियो ग
त्वा तप्तकृच्छ्रं समाचरेत् ॥ तथाङ्गिराः । पतितान्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य वा । मासोपवासं कुर्वीत चान्द्राय
णमथापि वेति । तथा बृहत्संवर्तः । चाण्डाली पुल्कसी म्लेच्छी श्वपाकी पतिता तथा । एतास्तु ब्राह्मणो गत्वा चरेच्चा
न्द्रायणत्रयमिति । तथा शातातपः । सुतां सुतस्य यो गच्छेत् सगोत्रां च तथैव च । समानगोत्रजां चापि द्विजश्चा ५८
न्द्रायणं चरेदिति । सगोत्राशब्देन सप्तपुरुषपर्य्यन्तं सपिण्डा अभिमता । समानगोत्रजाशब्देन सप्तपुरुषादुपरि जा

ता अभिहिता । तदेतानि लघुलघुतरलघुतमप्रायश्चित्तानि अकामविदकामतश्चाविषयाभिचारिणीषु रेतःसेकात्पूर्वं कश्चिदुत्त
न्यासे वा रिणीषु संबन्धसंनिकर्षविप्रकर्षवशेन व्यवस्थापनीयानीति ॥ ॥ इदानीमब्राह्मणपरदारगमनप्रायश्चित्तं
निरूप्यते । तत्र शङ्खः । वैश्यायामवकीर्णः संवत्सरं ब्रह्मचर्य्यं त्रिषवणमनुतिष्ठेत् । क्षत्रियायां द्वे वर्षे त्रीणि ब्राह्मण्य
वैश्यावच्छूद्रायामिति । एतच्च ब्राह्मणस्य ज्ञानतो गुणवद्ब्राह्मण्यादिगमने द्रष्टव्यम् । शूद्रायास्तु वैश्यातुल्यत्वात् सवर्णब्रा
ह्मणपरिणीतगुणवच्छूद्रागमने वार्षिकं द्रष्टव्यम् । अर्थाच्छूद्रपरिणीतगुणवच्छूद्रागमने षाण्मासिकं व्रतमिति । ही
नहीनतरब्राह्मणीगमने द्विवार्षिकं । एवं क्षत्रियावैश्याशूद्राणामपि हीनहीनतराणां यथायोग्यं हानिरूहनीया । व
त्रः स्वैरिण्यादिहीनतमब्राह्मणीगमने त्वतिशयेन प्रायश्चित्तस्यासदर्शनात् । क्षत्रियस्य तु क्षत्रियागमने पादहीनं
द्विवार्षिकं । क्षत्रियस्य वैश्यागमने पादहीनं वार्षिकं । क्षत्रियस्य ब्राह्मणपरिणीतशूद्रागमने पादहीनं वार्षि
कं शूद्रपरिणीतशूद्रागमने पादहीनं षाण्मासिकमिति । एवं वैश्यस्य वैश्यागमने द्विपादहीनं वार्षिकं ब्राह्म

प्रा॰ णपरिणीतशूद्रागमनेपिद्विपादहीनंवार्षिकं।शूद्रपरिणीतशूद्रागमनेद्विपादहीनंषाण्मासिकं।तथाशूद्रस्य
५२ ब्राह्मणपरिणीतशूद्रागमनेत्रिपादहीनंवार्षिकं।शूद्रपरिणीतशूद्रागमनेत्रिपादहीनंषाण्मासिकमिति।अत्रा
नतक्तः सर्वत्रतदर्द्धमिति।यदितुब्राह्मणीक्षत्रियावैश्याशूद्रावासकृत्सवर्णेनोत्तमवर्णेनवाव्यभिचरितालभते
तदासवर्णस्योत्तमवर्णस्यवतदुपगमेयत्त्रैवार्षिकादिप्रायश्चित्तंतस्यपादहानिः।अभ्यासेनसवर्णव्यभिचरिते
पगमेद्विपादहानिः।अत्यन्ताभ्यासेनसवर्णव्यभिचरितोपगमेपादत्रयहानिः।तथाचापस्तम्बः।सवर्णायाम
नन्यपूर्वायांसकृत्संनिपातेपादःपतति।एवमभ्यासेद्विपादः।अत्यन्ताभ्यासेत्रिपादः।चतुर्थेसर्वमिति।अनन्य
पूर्वायामितिसवर्णादन्येनसवर्णस्यप्रतिषेधात्सवर्णपूर्वायामित्यर्थः।चतुर्थेसर्वमितिनत्रैवार्षिकादिक्रमेण ५२
पादहान्याप्रायश्चित्तह्रासः।किंतर्ह्यन्यदेवतत्शंखाद्युक्तंप्रायश्चित्तमित्यर्थः।तथाचशंखः।चतुःस्वैरिणीं
वृषल्यामवकीर्णःसचेलस्नातउदकुम्भंब्राह्मणायदद्यात्।वैश्यायांचतुर्थकालाहारोब्राह्मणान्भोजयेत्।

क्षत्रियायांत्रिरात्रोपोषितोयवाढकंब्राह्मणायदद्यात्।ब्राह्मण्यांषड्रात्रमुपोष्यघृतपात्रंदद्यात्।चतुःस्वैरिणीचच
तुष्टयव्यभिचरिताभिधीयते।एतच्चजातिमात्रोपजीविहीनतमब्राह्मणादिगमनेमन्दज्ञानतः।उत्कृष्टोत्कृष्टतरब्राह्मणा
दिगमनेएतदेवद्विगुणंत्रिगुणंअज्ञानतःततोपिद्विगुणपञ्चगुणंद्रष्टव्यम्।तेनयदेतद्वसिष्ठेनोक्तंब्राह्मणश्चेदप्रेक्षापूर्वक
ब्राह्मणदाराभिगच्छेन्निवृत्तधर्मकर्मणःकृच्छ्रो।निवृत्तधर्मकर्मणोतिकृच्छ्रइति।तदपिचतुःस्वैरिणीविषय
मेवव्यवस्थायोग्यंद्रष्टव्यं।निवृत्तधर्मकर्मास्याधार्मिका।अनिवृत्तधर्मकर्माधार्मिकाः।सर्वत्रसजातीयविजातीयचतुष्प्र
दूषितायाःप्रायश्चित्तंह्रस्वकचतुष्कतुल्यमेवद्रष्टव्यं।तथाचमनुः।विप्रदुष्टांस्त्रियंभर्त्तानिरुन्ध्यादेकवेश्मनि।यत्पुंसःपरदा
रेषुतच्चैनांचारयेद्व्रतमिति।नचात्रविप्रदुष्टामितिविप्रशब्दस्यब्राह्मणोक्तत्वाद्ब्राह्मणदुष्टामितिबोद्धव्यं।सर्व
परदारगमनप्रायश्चित्तानांसकलस्त्रीप्रायश्चित्तोपदेशकत्वेनास्यमनुनोक्तत्वात्।तथाचयाज्ञवल्क्योनापिसक
लपारदारिकचतुष्कप्रायश्चित्तमतिदिशन्तुल्यरूपमेवस्त्रीणामपिप्रायश्चित्तमुक्तं।तथाचयाज्ञवल्क्यः।एषएवविधि

Indira Gandhi National
Centre for the Arts

प्रा·
५२ धिः स्त्रीणामनितान्तमुदाहृतमिति। किञ्चाविप्रदुष्टामिति ब्राह्मणाद्दुष्टामित्यपि तिद्धेतं तदा सवर्णाशूद्रादिव्यतिचारितस्त्री
णां प्रायश्चित्तमनुक्रमेणापद्येत। न च स्त्रीणामर्द्धं प्रदातव्यमित्यनेनोक्तमिति वक्तव्यं। तस्य सजातीयपुरुषापेक्षया स्त्री
णां प्रायश्चित्तार्द्धोपदेशकत्वात्। न त्वतिगन्तृपुरुषापेक्षया। तथा सति सुवर्णहरणादिपापान्तरेष्वतिगन्तृपुरुषात
वेनैतस्य वचनस्याप्रवृत्तत्वे पुरुषसमानप्रायश्चित्तप्रसङ्गात्। अत एव बृहद्विष्णुनोक्तं यत्पुंसः परदारेषु समानेषु
विधीयते। व्यतिचारेपि तत्तुः स्त्री तदशेषं समापयेत्। अत्रापि समानेष्विति न समानजातीयत्वेन समानत्वं विवक्षितं
किन्त्वदुष्टत्वेन। तेनादुष्टपुरुषस्यादुष्टपरदारेषु गमने स्त्रीणामपि पुरुषतुल्यमेव व्रतं न तु स्त्रीत्वेनार्द्धहानिः। व्यवस्था
कर्त्तव्या। तदुक्तं तदशेषं समापयेदिति। तेन यद्यप्यतः सवर्णदूषिता स्त्री भवति तदा तत्समागमे पुरुषस्य प्रायश्चि
त्तात्पत्वात् पुरुषतुल्यप्रायश्चित्तेन स्त्रीणां विशुद्धिः। तथा यद्यप्यत एव पुरुषः पतितो भवति तदा पुरुषस्य प्रायश्चि ५२
त्तवत्कृत्वात् तत्समागमे स्त्रीणां न तुल्यप्रायश्चित्तं। किन्तर्ह्यदुष्टत्वे स्त्रीपुरुषयोः प्रथमसमागमे यत्पुरुषस्य प्राय

श्चित्तं तदेव स्त्रीणामपि। तदुक्तं यत्पुंसः परदारेषु समानेषु विधीयते। व्यभिचारेपि तत्तुः स्त्री तदशेषं समापयेदिति। अत्रास
वत्रैव पारदार्ये प्रथमसमागमे सजातीयविजातीयपुरुषस्य यत्प्रायश्चित्तं तदेव तद्दूषितस्त्रीणामपि द्रष्टव्यमिति।
तथा सर्वत्र पारदार्यगमनोत्पन्नो सतां स्त्रीपुरुषयोः प्रायश्चित्तद्वैगुण्यं कामचारबहुलत्वाद् दस्यापि पापो त्पत्तेस्तुल्य
त्वेन निर्द्देशात्। तथा चापस्तम्बः। चण्डालमेदश्वपचकपालव्रतचारिणां। अकामतः स्त्रियो गत्वा पराकव्रतमाचरेत्॥
कामतस्तु प्रवृत्तो वा तत्समो नात्र संशयः। स एव पुरुषस्तस्याः गर्भो भूत्वा हि जायते। पराकव्रतं ज्ञातानतो रेतस्से
कान्तर्द्द्रष्टव्यं। कामतस्तु प्रवृत्तो वेति कामनागमनोत्पादयोस्तुल्यत्वं दर्शयति। कामतस्तु प्राय
श्चित्तद्वैगुण्यं। विहितं यदकामानां कामात्तद्द्विगुणं स्मृतमिति वचनात्। तथा स्त्रिया अपि गमनोत्पादे पापातिरेक
नाहवसिष्ठः। ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण सङ्गताः। अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतरा इति। तेन
गमनोत्पादे स्त्रीपुरुषयोः प्रायश्चित्तद्वैगुण्यमेवेति। अत्रापि बलवचोक्तन्यायेन सकृद्रस्यासातस्यासे षष्ठिकाद्दि

प्रा० पापेष्वज्ञानपि तद्भेदोऽवप्रायश्चित्तानुष्ठानमल्पपापान्तरेष्वप्युक्तप्रसङ्ग एवेति॥ इदानीं प्रातिलोम्यगमनप्रायश्चित्तं नि
५४ रूप्यते। तत्र वसिष्ठः। शूद्रश्चेद्ब्राह्मणीमधिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं का
रयित्वा सर्पिषाऽभ्यज्य नग्नां खरमारोप्य महापथमनुसंप्रापयेत्पूता भवतीति विज्ञायते। वैश्यश्चेद्ब्राह्मणीम
धिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येद्ब्राह्मण्याः सर्वं पूर्वोक्तमेव गौरखरारोपणं विशेषः। क्षत्रिय
श्चेद्ब्राह्मणीमधिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ प्रास्येद्ब्राह्मण्याः सर्वं पूर्वोक्तमेव। एवं वैश्यो राजन्यां गत्वा
शूद्रश्च राजन्यां वैश्यामिति। यत्तु शङ्खेनोक्तं। प्रातिलोम्ये वधः पुंसां स्त्रीणां नासादिकर्त्तनमिति। तत्प्रायश्चि
त्ताभिप्रायं किन्तु राजदण्डाभिप्रायमिति। यदि प्रातिलोम्यव्यभिचारेऽप्युक्तषट्स्त्रियोऽपि यथोक्तप्राणान्तप्रायश्चित्तं न
कुर्वन्तस्तदा राजा प्रकारान्तरेणापि प्रसक्तिवारणार्थं पुरुषस्य वधः कार्यः स्त्रीणां च नासादिकर्त्तनं कर्त्तव्यमिति। ५४
एतच्च ज्ञानतो द्रष्टव्यमज्ञानतस्तु शूद्रस्य ब्राह्मणीगमने द्वादशवार्षिकमितरत्र पादपादहानिस्तेन शूद्रस्य क्ष

न्नतः क्षत्रियागमने नववार्षिकं वैश्यागमने षड्वार्षिकं। तथा च वृहत्प्रचेताः॥ शूद्रस्य ब्राह्मणीमोहाज्जातस्य शुद्धिरीप्सि
तः॥ पूर्णमेतद्व्रतं देयमाताऽयस्मात्तिस्यसा॥ पादहान्याऽन्यवर्णासु गच्छतस्सार्ववर्णिकं। प्रायश्चित्तमिदं शूद्रस्याग
म्यागमने स्मृतमिति। अनेनैव वैश्यस्याऽज्ञानतो ब्राह्मणीगमने नववार्षिकं क्षत्रियागमने षड्वार्षिकं। क्षत्रिय
स्याज्ञानतो ब्राह्मणीगमने षड्वार्षिकमेवात्रापि बालवृद्धरोगिणां यथोक्तैवार्द्धव्यवस्था द्रष्टव्या। स्त्रीणा
न्तु विप्रदुष्टां स्त्रियं भर्त्ता निरुन्ध्यादेकवेश्मनि। यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतमिति। वचनात्पुरुषसमान
मेव प्रायश्चित्तमित्युक्तमेव॥ इदानीमन्त्यजस्त्रीगमने प्रायश्चित्तं निरूप्यते। अन्त्यजाश्च रजकादय एवाय
ताः स्वल्पयमेन रजकश्चर्मकारश्च नटो वरुड एव च। कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृता इत्यभिधाय प्रा
यश्चित्तमुक्तं। भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयमिति। ए
तत्कृच्छ्राब्दप्रायश्चित्तं ब्राह्मणस्यात्यन्ताभ्यासविषयं ज्ञानतः। अज्ञानतोऽत्यन्ताभ्यासेऽपि तत्र चान्द्राय

Indira Gandhi National
Centre for the Arts

प्राय· णद्वयद्वयमिदंद्रष्टव्यं।यत्तुहारीतेनोक्तं।कैवर्त्तीञ्चजिनीञ्चैवपाश्चात्यपतिसङ्गवा।कामतःक्रव्रजाद्विप्रःएतान्येवसमाचरेत्।द्वौ
मासौतैलआहारोद्वौमासौयवयावकैः।द्वौमासौपञ्चगव्येनषण्मासाश्चरितव्रतः।एवंशुद्धिमवाप्नोतिप्रायश्चित्तमुसारत
स्मृति।तदपिषाण्मासिकप्रायश्चित्तंब्राह्मणस्यैवज्ञानतोत्यासविषयंद्रष्टव्यं।यत्त्वापस्तम्बेनोक्तं।म्लेच्छीनटीचर्मक
र्त्रीरजकीचवरटीतथा।एतास्तुगमनंकृत्वाचरेच्चान्द्रायणत्रयमिति।तदपिब्राह्मणस्यैवज्ञानतःसकृद्गमनविषयंद्र
ष्टव्यं।यत्तुसंवर्त्तेनोक्तं।रजकव्याधशैलूषवेणुचर्मोपजीविनां।स्त्रियोविप्रोयदागच्छेत्कृच्छ्रंचान्द्रायणञ्चरे
त्।एतदपिब्राह्मणस्यैवाज्ञानतोऽत्यन्ताभ्यासविषयं।अत्रकृच्छ्रंप्राजापत्यंतत्सहितंचान्द्रायणमुपेहितं।यत्तुसं
वर्त्तेनोक्तं।शैलूषीरजकीचैववेणुचर्मोपजीविनीं।एतागत्वाद्विजोमोहाच्चरेच्चान्द्रायणव्रतमिति।एतदपिब्राह्म
णस्यैवाज्ञानतोत्यासविषयंद्रष्टव्यं।यत्तुनःशातातपेनोक्तं।कैवर्त्तीरजकींवापिवेश्यांवापिगतोनरः।प्राजा ५५
पत्यविधानेनकृच्छ्रेणैकेनशुध्यतीति।तदकामतःसकृद्गमनविषयंद्रष्टव्यं।एतेनवेश्यायाःकैवर्त्यादिसमति

व्याहाराज्ज्ञानतोऽज्ञानतश्चकैवर्त्यादिगमनेसकृदल्पासात्यन्ताभ्यासेःप्रायश्चित्तमुक्तंतदेववेश्यागमनेद्रष्टव्यमिति।
हारीतादीनांतुविप्रस्यसकलंदेयमितिबृहद्विष्णुवचनात्पादपादहानिर्द्रष्टव्येति।शूद्रायांतुरजकाद्यस्यनगमने
ऽज्ञानतःप्राजापत्यत्रयंज्ञानेनतदेवद्विगुणं।तथाचशातातपः।म्लेच्छेनाधिगताःशूद्राअकामाद्याःकथञ्चन।कृच्छ्रत्र
यम्प्रकुर्वीतज्ञानेतद्विगुणंलवेदिति।एतच्चवचनंयद्यपिम्लेच्छमात्रविषयंतथापिरजकादीनांप्रायश्चित्तविशे
षाश्रवणात्तास्वपि।म्लेच्छीनटीचर्मकर्त्रीरजकीचवरटीतथा।एतास्तुगमनंकृत्वाचरेच्चान्द्रायणत्रयमितिवचनेनम्लेच्छस
मतिव्याहाराद्रजकादिगमनेपिशूद्रायाःएतदेवप्रायश्चित्तमिति।तथाचोक्तमुशनसा।बहूनामेकधर्मिणामेक
स्यापियदुच्यते।सर्वेषामेवतत्कुर्यादेकरूपाहितेस्मृता।चाण्डालाद्यन्त्यावसायिगमनेतुशूद्रायास्समतिव्याह
रादपिप्रायश्चित्तविशेषानवगमाद्यच्छूद्रस्यचण्डालीगमनेप्रायश्चित्तंतदेवशूद्रायाअपिचण्डालादिव्याप्तिवा
रेसंग्रहनीयमिति।किंतुशीलेनात्रप्रायश्चित्तार्द्धमितिविशेषः।एतेनबालवृद्धादिषुद्रवंकेवाद्दारिव्यवस्थाद

प्रा·
५६

हृद्धेति। इदानीं रजस्वलादिगमने प्रायश्चित्तं निरूप्यते। तत्र स्वल्पसवर्णा। रजस्वलां तु यो गच्छेद्गर्भिणीम्पतितान्तथा।
तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विशोधनमिति। गर्भिणी चाष्टमासगर्भा। एतच्च प्रथमदिवसीयसवर्णरजस्वलागमन
विषयं। तथातिकृच्छ्रे तु द्वयं यत्तु शातातपेनोक्तं रजस्वलागमने सप्तरात्रमिति। तद्द्वितीयदिवसीयसवर्णरजस्वला
गमनविषयं। यत्तु याज्ञवल्क्येनोक्तं त्रिरात्रान्ते घृतं प्राश्य गत्वोदक्यां शुचिर्भवेदिति। तत्तृतीयदिवसीयसवर्ण
रजस्वलागमनविषयं। एतच्च सर्वविशेषाश्रवणात् ज्ञानतो द्रष्टव्यमज्ञानतोऽस्यार्द्धं। असवर्णरजस्वलागमने त्वं
सवर्णस्त्रीगमनप्रायश्चित्तादधिकमतिकृच्छ्रादिकं यथोक्तक्रमेणोहनीयमिति। इदानीं सख्यादितिर्यग्योनिग
मनप्रायश्चित्तं निरूप्यते। तत्र व्यासः। सखिस्वयोनिसगोत्राशिष्यभार्यासु गानिवेवमिति। एतच्च वचनं गोगम
स्य गुरुतल्पगमनमहापातकसाम्यप्रतिपादकं। सखिस्वयोनिसगोत्राशिष्यभार्याणामगमनीयासमत्तिव्या
हारासम्भवात्सगोत्रशब्देनैव प्राप्तेः स्नुषाशब्दानर्थक्याच्चानिदार्थत्वाद्दोषः सगोत्रादिगमने सवर्णपरदारगमनप्राय ५६

श्चित्ताद्द्विगुणप्रायश्चित्तप्रदर्शनार्थमिति। गुरुतल्पावसर एवोक्तम्। तेन ज्ञानपूर्वकात्यन्ताभ्यासतो ब्राह्मणस्य गोगम
ने षाण्मासिकं प्रायश्चित्तं। यत्तु बृहद्विष्णुनोक्तं। परदारगमने गोगमने चेति। तत् सकृद्गोगमनविषयं गोवधेन श
द्धेन गोवधप्रायश्चित्तमुच्यते। तच्च वृषैकादशगोदानाधिकत्रैवार्षिकं व्रतम्। यत्तु गोतमेन वैश्यवधे त्रैवार्षिकं वृष
भैकादशाश्च गा दद्यादित्युक्तम्। गोवधे वैश्यवदिति गोवधे तदेवातिदिष्टं तत्सर्वं सवनस्थवैश्यसंबंधिकपिलादि
गोवधविषयमिति व्याख्यातं तदेवात्र विषयगौरवादतिदिष्टं वेदितव्यं। अत्यन्ताभ्यासतः षाण्मासिकमनितस्यैवोक्ति
तत्वात्। तेन ब्राह्मणस्यैव सकृद्गोगमने वृषैकादशगोदानाधिकत्रैवार्षिकं द्रष्टव्यमिति। अज्ञानतस्त्वर्द्धं। क्षत्रि
यादीनां तु यथाक्रमं पादपादहानिर्द्रष्टव्येति। यत्तु संवर्त्तेनोक्तं गोषु योनिगमनं कृत्वा कृच्छ्रं चान्द्रायणं चरेदिति त
द्वैतस्मैकान्तिर्विद्रष्टव्यमिति। अस्पृश्यकुक्कुरादिगमने प्राजापत्यमेव। तथा च बृहत्संवर्त्तः। पशुवेश्यागमने प्रा
जापत्येन शुध्यतीति। पशुवेश्यापशुस्त्रीछागमहिष्यादिपशुगमने मनुराह। अमानुषीषु पुरुष उदक्यायामयो

Indira Gandhi National
Centre for the Arts

प्रा·
५७

निष्ठुरेतस्मिन्का जलेवैव कृच्छ्रं सान्तपनञ्चरेदिति। अमानुषीतिर्यग्योनिः अनङ्गः अम्बादिः उदका स्नानात्पूर्वं
चतुर्थदिवसीया। अयोनिः दृष्टो दिदेशः। अत्र सान्तपनं महस्यामंड दृष्टं। जलादिविषयस्याल्पत्वात्तायत्तुसंन
र्ज्ञेनोक्तं पशुवेश्यागमं कृत्वा कामवा रात्त्रु प्राधिना। अहोरात्रोषितः कुर्यात्प्राणायामत्रयन्नलइति। तद्वेकस्मे कात्ट
वेद्दृष्टव्यं। गवादियानारूढस्य तु मैथुने स्त्री पुरुषसाधारणमेव स्नानमात्रम्प्रायश्चित्तन्तथा च याज्ञवल्क्यः। मैथुनं तु समासेव्य
पुंसि योषिति वा द्विजः। गोयाने प्सु दिवा चैव सवासाः स्नानमाचरेदिति॥ ॥इदानीमवकीर्णिप्रायश्चित्तं निरूप्यते। अव
कीर्णी व दृहयमेनोक्तः। व्रतीयः स्त्रियमत्येति सोवकीर्णीति निरुच्यते इति। व्रती च ब्रह्मचर्यवातिप्रेतः। तथा च यासन
ल्क्यः। अवकीर्णी तवेद्गत्वा ब्रह्मचारी च योषितं। गर्दभम्पशुमालभ्य नैर्ऋतं सविशुध्यति। गर्दभश्च काणो ग्राह्यः।
तथा च मनुः। अवकीर्णी च काणेन गर्दभेन चतुष्पथे। पाकयज्ञविधानेन यजेत नैर्ऋतीं निशि। हुत्वाग्नौ विधि ५७
वद्धोमानन्ततश्च समित्यृचा। वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीरिति। तथा च वसिष्ठः। ब्रह्मचारी चेत्स्त्रि



यमुपेयादरण्ये चतुष्पथे लौकिकेग्नौ रक्षोदैवतं गर्दभम्पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत्तस्य जुहुयात्कामाय स्वाहा काम
कामाय स्वाहा नैर्ऋत्यै स्वाहा रक्षोदेवताजनेभ्यः स्वाहेति। तथा च गौतमः। गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत्
तस्याजिनमूर्ध्ववालम्परिधाय लोहितपात्रेण सप्त गृहान्भैक्षं चरेत्स्वकर्म चक्षाणः संवत्सरेण शुध्येदिति। पा
कयज्ञविधानं शाकलहोमविधानं तेनायमर्थो भवति। अवकीर्णी अरण्ये चतुष्पथे निर्ऋतिदेवताकं काणं गर्द
भमालभ्य तद्वपां नैर्ऋत्यैति देवताकं चरुं चरुमपयित्वा शाकलहोमविधानेन लौकिकाग्निं स्थाप्य देवकृतस्येन सो
वयजनमसि स्वाहेत्यादिस्थाने ॐ कामाय स्वाहा ॐ कामकामाय स्वाहा ॐ नैर्ऋत्यै स्वाहा ॐ रक्षोदेवताजनेभ्यः स्वा
हा। अन्ते च समित्यृचा वातेन्द्रगुरुवह्नीनां प्रत्येकमाज्याहुतीर्हुत्वा गर्दभचर्म बहिः केशम्परिधाय स्वकर्म वदन्
मृन्मयलोहितपात्रेण प्रत्यहं सप्तागारे भिक्षां चरन् संवत्सरेण शुध्यतीति। एतच्चावकीर्णिव्रतं ब्राह्मणादि
त्रैवर्ण्यस्योक्तं प्रायश्चित्तं कृत्वाधिकरुष्टसंशाद्धविपवैश्ययोस्त्वेतदेवावकीर्णिव्रतं पादपादहीनं द्रष्टव्यम्। राज्ञे

Indira Gandhi National
Centre for the Arts

प्रा. नयदेतदङ्गिरसोक्तं अवकीर्णीनिमित्तेनब्रह्महत्याव्रतंचरेत्।चीरवासाःषण्मासांस्तथामुच्येतकिल्बिषादिति।
५८ तदेतद्ब्रह्मचारिविषयमेवद्रष्टव्यम्।योषिद्घातिकेनब्रह्मचारिणाकामतोरेतस्त्यागेसप्तरात्रमतोनन्तोकामाव
कीर्णोस्मिकामावकीर्णोस्मीतिद्वाभ्यांमन्त्राभ्यांआज्याहुतिद्वयंकृत्वाविशुद्धिः।तथाचगौतमः।रेतःस्कन्दनेभयेरोगे
स्वप्नेग्नीन्धनभैक्षाचरणानिसप्तरात्रमकृत्वाआज्यहोमस्समिधोवारेतस्याभ्यामिति।स्वप्नादौरेतस्त्यागेमनुनो
क्तंप्रायश्चित्तं।स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकामतः।स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेदिति।
इदानींगुर्वङ्गनागमनेरहस्यप्रायश्चित्तंनिरूप्यते।तत्रयदेतदज्ञानतःसकलमहापातकसाधारणंरहस्यप्रा
यश्चित्तमघमर्षणसूक्तंतदेवात्रापिद्रष्टव्यं।तथाचमनुः।महापातकसंयुक्तोनुगच्छेद्गाःसमाहितः।अभ्यस्याब्दंपाव
स्मा मानीर्भैक्षाहारोविशुध्यतीति।व्याख्यानञ्चब्रह्मवधपरिच्छेदएव।ज्ञानतस्तुरहःकृतमहापातकचतुष्टयेमरणा ५८
न्तिकमित्युक्तमिति।यत्तुयाज्ञवल्क्येनोक्तं।सहस्रशीर्षाजापीतुमुच्यतेगुरुतल्पगः।गौर्देयाकर्मणोस्यान्तेपृथ

गेताःपयस्विनीतिातदज्ञानतोरेतस्सेकात्पूर्वंगुर्वङ्गनागमनेसतिद्रष्टव्यं।यत्तुपुनर्मनुनोक्तं।हविष्यान्तीयमभ्यस्यनतमंह
इतीतिच।जप्त्वापौरुषंसूक्तंमुच्यतेगुरुतल्पगःइति।तदज्ञानतोरेतस्सेकात्पूर्वंद्रष्टव्यमिदाय
घमभ्यस्यनतमंहइतीतिच।जप्त्वापौरुषंसूक्तंमुच्यतेगुरुतल्पगःइति।तदज्ञानतोरेतस्सेकात्पूर्वंद्रष्टव्यं।यदपरमनुनोक्तं
अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहितां।मुच्यतेपातकैःसर्वैःपराकैःशोधितस्त्रिभिरिति।तज्ज्ञानतोप्युपपातक
रूपसपत्नमातृदुहितृभगिनीस्नुषागमनविषयंद्रष्टव्यं।ज्ञानतस्तुमरणान्तिकमत्राविधेयं।यथोक्तमेवाएतदेवज्ञा
नतोगुरुतल्पातिदेशविषयेपितृव्यसखीमातुलानीसखीगमनेपिद्रष्टव्यं।यच्चापरम्मनुनोक्तं।त्र्यहंत्वुपवसेद्युक्त
स्त्रिरह्नोभ्युपयन्नपः।मुच्यतेपातकैस्सर्वैर्जप्त्वात्रिरघमर्षणमिति।तदन्यवर्णमातुलान्यादिगमनविषयंद्रष्टव्यं।
यच्चापरम्मनुनोक्तं।ऋक्संहितांत्रिरभ्यस्ययजुषांवासमाहितः।साम्नांवासरहस्यानांसर्वपापैःप्रमुच्यतइति।तद
स्वजनब्राह्मणीगमनगोगमनादिसकलयोनिरहस्यपापविषयंद्रष्टव्यमिति॥ ॥इतिबालवल्लभीभुजङ्गाप

Indira Gandhi National Centre for the Arts

प्रा० ५९ परनाम्नो लद्दश्रीलवदेवस्य कृतौ प्रायश्चित्तप्रकरणे गम्यागमनप्रायश्चित्तपरिच्छेदः समाप्तः ॥ ॥ इदानीं संसर्गप्रायश्चित्तं
निरूपणीयं महापातकत्वेनोक्तत्वात् प्रथमं महापातकिसंसर्गप्रायश्चित्तं निरूप्यते । तत्र निरूपितेषु संसर्गप्रकारेषु संस
र्गप्रायश्चित्तानिरूपणात् संसर्गप्रकारा एव निरूप्यन्ते । के ते संसर्गप्रकारा इति । तत्राह बृहस्पतिः । एकशय्याशनं पङ्क्तिभा
ण्डपक्वान्नमिश्रणं । याजनाध्यापनं योनिस्तथा च सहभोजनम् । नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सहेति । तथा छागले
यः । आलापाद्गात्रसंस्पर्शान्निःश्वासात्सहभोजनात् । सहशय्यासनाद्यानात्पापं संक्रमते नृणामिति । तथा च देवलः । संला
पस्पर्शनिःश्वाससहयानासनाशनात् । याजनाध्यापनाद्यौनात्पापं संक्रमते नृणामिति । तथा च पराशरः । आसनाच्छयना
द्यानात् संभाषणात् सहभोजनात् । संक्रामन्तीह पापानि तैलबिन्दुरिवाम्भसीति । अत्र कतमस्य महापातकस्य कियता का
लेन महापातकित्वापादकत्वमिति विज्ञेयं । तत्र सद्यःपातकहेतून् संसर्गानाह देवलः । याजनं योनिसंबं ५९
धं स्वाध्यायं सहभोजनं । कृत्वा सद्यः पतत्येव पतितेन न संशयः । याजनेन महापातकिनो यागार्त्विज्यं । योनिसंबंध

श्च पुरुषस्य महापातकिन्याः स्त्रिया समागमः स्त्रियाश्च महापातकिना पुरुषेण समागमः । एवं परिणयनमपि योनिसंबंध एव । तत्
था च सावित्रीपतितानभिधाय तैः सह परिणयनसंबंधनिषेधार्थं मनुनोक्तं । नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मा
न्यौनांश्च संबंधानाचरेद्ब्राह्मणः सहेति । तेन महापातकिना परिणीता कन्यापि महापातकिनी सा वा येन परिणीता सो
पि महापातकी । स्वाध्यायश्चाध्यापनं येन कालीनसावित्रीपातकः स येन महापातकिगुरुमुखाच्छ्रुतः स महापातकी । माण
वको वा महापातकी येन गुरुणाध्ययमध्यापितः सोऽपि महापातकी । सहभोजनं महापातकिना सहभावेनैकपात्र
भोजनं । अत्र च चतुर्णामेवैषां याजनयोनिसंबंधस्वाध्यायसहभोजनानां दृष्टत्वादुपादानात्प्रत्येकमेव महापातकि
त्वापादकत्वं । येषां तु महापातकिसंसर्गाणां संवत्सरेण महापातकित्वापादकत्वं तानाह बृहस्पतिः । संवत्सरेण
पतति पतितेन सहाचरन् । भोजनासनशय्यादि कुर्वाणः सार्वकालिकमिति । अत्र च सहभोजनमेकपंक्ति
भोजनं । आसनमेकासनोपवेशनं शय्या एकशय्याशयनं । आदिशब्देनैकयानगमनमभिप्रेतम् । वाक्यान्तरे

Indira Gandhi National
Centre for the Arts

प्रा·
६·

णासनादिसमाप्तिव्याहृतस्यैव संवत्सरेण पातकहेतुत्वस्योक्तत्वात्। तथा च मनुः। संवत्सरेण पतति पतितेन सहा
चरन्। याजनाध्यापनाद्यौनान्न तु यानासनाशनादिति। नचानेन याजनादीनामेव संवत्सरेण पातहेतुत्वम्प्रती
यते। देवलादिभिर्याजनादीनामुक्तसद्यःपातहेतुत्वाद्विरोधेन नत्विति निषेधस्य संवत्सरस्यानित्यसक्तिनिषे
धार्थं पूर्वैरेव याजनादिभिः संबंधात्। तेनायमर्थः। याजनादिभिः सद्यः पतति यानासनादिभिस्तु वत्सरेणेति।
तथा च बृहस्पतिः। षाण्मासिके तु संयोगे याजनाध्यापनादिना। एकत्रासनशय्यादि प्रायश्चित्तार्द्धमर्हतीति।
अस्यार्थः। याजनाध्यापनयोरादिर्याजनाध्यापनादिस्तेन याजनाध्यापनादिना षाण्मासिकसंसर्गे म
हापातके प्रायश्चित्तार्द्धम्। कोऽसौ याजनाध्यापनादिरित्याकांक्षायां स्ववाक्ये पूर्वपठितान्येतानि दिशति। एकत्रा
सनशय्यासनादीति पूर्वमनेन पठितं। एकशय्यासनं पंक्तिर्भाण्डपक्वान्नमिश्रणं। याजनाध्यापनं योनिस्तथा च ६·
सहभोजनमिति। अत्र याजनाध्यापनादिनेत्येतावतैव प्राप्ते सत्यामेकत्रासनशय्यादीति यदुक्तं तद्याजना

ध्यापनादिनेत्यनेन कृत्स्नस्य पूर्वोदितस्य भाण्डपक्वान्नमिश्रणव्याहृतस्यार्थशतैनैकशय्याशयनैकासनोपवेशनै
कपंक्तिभोजनैः षाण्मासिके प्रायश्चित्तं। अर्थात्संवत्सरेण संपूर्णं प्रायश्चित्तमिति। यदा तु षाण्मासिके तु संयो
गे याजनाध्यापनादिना। एकत्रासनशय्यादि प्रायश्चित्तार्द्धमर्हतीति पाठस्तदा तु यथाक्रममेव। तथा च वृद्धबृहस्पतिनैवो
क्तं· संवत्सरेण संसर्गो योनिमुक्तो विशेषतः। पूर्वोक्तेन विधानेन पतितव्रतमाचरेत्। योनिमुक्ते विशेषणशक्ति।
योनिशब्देन याजनाध्यापनं योनिस्तथा च सहभोजनमित्यस्य गणस्य परामर्शः। तेनायमर्थः। एकशय्यासनादि
भिः संवत्सरेण पतितव्रताचरणं योनिमुक्ते अविशेषतः सद्य एवेति। अत्र च संवत्सरेण पतति पतितेन सहाच
रन्। भोजनासनशय्यादि कुर्वाणः सार्वकालिकमिति वृद्धहारीतवचनात्। तथा संवत्सरेण पतति पतितेन सहा
चरन्। याजनाध्यापनाद्यौनान्न तु यानासनाशनादिति मनुवचनाच्च द्वंद्वनिर्देशेन परस्परसापेक्षत्वावगमान्मिलि
तानामेवैकपंक्तिभोजनैकासनोपवेशनैकशय्याशयनैकयानारोहणानां चतुर्णां संवत्सरेण पातहेतुत्वं

Indira Gandhi National
Centre for the Arts

तयोस्तुयत्रापिसंवत्सरेणपततिपतितेनसहाचरन्नितिमहापातकिनासहालापस्पर्शनिश्वासानामपिसंवत्स
रेणपातहेतुत्वंप्रतीयते।नवाचरन्नित्यस्योत्तरार्द्धेनसंबंधः।इहहिविष्णुवचनेऽलापनासनशय्यादिकुर्वाणःस
र्वकालिकमित्यनेनैवनिराकांक्षस्याचरन्नित्यसंबंधात्।मनुवचनेऽपियाजनाध्यापनाद्यौनात्तुयानासनाश
नादितिपृथङ्मात्रस्याचरन्नित्यसंबंधात्।तेनद्वयोरपिइहहिविष्णुमनुवचनयोराचरन्नितिपृथगेवाचरणमा
त्रस्यपातहेतुत्वंसंवत्सरेणप्रतीयते।तत्रसर्वोह्यालाप(?)स्पर्शविषयमेवावतिष्ठते।एषांत्रयाणामपिमि
लितानांतुहेतुत्वेनसंवत्सरेणपातहेतुत्वसंनवा [illegible] लापस्पर्श [illegible]
[illegible]कासनादिभिःसहमिलितानांपातहेतुत्वं।नेनसर्वोह्यात्वारः।एतत्त्वामिलितंत्रितयामितिसप्तानामे
वसमुच्चितानाम्पातहेतुत्वंसंवत्सरपर्यन्तंनिरन्तरमेवानुष्ठितानां।अन्तराव्यवापेतस्तुत्पवत्सरादिसङ्क
लनाकर्तव्या।अन्यतरापायेवतागाशःप्रायश्चित्तव्यवस्थोहनीयेति।आलापोऽन्योऽन्यसंकथनंतुस ६१

म्भाषणमात्रंतस्यातितुच्छतरप्रायश्चित्तोपदेशात्।तथाचपराशरः।कृतेनिश्चावितेत्वैवदत्ताश्लिष्टेतथाकृते।
पतिताअप्रसम्भाषेद्दक्षिणंश्रवणंस्पृशेत्।तथाचसुमन्तुः।असम्भाष्यसम्भाषणेब्राह्मणसम्भाषणमिति।
नवालापादीनामपिपृथगुपादानात्पृथगेवपातहेतुत्वं।तथाचछागलेयः।आलापाद्गात्रसंस्पर्शात्नि
श्वासात्सहभोजनात्।सहशय्यासनाद्यानात्पापसङ्क्रमतेनृणामिति।सत्यं।अनेनवचनेनपापसं
क्रमणमात्रंपृथगेवहेतुत्वमेषां।नतुपतितत्वोत्पत्तौप्रमाणाभावात्।अतोनविरोधइति।सर्वेषामे
षांसंसर्गप्रकाराणांज्ञानतएवपापहेतुत्वं।तथाचदेवलः।पतितेनसहोषित्वाजानन्संवत्सरंनरः।मिश्री
तस्तेनसोऽप्यन्तेस्वयंचपतितोभवेदिति।यत्तुप्राक्[illegible]रेणसम्वत्सरेणपततिपतितेनसहाचरन्याजनाध्या
पनाद्यौनात्तुयानासनाशनादित्यत्रमनुवचनेसंवत्सरेणपतितत्वंयाजनाध्यापनयौनेषुयानासना
शनेषुचनिषिध्यते।तेनवाक्यान्तरोपात्तैरालापनिश्वासस्पर्शैःसंवत्सरेणपततीतिसंबध्यते।तत्रयाज

नादौ वचनान्तरेण सद्यः पातस्य प्रतिपादितत्वाद्यानासनाशनैः पङ्क्तिरेव पापैः पतितत्वमित्युक्तं। तदप्युक्तं। सद्य उक्त
रितस्य निषेधस्यान्यतरेण संबंधोपपत्तेरस्य संबंधस्यानाथ्यत्वात् तथा संवत्सरेण पततीत्यस्य वाक्यस्यैरे
वयानासनाशनैः संबंधोपपत्तेर्वा कान्तरस्य संलापस्पर्शनिश्वासैः संबंधस्यातिजघन्यत्वादिति यथोक्तैव व्याख्या
पपन्नेमतीति। इदानीं प्रायश्चित्तं निरूप्यते। तत्र मनुः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कु
र्यात्तत्संसर्गविशुद्धये। अत्र व्रतोपदेशान्मरणरूपव्रतरूपत्वाभावाद्यद्यपि कामतो महापातकिनो मरणमेव प्रा
श्चित्तमुपदिष्टं तथापि तत्संसर्गिणस्तत्तुल्यत्वेऽपि व्रतरूपमेव। तेनाकामतो ब्रह्मवधादिमहापातकचतुष्टये यद्
दशवार्षिकं यत्कृतं तदेव कामतस्तत्संसर्गिणो द्रष्टव्यं तदुपरमस्य संसर्गिणोऽपि मरणान्तिकं। तदुक्तं स्वल्पयमेन।
महापातककर्तारश्चत्वारो वा विशेषतः। अग्निं प्रविश्य शुध्यन्ति स्थित्वा वा महति क्रतौ। महति क्रतावश्व ६२
मेधे। एतच्च क्षत्रियस्यैव। यजेत वाश्वमेधेन क्षत्रियो यो महीपतिरिति क्षत्रियस्यैवाश्वमेधाधिकारात्। तेन यदे

तन्मध्यमाङ्गिरसोक्तं। यश्चाकामतो महापापं नरः कुर्यात्कथञ्चन। तस्य शुद्धिर्बोद्धव्या यावज्जीवोपपतनाद्धृतमिति। तदपि ब्र
ह्मवधादिमहापापविषयमेव द्रष्टव्यं। यदपि छागलेयेनोक्तं। यस्य येन हि संसर्गस्तस्य तत्कर्मादिशत्। तात्त्वाक
रोति संसर्गानिष्कृतिर्न विधीयत इति। तदपि सकलपापिष्ठसंसर्गेष्वनिष्कृतत्वात्। वोपदेशस्यायुक्तत्वान्निन्दार्थवा
दतयैव बोद्धव्यं। तेन सद्यो वा संवत्सरेण वा संसर्गे च महापातकित्वं तत्र ज्ञानतो द्वादशवार्षिकं मतानतस्त
दर्धमिति बोद्धव्यं। अत्र यो येन पतितेनैषां संसर्गं याति मानव इति सर्वेषामेव महापातकातिपातकिपातक्युपपात
किनां साधारणं पतितशब्देन ग्रहणात्। तेन सपत्नमातृदुहितृसोदरभगिनीस्नुषासवर्णकुमारीगमनानामतिपा
तकत्वेन ज्ञानतो मरणान्तिकत्वेऽपि ज्ञानतो नववार्षिकस्योक्तत्वादज्ञानतस्तत्संसर्गे नव वार्षिकमेवापितृव्यम
र्याभ्रातृपत्न्यामातुलानीभागिनेयीपितृष्वसामातृष्वसादिगमनानामपातकत्वेन ज्ञानतः षाड्वार्षिकस्योक्तत्वा
ज्ज्ञानतस्तत्संसर्गेऽपि षाड्वार्षिकमेव। एवमस्वजनब्राह्मण्यादिगमनानामुपपातकत्वेन ज्ञानतस्त्रैवार्षिकादेर्

Indira Gandhi National Centre for the Arts

रुक्तत्वाज्ञानतस्तत्संसर्गे त्रैवार्षिकमेव योजनीयं। तथाज्ञानतः शूद्रव्यभिचारिताया ब्राह्मण्या ब्राह्मणीव्यतिचारि
तस्यैव शूद्रस्य मरणान्तिकोपदेशादज्ञानतो यद्द्वादशवार्षिकं तदेवाज्ञानतस्तत्संसर्गे योजनीयं। तथा च वृद्धहारि
यश्चापात्मना येन सह संसृजेत्स तस्यैव प्रायश्चित्तं कुर्यादिति। अथ पतितप्रतिग्रहपतितान्नभोजनपतितस
ष्टान्नभोजनतद्रूपसंसर्गप्रायश्चित्तं निरूप्यते। तत्र यदेतत्सवर्ज्जनब्रह्मवधादिचतुष्टयप्रायश्चित्तमतिधाम
तत्संसर्गमायाति यः कश्चित्काममोहितः। षण्मासान्नष्टमेव स्यात्पूर्वोक्तानां व्रतश्चरेदिति। एतद्विवक्तव्यमेवा
स्यः नेन ज्ञानतः षण्मासपर्यन्तं निरन्तरं महापातकिप्रतिग्रहे महापातकान्नभोजने च द्वादशवार्षिकम्पूर्वोक्तं
अदृष्टमेकम्त्वेतानेन तु ज्ञानतो ह्यपर्यन्तं महापातकिस्पृष्टान्नभोजने द्वादशवार्षिकमुक्तमिति। द्रष्टव्यम्। एव
मतिपातकिपातकोपपातकिप्रतिग्रहे तदन्नभोजने षण्मासे नववार्षिकषड्वार्षिकत्रैवार्षिकाणि प्रायश्चि ६२
त्तानि तत्स्पृष्टान्नभोजने च सम्वत्सरेणेति द्रष्टव्यं सर्वत्राज्ञानतस्तदर्द्धं। तेनाज्ञानतः सम्वत्सरपर्यन्तं महापात

क्यादिप्रतिग्रहान्नभोजनसंसर्गे द्वादशवार्षिकादिप्रायश्चित्तं योजनीयं। सम्वत्सरादूर्ध्वं तु संवत्सरे व्यतीते प्रायश्चि
त्तं न विद्यते इति वचनात्प्रायश्चित्तातिरेकः किन्तु सम्वत्सरेण यत्प्रायश्चित्तं तदेव द्रष्टव्यं। अत्र च त्यागमहारोणा
त्यहिकादिप्रायश्चित्तं संग्रहणीयं। किंतु पतितानां तु सर्वेषां भुक्त्वान्नं चांद्रायणं चरेदिति छागलेयवचनात्स
कृन्महापातकान्नभोजने चान्द्रायणं तदुपरि त्यागमहारोणात्यहिकादिप्रायश्चित्तं संग्रहणीयं। महापातकिस्पृ
ष्टपाकान्नभोजने तु संसर्गाभावेऽपि किंचिद्व्यवहितत्वात्पादपादहानिर्द्रष्टव्येति। महापातकिपाकसङ्कीर्णपाकान्न
भोजने तु ततोऽपि व्यवहितत्वात्तदर्द्धहानिरिति विवेक्तव्यम्। ननु चांडालात्पाक्षियोगत्वा भुक्त्वा च प्रतिगृ
ह्य वा। एतत्पज्ञानतो विप्रो ज्ञानात्साम्यन्तु गच्छतीति चांडालान्नभोजनप्रतिग्रहयोश्चांडालस्त्रीगमनसम
भिव्याहृतत्वेन सद्यःपातहेतुत्वं प्रतीयते। महापातकिचांडालयोश्चातुल्यत्वमतेः कथं महापातकिप्रतिग्र
हान्नभोजने षण्मासे द्वादशवार्षिकमिति। उच्यते। न तावच्चांडालस्त्रीगमनवच्चांडालान्नभोजनस्य सद्यःपात

Indira Gandhi National
Centre for the Arts

प्राय. हेतुत्वं संभवति तथा हि चंडालान्नभोजने चंडालान्नं यदा भुक्तं ब्राह्मणाद्यैः प्रमादतः। चांद्रायणं चरेद्विप्रः क्षत्रः।
६४ सांतपनं चरेत् षड्रात्रं वा त्रिरात्रं वा वर्णयोरनुपूर्वशः इति चांद्रायणाद्युपदेशात्। नाथ तत्र ज्ञातासेन पातहेतुत्वं।
संकरीभोजने चांद्रायणमात्रस्याभावत्वज्ञातासेद्वादशवार्षिकस्याप्युक्तत्वात्तेन चंडालान्नभोजनप्रतिग्रह
योश्च एकलस्त्रीगमनेन समतिव्याहारो निंदार्थवाद एव। अत्र च याजनयोनस्वाध्यायसहभोजनानां सद्यः पा
तहेतुत्वस्य वचनाद्वरोक्तत्वात्तानि तान्नभोजनप्रतिग्रहयोश्चेतरसंसर्गापेक्षया गुरुत्वात्मा एमासिका
भ्यासेनैव पतिततुल्यत्वापादकत्वमुचितमिति। महापातकिश्राद्धग्रहणे तु श्राद्धस्य देवनो देशद्रव्यत्यागा
त्मकत्वेन सकलसंपूर्णलक्षणसद्भावेन यागत्वात्। याजनेन च सद्यः पातंस्योक्तत्वात्सद्य एव पतितत्वं।
प्रतिग्रहे वायं विशेषः। यत्प्रतिग्रहो पात्रसकलद्रव्यपरित्यागेन प्रायश्चित्ताचरणं। एवमध्यापनपरिण ६४
यनयाजनेष्वप्युक्तं प्रायश्चित्तं अध्यापनार्जितद्रव्यपरित्यागेनैवेति द्रष्टव्यं। एतच्चासत्प्रतिग्रहप्राय

श्चित्तावसरे वक्ष्यामः। अत्र च ब्रह्महत्यासुरापानस्तेयगुर्वंगनागमाः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह
हेति वचनाद्ब्रह्महत्यादिमहापातकिसंसर्गिण एव महापातकित्वं न तु संसर्गिसंसर्गिणः। एतदनुसारेणैव संवत्सरेण
पततिपनि तेन सहाचरन्नित्यत्रापि प्रथमानामेव महापातक्यतिपातकिपातक्युपपातकिनां पतितशब्देन ग्रहणं प
तितत्वं च तत्संसर्गिणामेवातेन प्रायश्चित्तमप्येतत्प्रथमसंसर्गिणामेव वचनं तु संसर्गिसंसर्गिणामपि। न च संस
र्गिसंसर्गे पापमेव नास्तीति वाच्यं तत्र संसर्गनिषेधस्यैव पापसद्भावे प्रमाणत्वात्। तथा च मनुः। एनस्विभिरनि
र्णिक्तैर्नार्थं किंचित्समाचरेत्। कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचिदिति। तत्र प्रायश्चित्तकल्पनायामयं स
नुसारेणाद्यव्यवस्थेयो वा विना। तथा चापस्तम्बेन अज्ञानतोऽप्यजपकान्नं लद्वणे शूद्रस्य प्राजापत्यमतिधायसं
सर्गिणामर्द्धार्द्धहानिरुक्ता। तथा चापस्तम्बः। भुक्तं येऽप्यद्य पक्वान्नं कृच्छ्रं तेषां प्रदापयेत्। तेषामपि च यैर्भुक्तं तेषां
मर्द्धं चिवीयते। तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयत इति। तेन प्रथमसंसर्गिणो यत्प्रायश्चित्तं तेन तत्संसर्गिणामर्द्ध

Indira Gandhi National Centre for the Arts

दर्दितत्संसर्गिणा सतोर्ध्वमितिसर्वत्रोहनीयमिति। यत्तु बालो कादिति: पादपादहानिरित्युक्तं। तत्स्वकपोलमात्रकल्पितत्वान्नि
तिनादरणीयमिति। अत्र च याजनाध्यापनयौनैकत्रभोजनानां समस्तानां व्यस्तानां च द्वात्यासेपि न प्रायश्चित्तहानि:
सकृदनुष्ठानेनैव तत्रैण सर्वपापक्षयोक्तेः। तथा अनेकमहापातकिभि: सहसम्वत्सरपर्यन्तमेकशय्यासन
दिभि: संसर्गोपि तत्रैणैव प्रायश्चित्तं। एवं संवत्सराधिकशतवर्षसंसर्गोपि महापातकित्वाविशेषात्संवत्सरसंस
र्गप्रायश्चित्तमेव। अतिपातक्यादिसंसर्गेपि महापातकिसंसर्गप्रायश्चित्तेनैव प्रसङ्गेन पापक्षय:। द्वाविंप
दीनां तु विशेषेतु सकलं देयं पादोनं त्रिवर्षेमतः शावेश्यद्धं पादशेषं तु शूद्रजातिषु शस्यत इति। पादपादहानि
व्यवस्था। तथा स्त्रीवृद्धरोगपूनषोडशवर्षीयवालानामर्द्धप्रायश्चित्तं। पञ्चवर्षादूर्ध्वमेकादशवर्षपर्यन्तमप्रा
यश्चित्ताना वहतीह्रव्यथमहापातकिजातस्य महापातकित्वात्। प्रायश्चित्तविशेषानुपदेशाच्च पितुर्यत्प्रा ६५
यश्चित्तं तदेव प्रायश्चित्तं। तेन यत्र पितुर्मरणान्तिकं तत्र तस्यापि मरणान्तिकमेव यत्रापि द्वादशवार्षिकादिव्रतं तत्र तस्यापि द्वा

दशवार्षिकादिकमेव व्रतं। महापातकिजातानु कन्यापरित्यक्तसकलपितृद्रव्या परिणेतव्यैव। तथा च वसिष्ठ:। पतितो
त्पन्नः पतितो न्यत्र स्त्रिया:। सा हि परगामिनी तामरिक्थामुपेयादिति। वृद्धहारीतो प्याह। पतितस्य कुमारीं विवस्त्रां माल
ह्याद्दोरात्रमुपोषितां प्रातः शुक्लेनाहरितेन वा वाससाच्छाद्य नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां तीर्थेगृह
द्वेतु वोद्वहेदिति। किन्तु यत्र पितुर्मरणान्तिकं प्रायश्चित्तं तत्र द्वादशवार्षिकं कारयित्वा विवाह्या। यत्र पुनर्द्वादशवा
र्षिकादिव्रतं तत्र स्त्रीत्वादर्द्धप्रायश्चित्तं कारयित्वा विवाह्येति॥ इति महापातक्यादिसंसर्गिप्रायश्चित्तं। इदानीम
स्पृश्यस्पर्शसंसर्गप्रायश्चित्तमभिधीयते। तत्र याज्ञवल्क्य:। चांडालपुल्कसम्लेच्छभिल्लपारसिकादिकान्। महापात
किनश्चैव स्पृष्ट्वा स्नायात्सचैलक:॥ तथा छागलेय:। चांडालं पतितं स्पृष्ट्वा सचैलो जलमाविशेत्। शवं तत्स्पर्शिन
श्चैव चैत्यवृक्षं रजस्वलां। मासषड्विंशतिं मत्तं वोढ्वा न्यापि पतनाश्चैव लोकायतिकनास्तिकान्। विकर्मस्थान् द्विजान् स्पृष्ट्वा
सवासा जलमाविशेत्। चैत्यवृक्षश्चितिर्यूपश्चांडाल: सोमविक्रयी। एतांस्तु ब्राह्मण: स्पृष्ट्वा सचैलो जलमाविशेत्।

प्राय· दर्शनात्संसर्गिणः स्वतोर्द्धमितिसर्वत्रोहनीयमिति। यत्तु बालोकादितिः पादपादहानिरित्युक्तं तत्स्वकपोलमात्रकल्पितमि
६५ तिनादरणीयमिति। अत्र च याजनाध्यापनयौनैकत्रभोजनानां समस्तानां व्यस्तानां चाब्दाभ्यासेपि न प्रायश्चित्तवृद्धिः
सकृदनुष्ठानेनैव तत्रैण सर्वपापक्षयोक्तेः। तथा अनेकमहापातकिभिः सह सम्वत्सरपर्यन्तमेकस्मिन्नासना
दिभिः संसर्गेपि तत्रैणैव प्रायश्चित्तं। एवं संवत्सराधिकशतवर्षसंसर्गेपि महापातकित्वाविशेषात्संवत्सरसंस
र्गप्रायश्चित्तमेव। अतिपातक्यादिसंसर्गेपि महापातकिसंसर्गप्रायश्चित्तेनैव प्रसङ्गेन पापक्षयः। स्त्रिया
दीनां तु विशेषस्तु सकलं देयं पादोनं त्रियेमतत्र चैवैश्येर्द्धं पादशेषं तु शूद्रजातिषु शस्यत इति। पादपादहानि
व्यवस्था। तथा श्रीरुद्रेणग्धूनषोडशवर्षीयबालानामर्द्धप्रायश्चित्तं। पञ्चवर्षादूर्ध्वमेकादशवर्षपर्यन्तम्प्रा
यश्चित्तानालावशतिद्वत्स्यशम महापातकिजातस्य महापातकित्वात्। प्रायश्चित्तविशेषानुपदेशाच्च पितृतुल्य
मेव प्रायश्चित्तं। तेन यत्र पितुर्मरणान्तिकं तत्र तस्यापि मरणान्तिकमेव यत्रापि तु द्वादशवार्षिकादिव्रतं तत्र तस्यापि द्वा ६५

दशवार्षिकादिकमेव व्रतं तस्य। महापातकिजातात्तु कन्या परित्यक्ता सकलपितृद्रव्या परिणेतव्यैव। तथा च वसिष्ठः। पतितो
त्पन्नः पतितो ऽन्यत्र स्त्रियाः। सा हि परगामिनी। तामरिक्थामुपेयादिति। वृद्धहारीतोप्याह। पतितस्य कुमारीं विवस्त्रामाला
ग्र्याहोरात्रमुपोषितां प्रातः शुक्लेनाहतेन वाससाच्छाद्य नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां तीर्थे गृह
देशु वोद्वहेदिति। किन्तु यत्रापि तुर्मरणान्तिकं प्रायश्चित्तं तत्र द्वादशवार्षिकं कारयित्वा विवाह्या। यत्र तु न द्वादशवा
र्षिकादिव्रतं तत्र स्त्रीत्वादर्द्धप्रायश्चित्तं कारयित्वा विवाह्येति।। इति महापातक्यादिसंसर्गिप्रायश्चित्तं। इदानीम
स्पृश्यस्पर्शसंसर्गप्रायश्चित्तं निरूप्यते। तत्र याज्ञवल्क्यः। चाण्डालपुल्कसम्लेच्छभिल्लपारसिकादिकाः। महापात
किनश्चैव स्पृष्ट्वा स्नायात्सचैलकः॥ तथा छागलेयः। चाण्डालपतितं स्पृष्ट्वा सचैलो जलमाविशेत्। शवं तत्स्पर्शिनि
श्चैव चैत्ययूपं रजस्वलाम्। मासषड्विंशकमतं बौद्धान्पाशुपतांश्चैव लोकायतिकनास्तिकान्। विकर्मस्थान्द्विजान्स्पृष्ट्वा
सवासा जलमाविशेत्। चैत्यवृक्षश्चितिर्यूपश्चाण्डालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलो जलमाविशेत्

Indira Gandhi National
Centre for the Arts

तथामनुः।नारंस्पृष्ट्वास्थिसस्नेहंविप्रःस्नात्वाविशुध्यति।आचम्यैवतुनिःस्नेहंगामालभ्यार्कमीक्ष्यवा।मदिरास्पर्शेतु
विशेषः।जाबालः।स्नानमात्रंस्यादानालेरेकरात्रकम्।नालेरूर्ध्वंत्रिरात्रंस्यान्मदिरास्पर्शनेविधिः।व्रतस्थस्यतुब्राह्म
णस्यजाबालःस्पर्शनेतुप्रवासश्चपञ्चगव्यप्राशनञ्चोक्तं।मद्येनस्पृश्यतेयस्तुब्राह्मणःशंसितव्रतः।उपोष्यर
जनीमेकांपञ्चगव्येनशुध्यति।षट्त्रिंशन्मतेतु।श्वकुक्कुटवराहाश्चग्राम्याःसंस्पृश्यमानवाः।सचैलःसशिराःस्नात्वा
तदानीमेवशुध्यति।कुक्कुटतुल्यतयाकाकोपिमान्यः।तथाचकाकस्यकुक्कुटतुल्यतामाहापस्तम्बः।गवाघ्रातानि
कांस्यानिशूद्रोच्छिष्टानियानिच।शुध्यन्तिदशभिःक्षारैःश्वकाकोपहतानिवा।कुक्कुटादिस्पर्शेविशेषमाहाङ्गि
राः।ऊर्ध्वंनाभेःकरौमुक्त्वायदङ्गमुपहन्यते।तत्रस्नानमधस्मात्तुशुद्धिःप्रक्षालनेनतु।तथाचाङ्गिराः।यस्तुछा
याश्वपाकस्यब्राह्मणोह्यधितिष्ठति।सचैलोजलमाप्लुत्यघृतंप्राश्यविशुध्यति।अत्राधितिष्ठतिधात्वर्थपर्या ६६
लोचनमाराच्चण्डालछायायाश्चचिरावस्थानेसतिस्नानंस्पर्शनमात्रेतुनदोषइति।तथाचापस्तम्बः।सर्वेषाम

न्त्यजातीनांस्पर्शेनाचमनंविदुः।येषाञ्चब्राह्मणोनास्तितेषांस्नानंविधीयते।यस्यस्पर्शेस्नानंतस्योपस्पर्शेपिस्नानमेव।
तथाचापस्तम्बः।एकशाखांसमारूढश्चाण्डालश्चरजस्वला।ब्राह्मणश्चसमस्तत्रसवासाःस्नानमाचरेदिति।यदिरात्राव
स्पृश्यस्पर्शनंभवतितदारात्रावेवस्नातव्यंरात्रिलङ्घनंतुनकर्तव्यम्।तथाचयमः।चाण्डालैःश्वपचैःस्पृष्टोनिशि
स्नानंविधीयते।नवसेत्सदनेरात्रौसद्यःस्नानेनशुध्यति।अथ तत्रैववसेद्रात्रावज्ञानादविचक्षणः।तदातस्य
तुतत्पापंशतधापरिवर्तते।स्नानाशक्तौविशेषमाहापस्तम्बः।आतुरेस्नानमापन्नेदशकृत्वस्त्वनातुरः।स्नात्वास्ना
त्वास्पृशेत्तंचततःशुध्येत्सआतुरः।अदोषविषयेषट्त्रिंशन्मते।देवयात्राविवाहेषुयज्ञेषुप्रततेषुच।उत्सवे
षुचसर्वेषुस्पृष्टास्पृष्टिर्नदुष्यति।तथाचबृहस्पतिः।तीर्थेविवाहेयात्रायांसंग्रामेदेशविप्लवे।नगरग्रामदा
हेचस्पृष्टास्पृष्टिर्नदुष्यति।उच्छिष्टस्यचाण्डालादिस्पर्शेविशेषमाहकात्यायनः।चाण्डालैःपतितैःस्पृष्टोवि
ण्मूत्रेकृतेद्विजः।त्रिरात्रंतुप्रकुर्वीतभुक्तोच्छिष्टःषडाचरेत्।इदंकामतःस्पर्शविषयं।अत्रषडुपवासेरे

Indira Gandhi National
Centre for the Arts

प्राय॰ ६७

उच्छिष्टेन संस्प
कावेत्तुः। तेन यदेतत्सर्वसाधारणं हारीतेनोक्तं। तदपि कामतोभुक्तोच्छिष्टविषयमेवा। तथा च हारीतः। अनुच्छिष्टेन संस्प
र्शे स्नानं येन विधीयते। उच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत्॥ यत्त्वङ्गिरसोक्तं भुक्तोच्छिष्टस्त्वनाचान्तश्चांडालैः श्व
पचेन वा। प्रमादात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनं। गायत्र्यष्टसहस्रं च द्रुपदां वा शतं जपेत्। त्रिरात्रोपोषितो भूत्वा
पंचगव्येन शुध्यति। इदमकामतो भुक्तोच्छिष्टविषयं। यत्त्वापस्तम्बेनोक्तं। चांडालेन तु संस्पृष्टो विशेषतः द्विजोत्तमः।
अनुपोष्य रजनीमेकां पंचगव्येन शुध्यति। इदमकामतोऽभुक्तोच्छिष्टविषयं। सर्वं चेदं रजस्वलास्पर्शे कुक्कुरादीनामप्यन
ुच्छिष्टस्पर्शे समानं द्रष्टव्यं। नातेरश्वः कुक्कुरादिस्पर्शे उच्छिष्टस्य च स्नानमात्रमेवा। चंडालात्रस्पर्शे तु विशेषमाह हारीतः॥
उच्छिष्टः संस्पृष्टो द्विजः। सावित्र्यष्टसहस्रं तु जपेद्वा सप्तपंचाशतमेव वा। स्नात्वा पश्चाच्चरेत्। अन्नसात्त्वपनेन तु रे ६७
उच्छिष्टस्पर्शाद्विप्रश्चांडालान्नक्तं च पंच च ना। उच्छिष्टेन संस्पृष्टो द्विजः। स्नात्वा पंचगव्येन शुध्यति। चांडालोदकस्पर्शे त
का। अथोच्छिष्टो यदा संस्पृशेत्। प्रायश्चित्तं सवेदिदम्। त्रिरात्रमुपवासः स्यात्पंचगव्येन शुध्यति। यदि त्वस्नातश्चंडाला
ङ्गिराः। चंडालोदकसंस्पर्शे स्नानमेव समाचरेत्। उच्छिष्टेन संस्पृष्टस्त्रिरात्रेणैव शुध्यति। यदि त्वस्नातश्चंडाला

दिकं स्पृष्ट्वा भोजनादिकं करोति तदा हापस्तम्बः। संसर्गं तु यदा गच्छेदुदकं वा स्पृशेत् सहापतितैर्वा यदा स्पृष्टः प्रायश्चित्तं विध
थ भवेत्। भोजने तु त्रिरात्रं स्यात्पाने तु त्र्यहमेव तु। मैथुने पादकृच्छ्रं स्यात्तथा मूत्रपुरीषयोः। दिनमेकं तथा मूत्रे पुरीषे त्र
िदिनं द्वयं। एकाहस्तत्र निर्दिष्टो दंतधावनकर्मणि। एतदज्ञानतो ज्ञानतो द्विगुणमिति। ज्ञानाज्ञानयोः स्वस्त्यन्तात्मासे
िदिनं द्वयम्। एकाहस्तत्र निर्दिष्टो दंतधावनकर्मणि। एतदज्ञानतो ज्ञानतो द्विगुणमिति। द्विजश्चांडाय एकं कुर्यात्प्राजापत्यमकामतः।
भोजने विशेषमाहापस्तम्बः। चंडालश्चैव संस्पृश्य पश्चाच्छ्रीयान्तु कामतः। द्विजश्चांडायणं कुर्यात्प्राजापत्यमकामतः।
यदि तु तैलघृताभ्यक्तश्चांडालादिकं स्पृशति तदा हापस्तम्बः। येन केनापि दत्तमक्षश्चांडालं पतितं स्पृशेत्। उपवासेन
वैकेन पंचगव्येन शुध्यति। चर्मकारादिस्पर्शे त्वापस्तम्बः। चर्मकारं रजकं धीवरं नटमेव वा। एतान्स्पृष्ट्वा द्विजो मोहा
दाचामेत्प्रयतोऽपि सन्। एतैः स्पृष्टस्तूच्छिष्ट एकरात्रं पयः पिबेत्। नेरुच्छिष्टैस्त्रिरात्रं स्यात् घृतं प्राश्य विशुध्यति। सर्वत्र चाचो
च्छिष्टस्यानुच्छिष्टस्पर्शे यदुक्तं तदुभयोच्छिष्टस्पर्शे द्विगुणं द्रष्टव्यं। सवर्णानां उच्छिष्टोच्छिष्टसंस्पर्शे आचमनमात्रं। तथा च
बृहस्पतिः। उच्छिष्टोच्छिष्टसंस्पर्शः कदाचिदपि जायते। वर्णानां तु सजातीनामुपस्पृश्य तत्र शुचिः। इदं चाकामविषयम्।

प्रा०

यतइतिवचनादकामतःस्पर्शविषयः।कामतस्तुस्पर्शेब्राह्मणस्यस्नानोपदेशात्तुल्यन्यायतयासर्वेषामेवस्नानमेवद्रष्टव्यं
तथाचापस्तम्बः।विप्रोविप्रेणसंस्पृष्टउच्छिष्टेनकदाचन।स्नानात्तेनविशुद्धिःस्यादापस्तम्बोब्रवीन्मुनिः।उच्छिष्टःक्षत्रियवै
श्यस्पर्शेब्राह्मणस्योच्छिष्टस्यविशेषमाहापस्तम्बः।क्षत्रियेणयदास्पृष्टउच्छिष्टःकथंचन।स्नानंजपश्चत्रैकाल्यंदिन
स्यान्तेविशुध्यति।वैश्येनतुयदास्पृष्टउच्छिष्टःकथंचन।स्नानंजपश्चत्रैकाल्यंदिनस्यांतेघृतमपिबेत्।एतेनार्थाद
उच्छिष्टस्यब्राह्मणस्योच्छिष्टशूद्रस्पर्शेउपवासःपञ्चगव्यमित्यूहनीयमिति।तथोच्छिष्टब्राह्मणस्यानुच्छिष्टब्राह्मणस्प
र्शेनदोषः।क्षत्रियस्पर्शेत्वाचमनं।वैश्यस्पर्शेऽश्रुद्राणांशूद्रस्पर्शेस्नानमित्यूहनीयमिति।तथाचापस्तम्बः।तैलाक्त
स्तथावान्तःश्मश्रुकर्मणिमैथुने।इत्रोवारंयदाकुर्यादहोरात्रेणशुध्यति।तथाचहारीतः।श्वविष्ठाकाकविष्ठावा
कङ्कगृध्रनरस्यवा।अश्वोच्छिष्टस्यसंस्पर्शेसचेलोजलमाविशेत्।ऊर्ध्वोच्छिष्टस्यसंस्पर्शेप्रायश्चित्तंविनिर्दिशे ६८
त्।उपोष्यरजनीमेकांपञ्चगव्येनशुध्यति।आपस्तम्बोयथाह।भुक्त्वोच्छिष्टस्तुनाचान्तोत्यमेध्यंसंस्पृशेद्यदिश्व

होरात्रोषितोभूत्वापञ्चगव्येनशुध्यति॥इदानींरजस्वलायाश्चांडालादिस्पर्शप्रायश्चित्तंनिरूप्यते।तत्रदिनभेदेनविशे
षमाहबृहस्पतिः।पतितान्त्यश्वपाकेनसंस्पृष्टाचेद्रजस्वला।प्रथमेह्नित्रिरात्रंस्याद्द्वितीयेद्व्यहमेवच।अहोरात्रंतृती
येह्निचतुर्थेनक्तमेवच।अत्रसर्वोपवासेपञ्चगव्यप्राशनमपिकर्तव्यं।कुक्कुरादिस्पर्शेविशेषमाहयमः।रजस्वलातु
संस्पृष्टाशुनाजम्बुकवायसैः।निराहाराभवेत्तावद्यावत्कालेनशुध्यति।यदितुरजस्वलाउपवासासमर्थातत्रति
दाःफालकृष्टैर्नीवारादिभिर्वर्तित्वापञ्चगव्यमपिबेत्।तथाचाङ्गिराः।चंडालःश्वपचोवापियद्यात्रेयींस्त्रियंस्पृशेत्॥
अफालकृष्टैर्वर्तेतपञ्चगव्येनशुध्यति।एतेनरजस्वलायाःनस्त्वचर्मकारधीवररजकादिस्पर्शेतूपवासःपञ्चगव्यपानमि
त्यूहनीयम्।अन्योन्यरजस्वलास्पर्शेतुप्रायश्चित्तमाहकाश्यपः।रजस्वलातुसंस्पृष्टाब्राह्मण्याब्राह्मणीचया।एकरात्रंनि
राहारापञ्चगव्येनशुध्यति।रजस्वलातुसंस्पृष्टाराजन्याब्राह्मणीचया।त्रिरात्रेणविशुद्धिःस्याद्व्यासस्यवचनंयथा।रज
स्वलातुसंस्पृष्टावैश्ययाब्राह्मणीचया।पञ्चरात्रंनिराहारापञ्चगव्येनशुध्यति।रजस्वलातुसंस्पृष्टाशूद्रयाब्राह्मणीचया।

Indira Gandhi National Centre for the Arts

प्राय·

षड्रात्रेण विशुद्धिः स्याद्ब्राह्मण्याः कामचारतः। अज्ञानतश्चरेदर्द्धं ब्राह्मणी सर्वजातिषु। अत्र ब्राह्मण्या ब्राह्मणीस्पर्शे
उपवासः पञ्चगव्यपानं। तथा क्षत्रियवैश्याशूद्राणां रजस्वलानां सवर्णरजस्वलास्पर्शे उपवासः। पञ्चगव्यं चेति। यथा
ब्राह्मण्याः क्षत्रियास्पर्शे त्रिरात्रं तथा क्षत्रियायां वैश्यास्पर्शे वैश्यायाश्च शूद्रास्पर्शे त्रिरात्रमेव। तदुक्तं। रजस्वला तु य
नारी अन्योन्यमुपसंस्पृशेत्। सवर्णे पञ्चगव्येन त्रिरात्रमसवर्णके। पञ्चगव्येन उपवाससहितेनेत्यर्थः। तत्र मध
ण्यायाः स्पर्शे हीनवर्णायाः स्नानमात्रं। तथा वृहद्विष्णुः। अधिकवर्णा रजस्वलां स्पृष्ट्वा स्नात्वा श्रीया दिति। अर्थ
क्षत्रियाया रजस्वलायाः शूद्रास्पर्शे पञ्चरात्रमित्यूहनीयं। सर्वत्र चात्रोपवासासामर्थ्ये फलकृष्णनीवारादियो
जनीयमिति। यत्तु मार्कण्डेयेनोक्तं। उदक्यां तु सवर्णां स्त्री स्पृष्ट्वा चेत्स्यादुदक्यया। तस्मिन्नेवाहनि स्नात्वा शुद्धिमा ६९
प्नुयादसंशयम्। एतत्स्नानात्पूर्वं शुद्धिदिवसीयस्पर्शे सति द्रष्टव्यम्। यदा तूच्छिष्टा रजस्वलोच्छिष्टया रजस्वलया स्पृ
श्यते तदाहाङ्गिराः। उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला। पूर्वा कृच्छ्रं प्रकुर्वीत शूद्रा दानोपवासतः। ब्र

पूर्वशब्देन ब्राह्मणाद्या क्षत्रियवैश्यस्त्रियोऽभिधीयन्ते। तेन यदि ब्राह्मणी रजस्वलोच्छिष्टा ब्राह्मण्या तादृश्यैव स्पृश्यते तदा प्रा
जापत्यमेव। एवं यदि क्षत्रिया क्षत्रियया वैश्या वैश्यया स्पृश्येत तदा प्राजापत्यमेव। शूद्रा तु शूद्रया स्पृष्टा कृतोपवासा
ब्राह्मणाय किञ्चिद्दत्त्वा शुध्यति। तेन ब्राह्मण्याः क्षत्रियास्पर्शे प्राजापत्यद्वयं वैश्यास्पर्शे प्राजापत्यत्रयं शूद्रास्पर्शे प्रा
जापत्यचतुष्टयं। एवं क्षत्रियाया वैश्यास्पर्शे प्राजापत्यद्वयं शूद्रास्पर्शे प्राजापत्यत्रयं। वैश्यायाश्च शूद्रास्पर्शे प्राजा
पत्यद्वयमिति। सर्वञ्चैतत्कामतः स्पर्शे द्रष्टव्यं। अकामतस्तदर्द्धं। यदि तूच्छिष्टा रजस्वला रजकादिना स्पृश्यते तदा
त्रिरात्रं। यदि तु नारजकादिभिरुच्छिष्टैः स्पृश्यते तदा प्राजापत्यं। तथा श्वशृगालकुक्कुटादिभिरपि यद्यु
च्छिष्टा रजस्वला स्पृश्यते तदा प्राजापत्यमित्यूहनीयमिति॥ इदानीं निषिद्धविवाहप्रायश्चित्तं निरूप्यते। तत्र
मनुः। दाराग्निहोत्रसंयोगं यः करोत्यग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। परिवित्तिः परिवेत्ता
च यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः॥ तथा वृद्धहारीतः। ज्येष्ठे विद्यमाने दाराग्निहोत्रसंयो

Indira Gandhi National
Centre for the Arts

मनुजःशर्वङ्करोतिसपरिवेत्तापतिर्विविन्निस्कज्येष्ठः।परिवेदनीयाकन्यापरिदायीदातापरिकर्त्तायाजकःसर्वेतेपति
ताश्चसंवत्सरम्प्राजापत्येनकृच्छ्रेणापावयेयुरिति।इदंकामतोकामतस्तुदर्द्धं।अदोषविषयमाहबृहच्छातातपः।ख
ञ्जवामनकुब्जेषुगद्गदेषुजडेषुच।जात्यंधवधिरेमूकेनदोषःपरिवेदने।क्लीवेदेशान्तरस्थेपतितेप्रव्रजितेतथा।
योगशास्त्राभियुक्तेचनदोषःपरिवेदने।पितृव्यपुत्राःसापत्नाःअन्यनारीसुताश्चये।दाराग्निहोत्रसंयोगेनदो
षःपरिवेदने।सुमन्तुः।मातुलसुतापितृसगोत्रासमानार्षेयीणांविवाहयित्वाचान्द्रायणंचरेत्।परित्यज्यैनाम्बिभृ
यात्।शातातपः।विवाहयेत्सगोत्रांयस्तुतनयांमातुलस्यच।आपिविशिष्टापितुर्ल्यायोद्विजश्चान्द्रायण
ञ्चरेदिति॥अथानिंदितप्रतिग्रहप्रायश्चित्तंनिरूप्यते।तत्रचांडालप्रतिग्रहेपातित्यचांडालयोन्युत्पत्वात्।चांडा
लस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यचपतत्यज्ञानतोविप्रोज्ञानात्साम्यन्तुगच्छतीत्यत्रचांडालप्रतिग्रहस्यचांडा ७०
लस्त्रीगमनसमभिव्याहारस्यानिष्टार्थत्वेनोक्तत्वाच्चदेवमहापातकिप्रतिग्रहेप्रायश्चित्तमुक्तञ्चदेवात्रद्रष्टव्यम्।

रजकाद्यन्त्यप्रतिग्रहेतुस्वल्पयमोक्तमेवप्रायश्चित्तं।तथाचस्वल्पयमः।रजकश्चर्मकारश्चनटोवरुडएवच।कैव
र्तमेदभिल्लाश्चसप्तैतेअन्त्यजाःस्मृताः।भुक्त्वाचैषांस्त्रियोगत्वापीत्वाचप्रतिगृह्यच।ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञाना
दैन्दवद्वयम्।एतच्चवचनमन्त्यजात्यासनविषयमित्यगम्यागमनपरिच्छेदेप्रतिपादितं।तेनज्ञानतोन्त्यजात्यासेनर
जकाद्यन्त्यजप्रतिग्रहेवार्षिकम्प्रायश्चित्तं।अर्थादभ्यासेनप्रतिग्रहेस्यार्द्धं।सकृत्प्रतिग्रहेततोप्यर्द्धं।अज्ञानतस्त्वत्य
न्ताभ्यासेचान्द्रायणद्वयं।अभ्यासेनप्रतिग्रहेतस्यार्द्धं।सकृत्प्रतिग्रहेतस्याप्यर्द्धमित्यूहनीयम्।राजप्रतिग्रहेतुबृ
हद्धारीतः।राजप्रतिग्रहंकृत्वामासमप्सुसदावसेत्।षष्ठकालंपयोभक्षःपूर्णेमासेप्रमुच्यते।अत्रमासेकज
लनिवाससहितषष्ठकालपयोभोजनेनपंचधेनवोद्रष्टव्याः।अत्रचराजशब्देननक्षत्रियोभिप्रेतःकिन्तुक्षत्रिय
व्यतिरिक्तएवराज्यकारी।तत्प्रतिग्रहस्यैव।नराज्ञःप्रतिगृह्णीयादराजन्यप्रसूतितइतिमनुवचनेननिषिद्धत्वात्॥
दशसूनासमश्चक्रीदशचक्रिसमोध्वजः।दशध्वजसमावेश्यादशवेश्यासमोनृपः।दशसूनासहस्राणियोवाहय

Indira Gandhi National
Centre for the Arts

प्राय· तिमोनिकाः। तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः। इत्यादीन्यपि प्रतिग्रहनिन्दकानि वचनानि क्षत्रियव्यतिरि
७१ क्तदुष्टविषयाण्येव द्रष्टव्यानि। अश्वमणिमातङ्गतिलतैलाद्यसत्प्रतिग्रहे तु मनुः। जपित्वा त्रीणि सावित्र्याः सह
स्राणि च शक्तितः। मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहादिति। सर्वस्वेदृशप्रतिग्रहलब्धद्रव्यपरित्यागे स
ति द्रष्टव्यं। तथा च मनुः। यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च। तथा
सुमन्तुः। याजकः सर्वद्रव्यपरित्यागात् पूतो भवति प्राजापत्येन चेति। तथा यमः। अप्युसादायितव्यं तद्विन्नं यत्न
स्यगर्हितं। प्रतिग्रहो वा दातव्यः शिष्टानां ब्रह्मचारिणां। वेदविद्ब्राह्मणप्रतिग्रहदाता असमर्थोऽसत्प्रतिग्रहे
पात्रस्खलने निःक्षिप्य प्रायश्चित्तं कुर्यादित्यर्थः। अथ ब्राह्मणस्याविक्रेयविक्रयप्रतिग्रहप्रायश्चित्तं। तत्र पैठीनसिः
अविक्रेयाणि ब्राह्मणस्य पक्वमन्नं लवणं दधिक्षीरमधुघृतं लाक्षारक्तं वासो गुडस्तैलं सर्वं चारण्याः पशवो ७१
विद्या हूर्णेष्टशस्त्राण्यश्मानि। तेषामेकतरेणापि प्राजापत्यमिति। तथा च बृहद्विष्णुः। आर्द्रौषधिपुष्पमूलफलचर्म

वेत्रविदलतुषकपालकेशभस्मास्थिपिण्याकतिलतैलविक्रयी प्राजापत्यं चरेत्। तथा च हारीतः। और्णकेशकेसरिहरि
नीलीविक्रयं कृत्वा तप्तकृच्छ्रमाणिमुक्ताप्रवालनालदन्तशुक्तिवेणुवैणवमृन्मयविक्रये वा अत्र तप्तकृच्छ्रे तु द्वयं। न
यथा शङ्खलिखितौ। मासं जातु महिष्ठिष्ट त्रपुसीसकरूप्यलोहखड्गोदुम्बरपात्रविक्रये महासान्तपनं। अत्रापि चेतु
द्वयं। देवगृहोद्यानसत्प्रपातडागपुण्यसेतुभूमिविक्रयं कृत्वा तप्तकृच्छ्रं चरेत्। अत्रापि चेत् द्वयं। मांसादीनामन्यत्रा
त्मार्थविक्रये चान्द्रायणं पुनरुपनयनं चेति। तथा च बृहद्विष्णुः। मांसलवणलाक्षाक्षीरविक्रयी चान्द्रायणं कुर्यात्पुन
श्चोपनयेदिति। एतच्चाविक्रेयविक्रयप्रायश्चित्तं यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्य
न्ति जप्येन तपसैव चेति वचनादविक्रेयविक्रयेण लब्धद्रव्यपरित्यागे सति द्रष्टव्यं। तेन मूल्यपरित्यागे विशेषातिश
यात्कथं क्षीरगजादीनां विक्रयणे प्रायश्चित्तसाम्यमिति न दर्शनीयमिति॥ ॥अथ द्रव्यशुद्धिः। तत्र देवलः। यत्र
प्रसूयते नारी म्रियते दह्यतेऽथवा। चाण्डालाद्युषितं यच्च यत्र शूद्रादिसङ्गतिः। एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्ति

Indira Gandhi National
Centre for the Arts

धा· तास्वश्च शूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्टतां व्रजेत्॥ तत्र विशुद्धिमाह देवलः॥ खननाद्दहनाच्चैव उपलेपनशोधनात्॥ पर्जन्यव
७२ र्षणाच्चैव भूमेर्मेध्या विशुध्यति॥ तथा च बृहद्यमः॥ खननात्क्षरणाद्दाहादतिघर्षणलेपनात्॥ गोभिराक्रमणात्काला
द्भूमिः शुध्यति सप्तभिः॥ इति भूमिशुद्धिः॥ तथा च बृहस्पतिः॥ श्वशूद्रपतितास्त्वन्त्या मृताश्चेद्द्विजवेश्मनि॥ शौचं तत्र
प्रवक्ष्यामि मनुना भाषितं यथा॥ दशरात्राच्छुनि प्रेते मासाच्छूद्रे भवेच्छुचिः॥ द्वाभ्यां तु पतिते गेहमन्त्ये मासचतुष्टयात्॥
अत्यन्ते वर्जयेद्गेहमित्येवं मनुरब्रवीत्॥ तथा च यमः॥ द्विजस्य मरणे वेश्म विशुध्येत दिनत्रयात्॥ दिनैकेन बहि
र्भूमिरग्निप्रोक्षणलेपनैः॥ यथोक्तकालानन्तरमपि मन्त्रप्रोक्षणादिना शुद्धिः॥ तथा च संवर्तः॥ गृहशुद्धिं प्रवक्ष्या
मि अन्त्यस्य च शवदूषणे॥ प्रोत्सृज्य मृण्मयं भाण्डं सिद्धमन्नं तथैव च॥ गृहादपास्य तत्सर्वं गोमयेनोपलेपयेत्॥ ब्राह्म
णैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा॥ सर्वमभ्युक्षितं वेश्म ततः शुध्येदसंशयम्॥ इति गृहशुद्धिः॥ यमः॥ अजा गावो
महिष्यश्च ब्राह्मणी च प्रसूतिका॥ दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकम्॥ तथा च व्यासः॥ भूमिष्ठमुदकं मेध्य ७२

वैतृष्ण्यं यत्र गोर्भवेत्॥ अव्याप्ताश्चेदमेध्येन तद्वदेव शिलागताः॥ तथा च मनुः॥ आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवे
त्॥ अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः॥ तथा च शङ्खः॥ भूमिष्ठमुदकं शुद्धं शुचि तोयं शिलागतम्॥ वर्णगन्धरसैर्दुष्टैर्वर्जि
तं यदि तद्भवेत्॥ तथा देवलः॥ अन्त्यानामपां नास्ति प्रसृतानां च दूषणम्॥ द्रोणकानां तु हृतानां च दोषैर्दुष्टत्वमिष्यते॥ क्र
ताश्चापि शुध्यन्ति शुद्धैः पात्रैः समुद्धृताः॥ एकरात्रोषिता आपस्त्याज्या मेध्या अपि स्वयम्॥ उदकशुद्धिः॥ तथा मनुः॥ निर्लेपं काञ्च
नं भाण्डमद्भिरेव विशुध्यति॥ अब्जमश्ममयं चैव राजतं चानुपस्कृतम्॥ तथा बृहद्यमः॥ मणिमुक्ताप्रवालानां शङ्ख
नां शुक्तिजस्य च॥ अब्जानां चैव सर्वेषामद्भिः शौचं विशोधनम्॥ तथा बृहस्पतिः॥ अम्भसा हेमरूप्यायःकांस्यं शुध्यत्यग्निभ
स्मना॥ अम्लाम्भसा ताम्ररैत्यं पुनर्दाहेन मृण्मयम्॥ तथा चाङ्गिराः॥ गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि वा॥ शुध्य
न्ति दशभिः क्षारैः श्वकाकोपहतानि च॥ तथा प्रचेताः॥ भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति॥ सुराविण्मूत्रसंस्पृष्टं
शुध्यते तापलेखनैः॥ तथा बौधायनः॥ तैजसानां मूत्रपुरीषशुक्रशोणितकुणपमद्यैः स्वल्पकालसंसर्गे परिलेखनं

Indira Gandhi National
Centre for the Arts

७३ गोमूत्रेवासप्तरात्रम्परिस्थापनम्। मद्यादिचिरसंसर्गे बृहद्विष्णुः। अत्यन्तोपहतंलोहभांडमग्नौप्रक्षिप्तंशुध्येत्।
माणिमयमश्ममयञ्चसर्वमब्जं सप्तरात्रंमहीनिखननेन। अत्रवस्तुवर्म्मादीन्यपिलोहशब्देनविधेयानितत्रचैववा। अति
चिरकालमद्यादिसंसर्गेतुबौधायनः। तैजसानांमूत्रपुरीषशुक्रासृक्कुणपमद्यैरत्यन्तवासितानामग्निनावर्त्त
नमतैजसानामुत्सर्गः। सिद्धार्थकानांकल्केनशृङ्गदन्तमयस्यच। गोवालैःफलपात्राणामस्थ्नांस्याच्छृङ्गवत्त
था। तथाबृहद्व्यासः। मृदाम्भिःशुध्यतेदारुतत्क्षणेनातिदूषितम्। मार्त्तिकञ्चपुनःपाकात्पाज्यमूत्रादिदूषितम्॥
सुवर्म्मादिपात्रशुद्धिः॥ तथा मनुः। अद्भिस्तुप्रोक्षणंशौचंबहूनांधान्यवाससाम्। प्रक्षालनेनत्वल्पानामद्भिःशौ
चंविधीयते। चैलवच्चर्म्मणांशुद्धिर्वैदलानांतथैवच। शाकमूलफलानाञ्चधान्यवच्छुद्धिरिष्यते। वल्कलोवंशवल्क
लविकारः। वल्कलञ्चवस्त्रस्यवर्णितेदेनदृष्टव्यम्। तथाचलौगाक्षिः। दासामूर्द्धसरज्जानिवस्त्राणिप्रोक्षणेनतु ७३
दशारत्न्याविविक्तानिसितान्यारत्न्यविंशतेः। तथाङ्गिराः। संहतानिचवस्त्राणिपरकुद्यविकानिवा। कामाद्य

डालसंसर्गेप्रोक्षणाच्छुचितामियुः। पट्टकुटीवस्त्रगृहस्था। आविकक्षाम्बलाः। तथादेवलः। तूलिकाद्युपधानञ्चपुष्परक्ता
म्बराणिच। शोषयित्वातपेकिञ्चित्करैःसम्मार्जयेन्मुहुः। पश्चात्तुवारिणाप्रोक्ष्यविनियुञ्जीतकर्म्मसु। और्णा
कौशेयकुतपपट्टक्षौमदुकूलजाः। अल्पशौचाभवन्त्येतेशोषणप्रोक्षणादिभिः। तान्येवामेध्ययुक्तानिक्षालये
च्छोधनैःस्वकैः। तथाचबौधायनः। मूत्रपुरीषलोहितरेतसोपहतानांवाससांमृदाद्भिःप्रक्षालनंवासोवद्वल्क
लानांवल्कलवत्कृष्णाजिनानामिति। वस्त्रादिशुद्धिः। तथाबृहद्विष्णुः। बहूनांधान्याजिनरज्जुतान्तववैदलसूत्र
कार्प्पासवाससांप्रोक्षणेनशाकमूलफलपुष्पाणाञ्चतृणकाष्ठपलाशानाञ्च। एतेषामेवप्रक्षालनेनधान्यादी
नामल्पानामसिद्धस्यान्नस्ययावन्मात्रमुपहतन्तावन्मात्रम्परित्यज्यशेषस्यकण्डनप्रक्षालनेकुर्य्यात्। बृहदाहे
समुत्पन्नेविनष्टेपञ्चमांशुषे। अस्तोऽप्यङ्कुतोब्रीहिर्दृढद्रव्यस्यसङ्ग्रहरति। धान्यादिशुद्धिः। तथावासिष्ठः।
देवद्रोण्यांविवाहेचयज्ञेषुप्रततेषुवाकाकैःश्वभिश्चसंस्पृष्टमन्नंतन्नविवर्जयेत्। तन्मात्रमन्नमुद्धृत्यशेषंसं

Indira Gandhi National
Centre for the Arts

प्राय· संस्कारमर्हति। संस्कारश्च जलस्नानं घृतप्रक्षेपणं तथा। बृहद्विष्णुः। द्रोणाधिकमन्नमुपहतं न दुष्यति। तस्योपहतमात्रमपा-
७४ स्य गायत्र्याभिमन्त्रितं सुवर्णाम्भसाभिषिञ्चेत्। सूर्यस्य दर्शयेदग्नेश्च। तथा मनुः। पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतं। दूषितं के-
शकीटैश्च मृत्प्रक्षेपेण शुध्यति। तथा याज्ञवल्क्यः। गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते। सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं वि-
शुद्धये। तथा वसिष्ठः। प्रचरन्नपाने भुञ्जानोच्छिष्टं यदि संस्पृशेत्। भूमौ निधाय चाचान्तः प्रयतो विचरेत्पुनः। तथा बृहद्बृहस्प-
तिः। अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि। कृत्वा मूत्रं पुरीषं वा द्रव्यहस्तो न दुष्यति। शौचं तु कुर्यात्प्रथमं पादौ प्रक्षाल-
येत्ततः। उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचि नामयात्। गोकुले कंदुशालायां तैलयन्त्रेक्षुयन्त्रयोः। न मीमांस्यानि शौचानि
स्त्रीलिशवरिता निवासिद्वान्नशुद्धिः। तथा षट्त्रिंशन्मतेः। आममांसं घृतं तैलं मधुस्नेहाः फलोद्भवाः। अन्त्यभाण्डस्थिता ह्येते
निष्क्रान्ताः शुचयो मताः। तथापस्तम्बः। आममांसं तथा क्षौद्रं यच्च गोष्ठस्थितं पयः। अन्त्यजादपि संग्राह्यं सोमोच्छिष्टं
न दुष्यति। तथा वृद्धमनुमतश्च। दधि सर्पिः पयः क्षौद्रं भाण्डदोषो न विद्यते। मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः। ७४

तथा लौगाक्षिः। पयोदधिविकारादि शुचिपात्रान्तरस्थितं। प्लावनोत्प्लावनाभ्यां च पर्यग्निकरणेन च। तथा वसिष्ठः। द्रवाणां प्ला-
वनेनैव घनानां प्रोक्षणेन तु। छागेन तु मुखं स्पृष्टं मार्जारे वहि। तज्जनेत्। तथा वसिष्ठः। बालेन वप रिष्क्रान्तं स्त्रीलिशवरि-
श्वपतां प्रसारितश्च यत्पण्यं न दोषः स्त्रीमुखे भुवा। शय्या भार्या शिशुर्वस्त्रमुपवीतं कमण्डलुः। आत्मनः कथिता शुद्धा नाप-
रस्य कदाचन। अमेध्यस्थायेद्वाप्यत्र पुष्पफलोपगाः। तेषां नैव प्रदुष्यन्ति पत्रपुष्पफलानि च॥ ॥इति बालवत्-
तीभुजङ्गपरान्नातहस्तनवदेवस्पृष्टत्ताशायस्थित्वप्रकरणे संसर्गप्रायश्चित्तपरिच्छेदः॥ ॥अथ कृच्छ्राण्यभिधीयन्ते। तत्र
शङ्खः। गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयं। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि। तेजोऽसीति घृतं चैव देव
स्यत्वा कुशोदकं। गोमूत्रतामग्रस्यार्द्धं शकृतः। क्षीरस्य च त्रयः प्रस्थाः दध्यश्च द्वौ घृतस्यैकमेकश्च कुशवारिणः। ब्रह्मकू-
र्चमिदं नाम व्रतं सर्वाघसूदनं। एतच्च कुशोदकसहितं पञ्चगव्यपानमुपवाससहितं कर्तव्यं। तथा च यमः। आ-
हृत्य प्रणवेनैव उत्थाप्य प्रणवेन च। प्रणवेन समालोड्य प्रणवेनैव तत्पिबेत्। तथा याज्ञवल्क्यः। कुशोदकं च गो-

Indira Gandhi National
Centre for the Arts

प्रा॰ क्षीरं दधि सर्पिः कुशोदकं॥ जग्ध्वा परेद्युरुपवासः कृच्छ्रं सान्तपनं स्मृतं। एतद्द्व्यहसाध्यं सान्तपनं। पृथक्सान्तपनद्रव्यैः षड
७५ हस्सोपवासकः। सप्ताहेन तु कृच्छ्रोयं महासान्तपनः स्मृतः। अत्र षड्भिर्दिनैः प्रत्येकं कुशोदकादिपानात्सप्तमोपवासस्स्क
लनमत्रे चोपवासस्येने मिलित्वा षडुपवासाः॥ अत्रैका धेनुः॥ तथा शङ्खः। एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतं। एतदेवे
तिसान्तपनद्रव्यस्यैव परामर्शः। एतच्चोपवासेन चतुरहसाध्यं यतिसान्तपनं। तथा यमः। एतान्येव तु पेयानि एकैक
न्त्र्यहं त्र्यहं। अतिसान्तपनं नाम श्वपाकमपि शोधयेत्। एतद्द्वादशाहसाध्यं। अत्र धेनुद्वयं। त्र्यहं पिबेत्तु गो
श्त्र्यहं तु गोमयं पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः। महासान्तपनं चैतत्सर्वपापप्रणाशनं। ए
तच्च पञ्चदशाहसाध्यं महासान्तपनान्तरं। अत्र धेनुद्वयं। लघुगुरुपापभेदेन सान्तपनानां व्यवस्था। पर्णोदुम्ब
रराजीवबिल्वपत्रकुशोदकैः। प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः। पर्णं पलाशं राजीवं पद्मं। एतच्च पञ्चाह
साध्यं। एतेषां प्रत्येकं क्वाथोदकमश्नाति दिनैः क्रमेणापेयं। अत्रैका धेनुः। एतान्येव समस्तानि त्रिरात्रोपोषि ७५

नः शुचिः। क्वाथयित्वा पिबेदद्भिः पर्णकृच्छ्रो विधीयते। एतच्चतुरहसाध्यं पर्णकृच्छ्रान्तरं। अत्राप्येका धेनुः। तथा वसिष्ठः। प
र्णोदुम्बरबिल्वपलाशाश्वत्थकुशानामुदकं पीत्वा षड्रात्रेणैव शुध्यति। एतच्च षडहसाध्यं पर्णकृच्छ्रान्तरं। अत्राप्येका
धेनुः। तथा विष्णुः। कुशपलाशोदुम्बरबिल्वशङ्खपुष्पीवटब्राह्मीसुवर्चलापत्राणां प्रत्येकं क्वथितस्याम्भसः प्रत्यह
म्पानेन पर्णकृच्छ्रः। एतच्चाष्टाहसाध्यं पर्णकृच्छ्रान्तरं। अत्र धेनुद्वयं। लघुगुरुपापभेदेन व्यवस्था। तथा वैवस्वतः। पल
मेकमप्पीत्वा सार्पिषस्कपलद्वयं। पलमेकं तु तोयस्य तत्कृच्छ्रमुदाहृतं। एतच्च दिनत्रयसाध्यं। तथा याज्ञवल्क्यः।
। तप्तक्षीरघृताम्बूनां प्रत्येकं प्रत्यहं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्रमपावनः। एतच्चतुरहसाध्यं तप्तकृच्छ्रान्तरं। अ
त्रैका धेनुः। तथा मनुः। तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः। एतच्च द्वादशा
हसाध्यं तप्तकृच्छ्रान्तरं। लघुगुरुपापभेदेन तप्तकृच्छ्राणां व्यवस्था। तथा च मनुः। त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचि
तं। त्र्यहं परं तु नाश्नीयात्प्राजापत्यविधिः स्मृतः॥ तथा चापस्तम्बः। प्रातस्तु द्वादशग्रासाः सायम्पञ्चदशैव तु। अ

Indira Gandhi National
Centre for the Arts

प्रा. यावित्तेवतुर्विंशाष्टयं निरशनञ्च मात्रा एवं द्वादशदिनैः प्राजापत्येन षडुपवासाः। अत्रैकाधेनुः। तथापस्तम्बः। सायम्प्रातस्तथै
वैकं दिनद्वयमयाचितम्। दिनद्वयं न भुञ्जीत कृच्छ्रार्द्धं तु विनिर्दिशेत्। इदं षडहसाध्यं प्राजापत्यार्द्धं। तथा याज्ञवल्क्यः।
एकभक्तेन नक्तेन तथैवायाचितेन वा। उपवासेन चैकेन पादकृच्छ्रः उदाहृतः। एष त्र्यहसाध्यः प्राजापत्यपादः। त
थाच मनुः। एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः इति। प्राजापत्यव्रत एव
यदा सायम्प्रातरयाचितभोजनानि ग्रासमात्रपरिमितानि भवन्ति तदातिकृच्छ्रः। एतद्द्वादशाहसाध्यम्। अत्र धेनु
द्वयम्। तथा याज्ञवल्क्यः। कृच्छ्रातिकृच्छ्रं पयसा दिवसानेकविंशतिं। पयश्च पानीयं न तु दुग्धं। अत्र तु कृच्छ्रातिकृ
च्छ्र इति गौतमवचनात्। एतच्चैकविंशतिदिवससाध्यम्। अत्र धेनुचतुष्टयं। तथा चोक्तम्। द्वादशाहोपवासेन पराक
ः परिकीर्तितः। अत्र धेनुद्वयं। पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योयमुच्य ७६
ते। पिण्याको गलितस्नेहस्तिलादिपिण्डः। आचामो भक्तमण्डः। एष सौम्यकृच्छ्रः षडहसाध्यः। अत्रैकाधेनुः। एषां

त्रिरात्रमभ्यासादेकैकं प्रत्यहं पिबेत्। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाह्निकः। एषां पिण्याकादीनां प्रत्येकं त्र्यहं
त्र्यहं पानात्पञ्चदशाहसाध्यं तुलापुरुषव्रतम्। अत्र धेनुद्वयम्। तथा वसिष्ठः। एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे
च ह्रासयेत्। अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः। पिण्डाश्च मयूराण्डप्रमाणाः कर्तव्याः। तथा च याज्ञ
वल्क्यः। तिथिवृद्ध्या चरेत्पिण्डान् शुक्ले शिखण्डसम्मितान्। एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरेत्। एतच्च यव
वमध्ये स्थूलं यवमध्यं चान्द्रायणम्। अत्र च मासेकेन विंशत्यधिकशतद्वयम्। पिण्डमात्राहारेणामावास्यायां चो
पवासेन क्लेशातिशयाच्चान्द्रायणानन्तरे चान्द्रायणमकुर्वाणाः कुर्युः कृच्छ्रचतुष्टयमित्येतद्विषयत्वेने
नात्र धेनुचतुष्टयं। तथा यमः। अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते। नियतात्मा हविष्यस्य यति
चान्द्रायणं चरन्। तथा च बृहद्विष्णुः। अष्टौ ग्रासान् प्रतिदिवसं मासमश्नीयात्स यतिचान्द्रायणो मासः। अत्र
मासेकेन चत्वारिंशदधिकशतद्वयपिण्डाहारेणोपवासाभावेन क्लेशाल्पत्वाद्यतिचान्द्रायणाशक्तौ चान्द्रायण

प्रा· ७७ त्तिः। कृच्छ्रे पराकस्तु द्वयेन वा। एतत्कृच्छ्रप्रमाणं तु विद्वद्भिः परिकीर्तितमित्येतद्वचनविषयम्। तेनात्र यति
चांद्रायणे धेनुचतुष्टयम्। तथा च मनुः। चतुरः प्रातरश्नीयात्पिंडान्विप्रः समाहितः। चतुरोस्तमिते सूर्ये शिशुचा
न्द्रायणं स्मृतम्। अत्र यतिचांद्रायणवदेव धेनुत्रयम्। तथा च बृहद्विष्णुः। त्रीन्त्रीन्पिंडान्समश्नीयान्नियतात्मा
दृढव्रतः। हविष्यान्नस्य वै मासमृषिचांद्रायणं स्मृतम्। अत्र मासेकेन नवतिपिंडाहारेण क्रमात्तिशयात्
चांद्रायणाशक्तौ सत्यां चांद्रायणपराकात्मनिष्कृतिं यो न शक्नुयात्। स करोत्यात्मशुद्ध्यर्थं प्राजापत्यस्य पञ्च
कमित्येतद्विषयत्वम्। तेनात्र पञ्च धेनवः। अहं पिबेद्वा गोमूत्रमहस्त्व गोमयं पिबेत्। त्र्यहं अहं यावकं तु श्रीकृ
च्छ्रं तदुच्यते। एतद्वहादशाहसाध्यम्। अत्र धेनुद्वयम्। तथा मार्कंडेयः। गोमूत्रेण चरेत्स्नानं वृत्तिं गोमयमाच
रेत्। गवां मध्ये सदा तिष्ठेद्रात्रौ रीनेव संविशेत्। गोष्वपीतासु न पिबेदुदकं व्रतमाचरन्। अभुक्तासु तु नाश्नीया
दुत्थितास्वुत्थितो भवेत्। तथा वै वो पाविष्टासूपविशेन्नरः। मासेनैकेन कार्योनं गोव्रतं कल्मषापह ७७

प्राय· ७८ अत्र पञ्च धेनवः। तथा यमः। गवामाहारनिर्मुक्तैर्यवैः सक्तुः समश्नुतः। याम्मन्त्रार्थं समुद्दिश्य मासेन स्तु निपावनः॥
सर्वकामप्रदं ह्येतत्सर्वकल्मषनाशनम्। अत्रापि पञ्च धेनवः॥ ॥इति श्रीबालवल्लभीभुजङ्गापरनामतत्तत्वदे
वसूनुकृतो प्रायश्चित्तप्रकरणे कृच्छ्रपरिच्छेदः समाप्तः॥ ॥समाप्तश्चायं प्रायश्चित्तप्रकरणम्॥ ॥शुभं भवतु॥

७८

Indira Gandhi National
Centre for the Arts

॥ श्रीकृष्णार्पणमस्तु ॥ श्रीगोपीनाथकस्य ...

॥ बृहद्वज्रायन्त्रितं

गोपीनाथस्य रामकृष्णेदं

Indira Gandhi National
Centre for the Arts